कात्यायनवार्तिकानां भाषाशास्त्रीयमध्ययनम्

A LINGUISTIC STUDY OF THE VĀRTIKAS OF KĀTYĀYANA

डॉ॰ सतीशचन्द्र झा

कात्यायनवार्तिकानां भाषाशास्त्रीयमध्ययनम्

(A LINGUISTIC STUDY OF THE VĀRTIKAS OF KĀTYAYĀNA)

कात्यायनवार्तिकानां भाषाशास्त्रीयमध्ययनम्

(A LINGUISTIC STUDY OF THE VARTIKAS OF KATYAYANA)

डॉ० सतीशचन्द्र झा

(एम. ए., पीएच. डी., डी. लिट्.)

उपाचार्यः संस्कृतविभागस्य

बिहारविश्वविद्यालयमुजफ्फरपुरस्य

बिहार मनीषा

बिहार विश्वविद्यालय परिसर

मुजफ्फरपुर-842001

मूल्य—एक सौ रुपये मात्र (१००·००)

प्रथम संस्करण—अक्तूबर 1985

© श्रीमती मोहिनी झा

प्रकाशक :

बिहार मनीषा

बिहार विश्वविद्यालय परिसर,

मुजफ्फरपुर-842001

मुद्रक :

सुदर्शन मुद्रक

४२, उत्तर बेनिया बाग,

वाराणसी-221001

कात्यायनवार्तिकानां भाषाशास्त्रीयमध्ययनम्

(A Linguistic Study of the Vartikas of Katyayana)

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुः साक्षात् परब्रह्म तस्मै श्रीगुरवे नमः ॥
भाषासाहित्यशास्त्रेषु निष्णाताय महात्मने ।
मिश्रश्रीजयमन्ताय गुरवे मे नमो नमः ॥



आचार्य डॉ० जयमन्त मिश्रः
कुलपतिः
कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयस्य

येषां प्रेरणाभिः स्नेहवात्सल्याशीर्भिः
ग्रन्थोऽयं सम्पूर्णः तेषां गुरुप्रवराणाम्
आचार्य डॉ० जयमन्तमिश्रमहोदयानां
निरन्तरसारस्वतसाधनायै समर्पितेयं
मदीया कृतिः

सतीशचन्द्र झा

पुरोवाक्

"इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥"

इति सुमतिना यथार्थवादिना आचार्य-दण्डिना यत् प्रोक्तं तस्य वास्तविकतां विजानते विपश्चितः भुवनत्रयान्धकार-निवारणाय समभिव्यक्तेऽस्मिन्नेव शब्द-प्रकाशे मानव-समाज-व्यवहार-जातं-सम्पद्यते । एतद्व्यवहारजातस्य शब्दापशब्दाभ्यां निष्पन्नत्वेऽपि शब्देन निष्पादनं-श्रेयस्करमिति समुद्घोष्यते—

"एकः शब्दः सम्यग्ज्ञातः सुष्ठुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति" इत्यादिना । शब्दस्य सम्यग्ज्ञानाय सुष्ठुप्रयोगाय च शब्दानुशासनस्य परमावश्यकत्वम् । तदेव प्रतिपादयितुम्—इन्द्रापिशलि-गार्ग्य-गालव सेनक-शाकल्य-चाक्रवर्म-भारद्वाज-शाकटायन-स्फोटायन-प्रभृतीनां महर्षिपाणिनेः पूर्ववर्तिनाम्-महर्षीणाम् समभूत् प्रयासः शब्दानुशासनाय । रामायण-महाभारत-पुराणादिषु ये खलु अपाणिनीयाः प्रयोगा दृश्यन्ते तेषां साधुत्वमेतेषामेव आचार्याणां व्याकरणनयैर्भवतीति महाभारतटीकायां प्रतिपादितम्—

"यान्युज्जहार माहेन्द्राद् व्यासो व्याकरणार्णवात् ।
पदरत्नानि किन्तानि सन्ति पाणिनि-गोष्पदे ॥"

इत्यादिना । एवंहि इन्द्रादीनां पूर्वाचार्याणाम् विशालव्याकरणस्य संक्षेपं विदधता महर्षिणा पाणिनिना अष्टाध्याय्यात्मकं स्वकीयं व्याकरणं निरमायि ।

एतत् सूत्रेष्वेव च—

"अल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखम् ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदोविदुः ॥"

इतिलक्षणात्मकं सूत्रं नाम अन्वर्थतां भजते ।

पाणिनीयाष्टकेन असम्पादितसाधुत्वानां-शब्दानां साधुत्वाय महर्षि-कात्यायनेन तत्तत् सूत्रेषु वार्तिकानि विरचयाञ्चक्रिरे ।

एतान्येवोद्दिश्य परिभाषन्ते प्राज्ञाः—

"उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते ।
तं ग्रन्थं वार्तिकं प्राहुर्वार्तिकज्ञा विचक्षणाः ॥" इति ।

एवंहि महर्षिकात्यायन-कालपर्यन्तं संस्कृत-लोक-भाषायां समाविष्टानां शब्दानां साधुत्वं समाधीयते कात्यायन-वार्तिकैः ।

शब्दानुशासनस्य मुख्य-गौणप्रयोजन-प्रतिपादन-पुरस्सरं सूत्र-वार्तिक-व्याख्यानं विदधे महाभाष्यकारेण महर्षिणा पतञ्जलिना । एतदेवाभिलक्ष्य लक्ष्यते मनीषिभिः—

"सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदोविदुः ।।" इति ।

पाणिनि-कात्यायन-पतञ्जलनामेतेषां-त्रयाणां महर्षीणां सूत्र-वार्तिक-भाष्यरूपमेतत् त्रयम् व्याकरणम् ।

व्याकरणविद्याया विद्यावतामेतेषां त्रयाणाम् महर्षीणाञ्च एतादृशः अभेदो वैयाकरणैरङ्गीक्रियते—येन 'त्रिमुनि व्याकरणमि'ति प्रसिद्धमभूत् । अतो व्याकरण-विद्याया विचारे विवेकिनो विपश्चितः विशिष्टमेव एतद्रूपं विवेचयन्ति ।

वार्तिकेषु –'उक्तानुक्तदुरुक्तानि चिन्तयन्ति सचेतसः' इतिसिद्धान्तेन महर्षिकात्यायनकाले संस्कृतभाषायां समागतानां नवीनानां शब्दानामेव साधुत्वाय महर्षिणा वार्तिकानि विरचयाञ्चक्रिरे इति कथनं न समीचीन-मित्येतत् सर्वं तर्क - प्रमाणाभ्यामनुसन्धात्रा डॉ० सतीशचन्द्रझामहोदयेन प्रकृतग्रन्थे प्रतिपादितम् ।

कात्यायनकालिक-संस्कृत भाषाप्रयोगे विहितवार्तिकसाधुत्वानां शब्दानाम् मुख्यतः रूपध्वनि-शब्दार्थ-वाक्यविचार-दृष्ट्या भाषाशास्त्रीय-मध्ययनं प्रकृतग्रन्थः प्रकटयति । आनुषङ्गिकतया कृतोहि 'महाभाष्ये कात्यायनवार्तिकनिर्णयः' ग्रन्थस्यास्य महत्त्वमादधाति ।

मन्निदेशकत्वे लिखिते ग्रन्थेऽस्मिन् सूक्ष्मेक्षिकया विषयप्रतिपादनं तर्क-प्रमाणाभ्यां-पदार्थनिरूपणञ्च एतद्वैशिष्ट्यं प्रकाशयतस्तमाम् । एवमेव सारस्वतयागानुष्ठानं विदधत् आयुष्मान् डा० सतीशचन्द्रझा जिज्ञासूनां समुपकाराय विदुषां परितोषाय सर्वजनहिताय शास्त्रीयं परिशीलनं प्रकाशयतुतरामितिशम् ।

जयमन्तमिश्रः
कुलपतिः
कामेश्वरसिंहदरभंगा संस्कृतविश्वविद्यालयः,
दरभंगा

अनन्तचतुर्दशी,
२७-९-१९८५

मङ्गलकामना

प्रभविष्णुना डॉ० सतीशचन्द्रझामहोदयेन लिखितं "कात्यायनवार्तिकानां भाषाशास्त्रीयमध्ययनम्" नामकं पुस्तकमाद्योपान्तं गम्भीरतयाऽधीतम्। पुस्तकं पठित्वा वस्तुतो नितरां मोदमेति मानसं यदानीन्तनेऽपि व्याकरणभाषाशास्त्रसदृशं कठिनं गहनञ्च विषयमालम्ब्य सरलप्राञ्जल-संस्कृतभाषायां शोधात्मकग्रन्थस्य प्रणयनं कुर्वन्तः कियन्तो विद्वांस-श्चिन्तकाः सन्ति।

विस्तृतेऽस्मिन् प्रबन्धे यादृशसूक्ष्मेक्षिकया विश्लेषणं कृतं, लोके प्रवहमानानां शब्दानां यादृशाः शतशः प्रयोगास्तेषां साधनोपायाश्च वार्तिककारद्वारा वर्णितास्तत्र च किं रहस्यं किं बीजमित्यादिविषये विशदविवेचनेन ग्रन्थोऽयं महत्त्वपूर्णो जातः, प्रणेता चास्य मनीषिणां विपश्चितां मध्येऽपश्चिमः संवृत्तः।

इदं त्वत्र निश्चितं यत् शास्त्रीयपरम्परामनुसृत्य शोधकर्तारश्चानेन ग्रन्थेन लाभान्विताः भविष्यन्ति।

पौनः पुन्येन शुभाशंसया सह—

कल्याणाकाङ्क्षी-

आद्याचरण झा

प्रतिकुलपतिः,

२७-९-८५

कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयस्य

आत्माभिव्यक्तिः

यस्याः स्मरणमात्रेण कृष्णचन्द्रो जगद्गुरुः ।
तस्यै श्रीत्रिपुरादेव्यै अम्बिकायै नमोनमः ॥ १ ॥
आद्याचरणध्यानेन संसारः सत्प्रवर्तकः ।
शमयेदिन्द्रकला विघ्नं प्रत्यक्षाप्रत्यक्षजम् ॥ २ ॥

भाषाशास्त्रविचारणया कात्यायनवार्तिकानां विशिष्टं महत्त्वं तिष्ठति यतः महर्षिकात्यायनस्य समयं यावत् नूनं संस्कृतं लोकभाषा आसीत्। भाषाशास्त्रं विभिन्नैः नियमैः उपनियमैः वा लोकभाषायाः अनुशीलनं करोति येन भाषायाः प्रकृत्याः प्रवृत्त्याश्च तात्त्विकरूपेण ज्ञानं प्राप्तुं शक्यते। कात्यायनानन्तरं संस्कृतस्य लोकभाषात्वं शनैः शनः समाप्ति-प्रक्रियां प्रति अग्रसरं सञ्जातम्। तथा च स्वयं भगवता पतञ्जलिना स्वीकृतं यदिदानीं संस्कृतं शिष्टभाषोन्मुखं तिष्ठति। अतः पतञ्जलेः प्राक् लोकभाषायाः संस्कृतस्य स्वरूपपरिज्ञानाय कात्यायनवार्तिक-माश्रित्य भाषाशास्त्रीयं विश्लेषणं परमापेक्षितं वर्तते अथ च एतदध्ययनं संस्कृतव्याकरणस्य संस्कृतभाषाशास्त्रस्य च विशिष्टानुशीलने सहायकं भविष्यति, इत्यवबुध्य प्रकृतग्रन्थस्य प्रणयनं कृतम्। एवञ्च—

उपासनीयं यत्नेन शास्त्रं व्याकरणं महत्।
प्रदीपभूतं सर्वासां विद्यानां यदवस्थितम् ॥ इति

विचारमनुस्मृत्य सर्वविद्यायाः मुखं व्याकरणं स्मृतं 'प्रधाने च कृतो यत्नः फलवान् भवति' इति परिपाटीमनुसृत्य कार्येऽस्मिन् प्रवृत्तिः सञ्जाता। यद्यपि व्याकरणं भाषाशास्त्रमित्युभयमेव शास्त्रं तात्त्विकरूपेण ज्ञातुं दुष्करमेव, प्राज्ञम्मन्यमनाः हठेन पठिती मास्मिन् खलः खेलतु' इति श्रीहर्षवचनं भूयोभूयः परिभाव्य अत्र प्रसक्तिः अतीव कठिना भविष्यतीति विचिन्त्य ग्रन्थप्रणयनकाले विभिन्नं काठिन्यं चावाप्य सर्वदैव कार्यस्यास्य पूर्णतायां संशयान एव आसम्। जगदम्बायाः कृपया, गुरोः डॉ० जयमन्त मिश्रमहोदयस्य प्रेरणया च यथातथा स्वकीयमत्या कार्यमिदं सम्पूर्णतामधिगतम्। अद्य नीरक्षीरविवेकिनां मनीषिणां पुरतः ग्रन्थमिमं समुपस्थापयन् यथा हर्षोत्फुल्लः तिष्ठामि तथैव इदमपि प्रार्थये यदिदं कार्यं सुधियां परितोषाय भवेत्—

'आपरितोषाद् विदुषां न साधुमन्ये प्रयोगविज्ञानम्'। कठिनगहन-विषयस्यापि व्याख्यानं सरलं सुगमं तात्त्विकञ्च भवेत् एतदर्थं सर्वथा मया प्रयतितम् किन्तु क्वचनमतिमान्द्यात् कुत्रचित् मुद्रणजन्यदोषाच्च मनुष्यशेमुषीसुलभं स्खलितं विदुषाम् अक्षिविषयम् आपतेत् चेत्तर्हि—

"गच्छतः स्खलनंक्वापि भवत्येव प्रमादतः।
हसन्ति दुर्जनास्तत्र समादधति साधवः॥"

इति सर्वं स्खलितजातं सहिष्णुभिः सारग्राहिभिः दयालुभिः मनीषिभिः शोधनीयम्। अहमपि ग्रन्थस्यास्यापरसंस्करणसमये सर्वं प्रकटीभूतं त्रुटिजातम् अपाकरिष्यामीति सविनयम् अभ्यर्थये।

माङ्गलिकेऽस्मिन् द्वितीयग्रन्थप्रकाशनावसरे येषां विभिन्नसज्जनानां सहयोगं प्राप्तवानस्मि तेषां कृते कृतज्ञताज्ञापनमतीव आवश्यकम्। वस्तुतः ग्रन्थस्यास्य प्रणयनस्य प्रेरणा तत्पूर्णतार्थम् अपेक्षितपर्यवेक्षणञ्च मया आचार्यप्रवराणां डॉ० जयमन्तमिश्रमहोदयानां सकाशमेवाधिगतम्। डॉ० मिश्रमहोदयाः विभिन्नानां विद्यानाम् एकत्र आकरस्वरूपाः सन्तोऽपि स्वकीयमधुरनम्रस्वभावेन समेषां जनानामाकर्षणकेन्द्रभूताः। एषामाचार्यवर्याणां प्रकृतग्रन्थस्य "पुरोवाचा" सर्वथा आह्लादितः कृतज्ञश्च तिष्ठामि। अद्यपर्यन्तजीवनस्य विभिन्नेषु अध्यायेषु एषां विशिष्टं योगदानं स्मारं-स्मारं ग्रन्थमिमं एषामेव निरन्तरसारस्वतसाधनायै समर्पयन् अमन्दमानन्दमनुभवामि। व्याकरणवेदान्तन्यायसाहित्यादिविद्यानां मर्मज्ञविदुषः पण्डितप्रवरस्य स्वजनकस्य श्रीकृष्णचन्द्रझाशर्मणः सकाशाद् बाल्यकालादारभ्य संस्कृतविद्या मयाधीता। एतस्यापि ग्रन्थस्य विभिन्नग्रन्थिविमोचनाय तदीय सारस्वतज्ञानोपासनायाः साहाय्यं मया गृहीतम्। अद्य अनेन ग्रन्थोपस्थापनेन पितुः गुरोश्च पुरतः भूयशः प्रणतः अतीव मोदान्वितः जनोऽयम्। स्वश्वसुरं पण्डितवर्यं श्रीमन्तम् आद्याचरणझामहोदयं प्रति प्रणतोऽस्मि यस्य बहुमूल्यपरामर्शैः आशीर्वचनैश्च कार्यमिदं सम्पन्नम्।

हिन्दीभाषायाः भाषाशास्त्रस्य च मर्मज्ञविदुषाम् अग्रसरणौ प्रतिष्ठितः स्वर्गीयः पद्मश्रीः डॉ० श्यामनन्दनकिशोरमहोदयः अद्य भूयोभूयः मया स्मर्यते यस्य विभिन्नैः अविस्मरणीयः साहाय्यैः उपकृतोऽयं जनः।

बिहारप्रदेशस्य भूतपूर्वः मुख्यमन्त्री अथ च युगेस्मिन् बिहारराज्ये संस्कृतशिक्षायाः समुद्धारकः गुरुप्रवरः डॉ० जगन्नाथमिश्रमहोदयः सदैव मम प्रेरणास्रोतरूपेण विद्यते, अतः संस्कृतभाषायां लिखितस्य स्वकीयप्रथमग्रन्थस्य प्रकाशनावसरे तं हृदयेन प्रणमामि। जबलपुरविश्वविद्यालयस्य भूतपूर्वः कुलपतिः डॉ० प्रभुदयालु अग्निहोत्री, जबलपुरविश्वविद्यालयस्य संस्कृतविभागस्य आचार्यः डॉ० कृष्णकान्तचतुर्वेदी, काशीहिन्दूविश्वविद्यालयस्य आचार्यः डॉ० वीरेन्द्रकुमारवर्मा, डॉ० हरि प्रपन्नद्विवेदी (आचार्यः अध्यक्षश्च बिहारविश्वविद्यालय संस्कृतविभागस्य), डॉ० परमानन्द झा शास्त्री (आचार्यः अध्यक्षश्च दरभङ्गास्थ-

ललितनारायणमिथिलाविश्वविद्यालयसंस्कृतविभागस्य), डॉ० भोलाशङ्करव्यासः, (संस्कृतसाहित्यस्य संस्कृतभाषाशास्त्रस्य च तत्त्वज्ञः विद्वान्), डॉ० रामेश्वर झा (श्रीरमेशझा) आचार्यः, बिहारविश्वविद्यालयगणितविभागस्य बिहारविश्वविद्यालयस्य महाविद्यालय समायोजकश्च), डॉ० मुनीश्वरानन्द गिरिः (भूतपूर्वः प्राचार्यः, सिवानस्थडी० ए० वी० महाविद्यालयस्य), श्रीसोमेश्वरमिश्रः (उपाचार्यः डी० ए० वी० महाविद्यालयस्य), पण्डितश्रीकमलोद्भवशर्मा (उपाचार्यः डी० ए० वी० महाविद्यालयस्य) श्री रतिकान्त पाठकः, श्रीमहावीरपाठकः, डॉ० शिवशङ्करप्रसादः, डॉ० वैद्यनाथझा (सर्वे उपाचार्याः बिहार विश्वविद्यालयसंस्कृतविभागस्य), डॉ०शिवशङ्करोपाध्यायः (भूतपूर्वः उपाचार्यः बिहारविश्वविद्यालय संस्कृतविभागस्य), एतेषां सर्वेषां गुरुप्रवराणाम् उचितपरामर्शैः शुभाशंसाभिश्च जीवनपथे अग्रसरः तिष्ठामि। एतदर्थं पौनः पुन्येन कृतज्ञतां प्रणतिं च प्रकाशयामि।

सुखदुःखयोः समानरूपेण सहयोगकारिणी मम विशिष्टा मित्रमण्डली अपि ग्रन्थस्यास्य प्रकाशने प्रेरिका विद्यते। तत्र च ममैव विश्वविद्यालयस्य इतिहासविभागस्य उपाचार्यः डॉ० हरिश्चन्द्रसत्यार्थी मम सर्वकालमित्रं वर्तते। प्राचीनभारतीयेतिहासस्य तत्त्वज्ञस्य अस्य विदुषः बहुमूल्यपरामर्शैः मित्रजनितोत्साहसम्बर्द्धनैश्च अहं भूयशः लाभान्वितः तं प्रति पूर्णकृतज्ञतां विज्ञापयामि। लंगटसिंहमहाविद्यालयस्यभौतिक विज्ञानविभागे विशिष्टः शिक्षकः तथा बिहारविधानसभायाः माननीयः सदस्यः ममाभिन्नहृदयः श्रीयुगेश्वर झा, सदैव प्रोत्साहकं वरिष्ठं मित्रं श्रीनन्दकिशोरमिश्रः (प्राचार्यः ललितनारायण तिरहुतमहाविद्यालयमुजफ्फरपुरस्य), प्रियसुहृत् श्रीशम्भुप्रसादचौधरी, (कटिहारवास्तव्यः), डॉ० गिरिधरप्रसादठक्कुरः (उपाचार्यः ललितनारायणमिथिलाविश्वविद्यालय मनोविज्ञानविभागस्य), श्रीदयाशङ्कर प्रसादः (कार्यपालकः अभियन्ता), डॉ० प्रभाकिरणमहोदया (प्राध्यापिका, बिहारविश्वविद्यालय संस्कृतविभागस्य) एतेषां समेषां मित्रवर्याणां कृते स्वकीयं हार्दिकम् आभारं विज्ञापयामि, येषां प्रोत्साहनैः विविधसाहाय्यैश्च सर्वथानुगृहीतोऽस्मि।

मम कतिपयप्रियछात्राः वर्तन्ते ये पुस्तकानां संग्रहादिकार्ये साहाय्यं कृतवन्तः तान् प्रति ममायं स्नेहाशीर्वादः यत् सुरभारत्याः साधनायाः विशिष्टे मार्गे ते सदैव अग्रसराः तिष्ठेयुः। तेषु प्रमुखाः वर्तन्ते—डॉ० केशवझा (प्राध्यापकः ललितनारायणतिरहुतमहाविद्यालयसंस्कृतविभागस्य), श्रीयुतः अनिलकुमारसिंहः (प्राध्यापकः साहेबगंजस्थचन्द्रदेवनारायणमहाविद्यालयसंस्कृतविभागस्य), श्री गनीनाथमिश्रः,

श्रीरमेशकुमारोपाध्यायः, श्रीभूषणकुमारोपाध्यायः। डॉ श्रीप्रमोदचन्द्रझा (अध्यक्षः औरङ्गाबादस्थसच्चिदानन्दसिन्हामहाविद्यालयसंस्कृतविभागस्य), श्री मिथिलेशचन्द्र झा (प्राध्यापकः महाकविकालिदासस्मारकमहाविद्यालयत्रिमुहान-चन्दौनासंस्कृतविभागस्य) ! श्री मनोजचन्द्रझा (संस्कृतस्य षष्ठवर्गस्य छात्रः मगधविश्वविद्यालयस्य)—इमे मे भ्रातरः सारस्वतसाधनायां सर्वदैव सहयोगिनः विद्यन्ते, अतः अवसरेऽस्मिन् तेषां कृते स्नेहाशिषं प्रयच्छामि अथ च कामये यत् ते सर्वदैव समुन्नतिपथमारूढा भवेयुः।

मदीया गुरुपत्नी श्रीमती सुशीलादेवी (धर्मपत्नी डॉ० जयमन्तमिश्रमहोदयस्य कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयस्य कुलपतिपदभाजः) सर्वदैव माम् ज्ञानोपासनाक्षेत्रे प्रेरितवती। अद्य तां प्रति ग्रन्थेनानेन प्रणतिं निवेदयामि। जगदम्बेव अम्बा अम्बिकादेवी एव मदीयसमग्रजीवनदर्शनस्य सञ्चालिकात्वेनावस्थिता वर्तते। अद्यावधि यत् किञ्चिन्मयावाप्तं तिष्ठति तत्र सैव कारणस्वरूपा। ब्रह्मलोकवासिनी श्वश्रूः इन्द्रकलाझा बारम्बारं स्मर्यते यस्याः वात्सल्यस्य स्निग्धशीतलछायातः अकस्मात् वञ्चितः सपरिवारोऽयंजनः।

यद्यपि स्वसहधर्मचारिणीं मोहिनीं प्रति कृतज्ञताज्ञापनम् औपचारिकं भविष्यति किन्तु यदीदं न विधीयते ततो महान् अपराधः भविष्यति। रात्रिन्दिवं यादृशपरिश्रमेण ग्रन्थप्रणयने सहयोगं कृतवती तदर्थं तस्यै स्नेहाशिषं प्रयच्छामि। मम ज्येष्ठा पुत्री रजनी, आत्मजौ श्रीराजेशचन्द्ररत्नेशचन्द्रौ इति सर्वाः सन्ततयः कार्येऽस्मिन् विभिन्नसहयोगं कृतवत्यः अतः ताभ्यः स्नेहाशिषां राशयः विलसन्तु।

'बिहारमनीषा' नाम्नी मुजफ्फरपुरस्थप्रकाशनसंस्था ग्रन्थमिमं प्रकाशितवती, एतदर्थं तां प्रति आभारज्ञापनं कर्तव्यमेव।

पुनश्च सच्छ्रेयसां प्रत्यक्षाप्रत्यक्षस्थितीनां पुरतः प्रणतोऽस्मि यासां साहाय्येन सर्वं निर्विघ्नं सम्पन्नम्।

विदुषां वशंवदः,

सतीशचन्द्र झा

उपाचार्यः
बिहारविश्वविद्यालय-मुजफ्फरपुर
संस्कृतविभागस्य।

अनन्तचतुर्दशी,
विक्रमसंवत्–२०४२

विषयक्रमः

पुरोवाक्—डॉ० जयमन्तमिश्रः	क
मङ्गलकामना—आद्याचरण झा	ग
आत्माभिव्यक्तिः—	घ
प्रथमोन्मेषः—भूमिका	१
द्वितीयोन्मेषः—महाभाष्ये कात्यायनवार्तिकनिर्णयः	२९
तृतीयोन्मेषः—कात्यायनवार्तिकव्युत्पन्नशब्दानां रूपपरिवर्तनदृष्ट्या अनुशीलनम्	६२
चतुर्थोन्मेषः—ध्वनिपरिवर्तनधिया प्रकृतस्य अनुशीलनम्	१२३
पञ्चमोन्मेषः—अर्थपरिवर्तनदिशा प्रकृतस्य अनुशीलनम्	१६२
षष्ठोन्मेषः—वाक्यविचारदृष्ट्या प्रकृतस्य	२०९
सप्तमोन्मेषः—उपसंहृतिः	२२२
परिशिष्टम्	२३०
सङ्केतनिर्देशिका	२३६
शब्ददेशना	२३७
वार्तिकदेशना	२४२

येन धौताः गिरः पुंसां विमलैः शब्दवारिभिः ।
तमः चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ।।
कात्यायनं मुनिश्रेष्ठं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारञ्च प्रणतोऽस्मि मुनित्रयम् ।।

।। प्रथमोन्मेषः ।।

भूमिका

भगवतः पाणिनेरनन्तरं संस्कृतभाषायां बहवः एवंविधाः प्रयोगाः प्रचारं-प्रसारं चापन्नाः, येषां शब्दसिद्धिः पाणिनिनियमतः दुश्शक्या आसीत् । उभयोः कालखण्डस्य अन्तराले विभिन्नानि भाषागतानि परिवर्तनानि सञ्जातानि येषां निष्पत्यर्थं पूरक-नियमानामावश्यकता समायाता, यस्याः सम्पूरणार्थं महर्षिणा कात्यायनेन स्वकीय-वार्तिकानि प्रस्तुतानि । कात्यायनस्य पुरतः एकमेव लक्ष्यमासीत्–स्वसामयिक-भाषामाधृत्य शब्दसिद्धिः । तदर्थं स नवीननियमान् निर्माय पाणिनिसूत्रेषु परिवर्तनम् परिवर्धनं च विधाय स्वकार्यं सम्पादितवान्, एवं च संक्षेपीकरणस्य प्रवृत्तिमपि न त्यक्तवान् । संक्षेपीकरणस्य प्रवृत्तिहेतोः समागतनवीनपरिवर्तनानां भाषायां स्थायि-रूपेण स्वीकारहेतोश्च सूत्रेषु संशोधनानि अपेक्षितानि सञ्जातानि, अत एव च तेन वार्तिकानां प्रणयनं व्यधायि । एतेन स्पष्टं यत् विशुद्धभाषाशास्त्रीयदृष्ट्या वार्तिका-नामेषां विरचनं कृतमस्ति । अत्र बलदेवोपाध्यायमहोदयः यत् कथयति—पाश्चात्य-विद्वांसः एवं चिन्तयन्ति यत् पाणिनेः कात्यायनस्य च मध्ये यः विस्तीर्णः कालखण्डः आसीत्, तस्मिन् इमे नवीनाः शब्दाः व्यवहारे समागताः, येषां निष्पत्तये व्यरीरचत् वार्तिकं कात्यायनः । परमिदं तथ्यतः दूरीभूतं वस्तु । इमे शब्दाः पाणिनेः काल एव नहि प्रत्युत ततोऽपि प्राचीनतराः परन्तु सूत्रकारस्य दृष्टिपरिधौ न समागताः यस्मात् हेतोः तेषां रूपसिद्ध्यर्थं तेन नियमाः न निर्मिताः, यतः तेन तु इदं प्रतिज्ञात-मपि नासीत् यत् स समेषां शब्दानां सिद्धये नियमं प्रस्तोस्यति 'न मे स्तेनो जनपदे ... न स्वैरी स्वैरिणी कुतः' इति छान्दोग्योपनिषदि समागतौ स्वैरी-स्वैरिणीशब्दौ

पाणिनिनियमैः वृद्धिरहितौ, ययोः निष्पत्तिः 'स्वादीरेरिणोः' इति वार्तिकेन विधीयते । एवमेव 'यक्षत प्रजापतिमिति प्रैषः' इति शतपथब्राह्मणे प्रोक्तः प्रैषशब्दः 'प्राद्- होढोढ्येषैष्येषु' इति वार्तिकेन सिद्धिं प्राप्नोति । दशार्णनदी इत्यस्य महाभारते उल्लेखः । 'प्रवत्सतरकम्बलवसनार्णदशानामृणे' इति वार्तिकेन एतस्य रूपसिद्धिः । अतः कस्यापि शब्दस्य पाणिनेरपेक्षया अर्वाक्कालीनत्वं कथमपि सिद्धं न भवति । एतेन ज्ञायते यत् अनेके वैदिकाः लौकिकाश्च शब्दाः अल्पप्रयोगवशात् अनवधानतातः प्रयोगस्य अतिविस्तृतत्वाच्च पाणिनिना न नियमबद्धाः कृताः, एषां पूर्तिः, कात्यायनेन कृता, शब्देषु अपूर्वता कथमपि नास्ति । किन्तु श्रीमतामुपाध्यायप्रवराणां मतमिदं न स्वीकार्यं तिष्ठति । यतः इदं विशदरूपेण ज्ञायते यत् कात्यायनकालेऽपि संस्कृतं लोकभाषा आसीत् । लोकभाषायां निरन्तरं परिवर्तनानि भवन्त्येव । संस्कृतं लोकभाषा तदानीन्तने समये आसीत्, एतस्य प्रमाणाय बहूनि वार्तिकानि निदर्शनरूपेण तिष्ठन्ति । पाणिनिवत् कात्यायनोऽपि कथयति यत् "भाषायां शासियुधिदृशिधृषिभ्यो युच्"[१] । एतेन स्पष्टमेव ज्ञायते यत् 'भाषायाम्' इत्यत; कात्यायनस्य तात्पर्यं वर्तते-- कथनोपकथनस्य भाषायाम्-जनभाषायामिति । 'सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च'[२] इति वार्तिकेन निष्पन्नः उष्ट्रमुखमिवमुखमस्य उष्ट्रमुखः, 'परोक्षे च लोकविज्ञाते प्रयोक्तुर्दर्शनविषये'[३] अरुणद्यवनः साकेतम् अरुणद्यवनो मध्यमिकाम्, 'इच्छापरिचर्या- परिसर्यामृगयाटाट्यानामुपसंख्यानम्',[४] 'जागर्तेरकारो वा'[५]–जागर्या, जागरा, 'भिदा विदारणे'[६]–भित्तिरन्या, 'धाराप्रपाते'[७]- धृतिरन्या, 'पृच्छतौ सुखस्नातादिभ्यः'[८] सौस्नातिकः, सौखरात्रिकः, सौखशायनिकः, 'मेस्याल्लोपो वा'[९]–द्विगुणं मे स्यादिति प्रयच्छति द्वैगुणिकः 'वृद्धेर्वृधुषिभावः'[१०]–वृद्ध्यर्थं धनं प्रयच्छति वार्द्धुषिकः, 'कार्षा- पणाद्वा प्रतिश्च'[११]–कार्षापणिकः कार्षापणिकी, प्रतिकः, प्रतिकी, 'कार्षापणसहस्राभ्यां सुवर्णशतमानयोरुपसंख्यानम्'[१२]–अध्यर्धसुवर्णम्, अध्यर्धेन सुवर्णेन क्रीतम् अध्यर्ध- सौवर्णिकम्, अध्यर्धशतमानम्, द्विशतमानम्–द्विशातमानम्, 'काकिण्याश्चोपसंख्यानम्'[१३] अध्यर्धकाकिणीकम्, द्विकाकिणीकम्, 'तस्य निमित्तप्रकरणे वातपित्तश्लेष्मभ्यः शमन- कोपनयोरुपसंख्यानम्'[१४]–वातस्य शमनं कोपनं वा वातिकम्, पैत्तिकम्, श्लैष्मिकम्;

---

१. महा० वा०, ३।३।१२० तथा 'भाषायांधाकृसृजनिगमिभ्यः' 'प्रत्यये भाषायां नित्यवचनम् ।
२. महा० वा०, ३।३।१३०
३. महा० वा०, ३।२।१११
४. महा० वा०, ३।३।१०१
५. महा० वा०, २।२।२४
६. महा० वा०, ३।३।१०४
७. महा० वा०, ३।३।१०४
८. महा० वा०, ४।४।१
९. महा० वा०, ४।४।३०
१०. महा० वा०, ४।४।३०
११. महा० वा०, ५।१।२५
१२. महा० वा०, ५।१।२९
१३. महा० वा०, ५।१।३३
१४. महा० वा०, ५।१।३८

आहृतप्रकरणे 'वारिजंगलस्थलकान्तारपूर्वपदादुपसंख्यानम्'[१]—वारिपथेन गच्छति वारिपथिकः, वारिपथेनाहृतम्–वारिपथिकम्, जंगलपथेन गच्छति–जांगलपथिकः; जंगलपथेनाहृतम्–जांगलपथिकम्, स्थलपथेन गच्छति–स्थालपथिकः, स्थलपथेनाहृतम्-स्थालपथिकम्; कान्तारपथेन गच्छति—कान्तारपथिकः, कान्तारपथेनाहृतम्-कान्तारपथिकम् 'अजपथशंकुभ्यां'[२] च अजपथेन गच्छति—आजपथिकः, अजपथेनाहृतम्—आजपथिकम्, शंकुपथेन गच्छति—शांकुपथिकः, शंकुपथेनाहृतम-शांकुपथिकम्, 'मधुकमरिचयोरण् स्थलात्'[३] स्थालपथं मधुकम्, स्थालपथं मरिचम्, 'गोष्ठादयः स्थानादिषु पशुनामादिभ्यः'[४], गवां स्थानं गोगोष्ठम्, अविगोष्ठम्, 'हृदयाच्चालुरन्यतरस्याम्'[५],–हृदयालुः हृदयी, हृदयिकः, हृदयवान्, 'शीतोष्णप्रेतृभ्यस्तन्न सहते[६]'–शीतालुः, उष्णालुः, तृप्रालुः, 'हिमाच्चेलुः'[७]–हिमेलुः 'कुक्कुट्यादीनामण्डादिषु पुंवद्वचनम्'[८]–कुक्कुट्या अण्डं कुक्कटाण्डम्, मृग्याः पदं मृगपदम्, काक्याः शाव.–काकशावः, 'वा प्रकरणे गिरिनद्यादीनामुपसंख्यानम्'[९]–गिरिणदी, गिरिनदी, चक्रणितम्बा चक्रनितम्बा, 'नादिन्याक्रोशे पुत्रस्येति', तत्परे च[१०]–पुत्रपुत्रादिनी त्वमसि पापे 'वा हतजग्धपरे च[११]'–पुत्रहती पुत्त्रहती–पुत्रजग्धी, पुत्त्रजग्धी; इत्यादिभिः विभिन्नैः निदर्शनैः स्पष्टरूपेण ज्ञायते यत् कात्यायनसमये संस्कृतं निश्चितरूपेण लोकभाषा आसीत्। पण्डितबलदेवोपाध्यायः अपि इदमेव स्वीकुर्वन् एकत्र कथयति यत् कात्यायनेन एवंभूतानां शब्दानामपि नियमनं प्रस्तुतं ये लोकजीवनतः सम्बद्धाः आसन् तथा सम्भवतः लोकभाषायाः आसन्[१२]। यदि इदं स्वीक्रियते यत् लोकजीवनतः–अत एव लोकभाषातः सम्बद्धाः–कतिपये शब्दाः आसन् येषां सिद्धिः कात्यायनेन कृता, तदा तु स्पष्टमेव ज्ञायते यत्, आसन् एवंभूताः कतिपये नवीनशब्दा ये पाणिनिकात्यायनयोः मध्ये समागतसुदीर्घकालावधौ भाषायां व्यवहारं प्राप्ताः, येषां सिद्धये कात्यायनेन वार्तिकानि प्रणीतानि। वेलवल्करमहोदयोऽपि तथ्यमिदं स्वीकरोति[१३]। श्री के०

---

१. महा० वा०, ५।१।७७
२. ,, ,, ५।१।७७
३. ,, ,, ५।१।७७
४. ,, ,, ५।२।२९
५. ,, ,, ५।२।१२२
६. ,, ,, ५।२।१२२
७. महा० वा०, ५।२।१२२
८. ,, ,, ६।३।४२
९. ,, ,, ८।४।११
१०. ,, ,, ८।४।४८
११. ,, ,, ८।४।४८
१२. संस्कृतशास्त्रों का इतिहास, पृ० ४४५
13. Katyayana's work, the Varttikas were meant to correct, modify or supplement the rules of Panini wherever they were

माधवकृष्णशर्मणामपि एवमेव विचाराः, यत् सकलं चराचरं जगत् सर्वदैव परिवर्तनशीलं तिष्ठति तथैव भाषापि परिवर्तनशीला[1]। सर्वथा सम्पूर्णाः अपवाद-रहिताः व्याकरणग्रन्थाः अपि भाषायाः परिवर्तनप्रक्रियां निवारयितुं न क्षमाः। यदा बहुसंख्यकानि ध्वनिसम्बन्धीनि, अर्थपरिवर्तनसम्बन्धीनि, वाक्यपरिवर्तनसम्बन्धीनि च परिवर्तनानि पाणिनिनियमेभ्यः बहिर्भूतानि सञ्जातानि तदा कात्यायनः अष्टाध्यायीमाश्रित्य स्ववार्तिकानां प्रणयनं कृतवान्। वेलवेल्करमहाशयोऽपि निस्सन्दिग्धरूपेण स्वीकरोति यत् भाषावैज्ञानिककारणादेव कात्यायनवार्तिकानि प्रणीतानि।[2] गोल्डस्टूकरमहोदयोऽपि इदमेव स्वीकृतवान् यत् पाणिनेरनन्तरं समागतविभिन्न-परिवर्तनानां व्याकरणदृष्ट्या सिद्धिमुपपादयितुं कात्यायनेन वार्तिकानि प्रणीतानि। तन्मते चतुर्विधरूपेण भाषायामिमानि परिवर्तनानि सञ्जातानि[3]। वस्तुतः अष्टा-

---

or had become partially or totally inapplicable.

S. K. Belvalkar, *Systems of Sanskrit Grammar*, p. 24.

1. "Even languages fortified by the most scopeful grammar cannot escape this inexorable process. And when numerous phonetic, Symantic and Syntactic changes carried the language beyond reaches of Panini Katyayana... ... set himself to write vartikas on the Astadhyayi. Which are in the forms of supplements, emendations, refutations, explanations et hoc genus omne."
K. Madhva Krishna sharma, *Panini, Katyayana And Patanjali*, p. 46.

2. 'Katyayana in that he meant to write a criticism on Panini was compelled to adhere to the latters terminology. Notwithstanding this fact he has used स्वर for अच्, व्यंजन for हल्, समानाक्षर for अक्, भवन्ती and अद्यतनी for लट् and लुङ्'
Systems of Sanskrit Grammar, p. 25.

3. This explanation, I hold, can only be derived from the circumstances that Panini and Katyayana belonged to different periods of Hindu Antiquity, periods separated by such a pace of time as was sufficient to allow—

ध्याय्याः प्रणयनानन्तरं वार्तिकानां रचनातः पूर्वं च संस्कृतभाषायां बहूनि भाषागतानि परिवर्तनानि सञ्जातानि । यावत् संस्कृतं तदानीन्तने समये लोकभाषा नासीत् तावत् एषां परिवर्तनानां कथमपि सम्भवः एव न स्यात् । यत्तु डेविड्-समहोदयः[१] कथयति यत् कात्यायनकाले संस्कृतं लोकभाषा नासीत् तथा सर्वे कात्यायनप्रोक्तनियमसिद्धाः शब्दाः पाणिनिपूर्वसमयस्य, पाणिनिकालिकाः वा वर्तन्ते, तत्तु उपरिलिखितविवेचनेन खण्डितं भवति । यदि पाणिनिकालिकाः एव इमे शब्दाः आसन् तदा इदं न स्पष्टीभवति यत् कथं पाणिनिना बहुसंख्यकाः इमे शब्दाः न व्याख्याताः ? लक्ष्यैकचक्षुष्कः पाणिनिः न एतादृशः वैयाकरणः यः स्वसमकालिकभाषायां प्रयुज्यमानानां शब्दानां व्याख्यानतः विमुखः भवेत् । सर्वथा इदमेव औचित्यपूर्णं कथनं यत् संस्कृतं पाणिनितः कात्यायनकालं यावत् लोकभाषा-विचाराणामादानप्रदानस्य भाषा आसीत् । अत एव एतादृशं महत् परिवर्तनं तत्र सञ्जातम् । इदन्तु निश्चप्रचमेव यत् सन्ति केचन एवंभूताः अपि शब्दाः ये पाणिनि-कालतः पूर्वस्मिन् काले अथवा तस्य समकाले प्रयुक्ताः आसन् किन्तु पाणिनिदृष्टितः नियमनिर्माणार्थं वंचिताः संजाताः, एतस्य इदमेव तात्पर्यम् यत् 'महान् हि शब्दस्य प्रयोगविषयः'[२] क्वापि अन्यस्मिन् प्रदेशे प्रयुज्यमानाः इमे शब्दाः पाणिनिना नावलोकिताः, अतः तेषां कृते अष्टाध्याय्यां सूत्राणि न दरीदृश्यन्ते । किन्तु कात्यायनेन तदर्थमेव नियमाः प्रणीताः । इदमपि सर्वथा निस्सन्दिग्धमेव यत् सन्ति अनेके भूयांसो वा शब्दाः नवीनाः, ये कात्यायनकालिकभाषायां प्रयोगे समागताः

(i) Grammatical forms which were current in the time of Panini to become obsolete or even incorreet.

(ii) Words to assume meanings which they did not possess at the period when he lived.

(iii) Words and meaning of words used by him to beeome antiquated and,

(iv) A literature unknown to him to arise.

Theodor Goldstucker, Panini, p. 135

1. T. W. Rhys Davids says that the Sanskrit was not a spoken language in this period.

Panini, Katyayana and Patanjali p. 72 इत्यत्र उद्धृतम्

२. महाभाष्यम्, प्रथमाह्निकम् ।

किन्तु पाणिनिनियमतः तेषां प्रयोगसाधुत्वं न कर्तुं शक्यते, अतः तेषां कृते वार्तिकस्य प्रस्तावः आचार्येण कृतः। इदमेव कारणं वर्तते यत् परवर्तिभिः सौनागादिभिः 'अत्यल्पमिदमुच्यते' इति कथयित्वा वार्तिकेषु पठितशब्दव्यतिरिक्तशब्दानामपि नियमनार्थं वार्तिकानां प्रणयनं कृतम्। स्वयं भाष्यकारेणापि बहुशः एतदर्थमेव वार्तिकानां परिवर्द्धनं विहितम् एवं च एवंभूतानामपि शब्दानां विषये अत्यल्पमिदमुच्यते, इति कथयित्वा सूत्रवार्तिकयोः नियमपरिधितः वहिर्गतानां किन्तु भाषायां प्रयुज्यमानानां शब्दानां साधुत्वसम्पादनार्थं स्वीयं मतं प्रस्तुतम्।

उपरिलिखितविवेचनेन इदं स्पष्टरूपेण ज्ञायते यत् आचार्येण पाणिनिना अष्टाध्यायीसदृशस्य सुनियन्त्रिततन्त्रस्य रचनया शब्दानामनुशासनस्य प्रयासः विहितः, किन्तु तथापि केचन शब्दा अवशिष्टाः एव संजाताः, येषां कृते नियमाः नोपस्थापिताः, तथा च कालान्तरे अनेके शब्दाः अस्मान्नियन्त्रणात् बहिर्गताः। एतस्य कारणद्वयं तिष्ठति। प्रथमं तु इदं यत् समयस्य प्रवाहानुरूपं कतिपयशब्देषु परिवर्तनसमागमनस्य प्रक्रिया तीव्रतरा संजाता, द्वितीयं चेदं यत् केचन नवीना अपि शब्दाः भाषायाः अंगरूपतां प्राप्तुम् अहमहमिकया समागताः। उभयविधयोः एवंविधयोः शब्दयोः विषये पाणिनिप्रोक्ताः नियमाः शनैः शनैः शैथिल्यमुपागताः। भाषायां परिवर्तनात् परिवर्द्धनाच्च इदं सर्वं स्वाभाविकमेव प्रतीयते। पाणिनेरुत्तरवर्तिनां वैयाकरणानां ध्यानम् एवंभूतोभयविधशब्दानां विषये आकृष्टं संजातं तथा तैः एवंभूताः शब्दाः अपि व्याकरणनियमैः नियन्त्रिताः। तत्र पाणिनीयपरम्परामाश्रित्य तां परिपाटीमनुसृत्य, तस्याः गरिम्णः स्वरूपं चाक्षुण्णं विधाय तत्रैव कतिपयपरिवर्तनानां विनिवेशं विधाय, नवीनशब्दानां साधुत्वप्रतिपादनाय प्रथमः प्रयासः विहितः कात्यायनेन। प्रयासोऽयं भाषाशास्त्रीयाध्ययनदृष्ट्या अतीव महत्त्वपूर्णः। विभिन्नैः कात्यायननियमैः भाषायाः परिवर्तनस्य विभिन्नरूपाणि अवलोक्यन्ते। कतिपयशब्दानां रूपं परिवर्तितं तिष्ठति। बहूनां शब्दानां ध्वनिमूलकं परिवर्तनं जातम्, अर्थेषु बहुधा परिवर्तनं समागतं, वाक्यस्य रूपे च पाणिनितः परिवर्तनं समजनि, इति भाषाशास्त्रस्य चतुर्विधदृष्ट्या संस्कृतभाषायां परिवर्तनानि समागतानि। पाणिनेः सृस्थिरे[1] इति सूत्रस्थं 'व्याधिमत्स्यबलेषु' इति वार्तिकं वर्तते। वार्तिकस्यास्य परिशीलनेन ज्ञायते यत् चन्दनसारः, खदिरसारः, इत्यादिरूपाण्यवलोक्य तत्सादृश्यात् अतिसारः, विसारः, इत्यादिरूपाणि प्रचलितानि तथा च रूपपरिवर्तनं भाषायां समागतम् एवंच आर्थिकपरिवर्तनमपि द्योत्यतेऽत्र, यतः सूत्रेण स्थिरेऽर्थे घञ्प्रत्ययः भवति किन्तु वार्तिकेनानेन विहितः घञ्प्रत्ययः अस्थिरार्थकः, एवंच

---

१. अष्टा०, ३।३।१७

स्थिरार्थतः भिन्ने अस्थिरे इति नवीनेऽर्थे वार्तिकप्रवृत्त्या अर्थपरिवर्तनं सूच्यते। 'ण्यासश्रन्थोयुच्'[१] इति सूत्रेण युच् प्रत्यये कारणा, हारणा, आसना, श्रन्थना, इत्यादिरूपाणि सिध्यन्ति, तेषामेव सादृश्यात् घट्टना, वन्दना, वेदनाप्रभृति-रूपाणि भाषायां प्रचलितानि येषां रूपसिध्यर्थं वार्तिकस्यास्यविधानम्। भाषायां प्राचार्यः, प्रपितामहः-इत्यादिप्रयोगप्रचलनमवलोक्य सादृश्यात् रूपपरिवर्तनं संजातम् प्रपलाशः, प्रपर्णम् इति[२]। शब्दानां पूर्वप्रयोगविषयेऽपि विभिन्नपरिवर्तनानि वार्तिकैः द्योत्यन्ते—'लघ्वक्षरम्'[३] इति वार्तिकेन ज्ञायते यत् समासे सति लघ्वक्षरस्य पूर्वप्रयोगे तदानीन्तनभाषायां प्रचलितः - कुशाश्च-काशाश्च-कुशकाशम्। शराश्च-चापाश्च-शरचापम्। एवं प्रतीयते यत् वार्तिककारस्य पूर्वकालिकभाषायां पूर्वप्रयोगस्य नियमः तथा न दृढः आसीत् यथा कालान्तरे संजातः। 'अभ्यर्हितम्[४]' इतिवार्तिकेन ज्ञायते-अत्यन्तादरणीयस्य पूर्वप्रयोगस्य व्यवहारः भाषायां समागतः—मातापितरौ श्रद्धामेधे सीतारामौ, राधाकृष्णौ--इत्यादिप्रयोगेषु, ज्येष्ठभ्रातृवाचकस्य शब्दस्य च पूर्वप्रयोगस्य निश्चिता व्यवस्था संजाता[५]–युधिष्ठिरार्जुनौ, रामलक्ष्मणौ। 'नानार्था-नामपि सरूपाणाम्'[६] इति वार्तिकेन ज्ञायते यत् अर्थदृष्ट्याभिन्नत्वे सत्यपि एक-सदृशवर्णानामेकशेषः भवति–यथा अक्षश्च अक्षश्च अक्षश्च अक्षाः, हरिश्च, हरिश्च, हरिश्च हराः। परस्परं भिन्नस्वरूपाणां शब्दानां किन्तु अर्थदृष्ट्या एकात्मनां शब्दानामपि 'विरूपाणाम्' इति वार्तिकेन। आत्मनेपदस्य प्रयोगविषये सूत्रेभ्यः पृथक्रूपोपपादनमपि बहुशः दरीदृश्यते, कतिपयानि एवंविधानि वार्तिकानि वर्तन्ते यानि आत्मनेपदपरस्मैपदयोः प्रयोगे परस्परं परिवर्तनम् उपस्थापयन्ति। तपस्यते इति वैदिकभाषायां व्यवहृतः प्रयोगः पाणिनिकाले लोकभाषायामप्यासीत् किन्तु कालान्तरे केवलं परस्मैपदघटितं रूपं व्यवहारे समागतं यस्य विश्लेषणार्थं 'तपसः परस्मैपदं चेति'[७] वार्तिककृता उपन्यस्तम्। समोऽकूजने[८] इत्यनेन ज्ञायते

---

१. अष्टा०, ३।३।१०७
२. प्रादिभ्यो धातुजस्य वा, महा० वा० २।२।२४
३. महा० वा०, २।२।२४
४. ,, ,, २।२।३४
५. भ्रातुश्च ज्यायसः महा० वा० २।२।३४
६. महा० वा०, १।२।६४
महा० वा० १।२।६४
७. महा० वा० ३।१।१५
८. महा० वा० १।३।२१

यत् परस्मैपदघटितं रूपन्तु कूजनभिन्नेऽर्थे संभवति किन्तु कूजनेऽर्थे तु आत्मनेपदं भवति। कारकविषयेऽपि बहूनि वार्तिकानि वर्तन्ते यानि पाणिनेरनन्तरं समागतान् अवशिष्टप्रयोगान् संकेतयन्ति-समया ग्रामम्, निकषा ग्रामं, हा देवदत्तम्[१], वाताय कपिला विद्युत्[२] प्रकृत्या चारुः, प्रायेण याज्ञिकः[३], अधीती व्याकरणे[४], इत्यादि-प्रयोगैः इदमेव समर्थितं भवति। आविष्कृतम्, दुष्कृतम् इति सादृश्यात् मुहुः कामयते इति विवक्षायां पाणिनेः नियमेन मुहुस्कामयते इति रूपापत्तिः किन्तु 'इदुदुपधस्य चाप्रत्ययस्येति चेत्पुम्मुहुषोः प्रतिषेधः'[५] इति वार्तिकेन षत्वनिषेधे मुहुः कामा इति भवति। स्पष्टतः भाषायामेवमवलोक्य कात्यायनेन नियमस्यास्य विधानं कृतम्। मुहुः कामा इत्यत्र 'कुप्वोः ≍क ≍पौ च'[६] इति सूत्रेण जिह्वामूलीयस्य≍प्राप्तिः आसीत् तथा एवमुच्चारणं स्यात्–मुहुः≍कामा, तत् प्रबाध्य 'इदुदुपधस्य चाप्रत्ययस्येति'[७] षत्वस्य प्राप्तिः किन्तु वार्तिकनियमेन षत्वस्यापि प्रतिषेधः। पौनःपुन्येऽर्थे उच्चारणे 'मुहुः' इत्यत्र बललाभाय मूर्द्धन्यस्य षध्वनेः लोपः संजातः तथा विसर्गध्वनिः एव स्थितः। पुत्त्रहती, पुत्त्रजग्धी,[८] इत्यत्र आक्रोशेऽर्थे उच्चारणे बललाभाय तकारस्य द्वित्वविधानं ध्वनिपरिवर्तनं संसूचयति 'ऋकारऌकारयोः सवर्णविधिः' इति वार्तिकानुशीलनेन ज्ञायते यत् पाणिनेः समये होतॢकारः इत्येव प्रयुज्यमानः आसीत्। कालान्तरे होतृ + ऋकारः = होतृकारः इत्यवलोक्य होतॢकारः इत्यनिष्टप्रयोगसंभावनया कात्यायनेन उक्तवार्तिकस्य प्रणयनं कृतम्। इह होतृ + ऋकारः=होतृकारः इति सादृश्यात् होतृ + ऌकारः इत्यत्रापि होतृकारः इति प्रयोगः सादृश्येन ध्वनिपरिवर्तनस्य सूचकः। 'वा नामधातूनाम्'[९] इति वार्तिकेन ज्ञायते यत् नामघटितधातूनां तृतीयस्य वर्णस्य द्वित्वं भवति, उद्योतकारमते तृतीयस्य वा भवति द्वितीयस्य वेत्यर्थः–अश्वीयियिषति, अशिश्वीयिषति। 'ईर्ष्यतेस्तृतीयस्य द्वे भवतः'[१०] इति वार्तिकानुशीलनेन ज्ञायते यत् ईर्ष्यति इत्यत्र द्वितीयस्य

---

१. अभितः परितः समयानिकषाहाप्रतियोगेऽपि वा० २।३।२
२. उत्पातेन ज्ञापिते च २।३।१३
३. प्रकृत्यादिभ्यः उपसंख्यानम् २।३।१८
४. क्तस्येन्विषये कर्मण्युपसंख्यानम् २।३।३६
५. महा०, वा०, ८।३।४१
६. अष्टा०, ८।३।३७
७. अष्टा०, ८।३।४१
८ वा हतजग्धपरे महा०, वा०, ८।४।४८
९. महा०, वा०, ६।१।३
१०. महा०, वा०, ६।१।२

द्वित्वं भवति, किन्तु कात्यायनेन इदं नात्र स्पष्टीकृतं द्वितीयस्य वर्णस्य द्वित्वं भवेत् द्वितीयस्य व्यंजनस्य वा-द्वितीयवर्णस्य द्वित्वे ईर्ष्यिषिषति इति रूपम्। द्वितीयव्यञ्जनस्य द्वित्वे सति ईर्ष्यियिषति इति रूपं जायते।

एभिः विवेचनैः ज्ञायते यत् कात्यायनकालिकभाषायां विभिन्नदृष्ट्या परिवर्तनानि सञ्जातानि येषां साधुत्वप्रतिपादनार्थं कात्यायनेन वार्तिकानां प्रणयनं व्यधायि। स्थालीपुलाकन्यायेन एतानि परिवर्तनानि यदा मया ध्यातानि तदा मया इदं स्थिरीकृतं यत् कात्यायनवार्तिकानां यदि भाषाशास्त्रीयदृष्ट्या अध्ययनं विधीयते तदा शोधस्य क्षेत्रे कतिपयनवीनोद्भावनानाम् अन्वेषणं भविष्यति तथा च भाषाशास्त्रस्य अध्येतॄणां कृते इदमेकं महनीयं च वस्तु भविष्यति यत् केन प्रकारेण तस्मिन् समये भाषायां विभिन्नानि परिवर्तनानि समागतानि तदाधृत्य भाषायाः किम्विधा-प्रवृत्तिः आसीत् इत्येतत् सर्वं सौकर्येण ज्ञातव्यं भवेत्। संस्कृतव्याकरणस्य क्षेत्रे मुनित्रयस्य यत् महत्त्वं तिष्ठति तत् न कस्याप्यन्यस्य वर्तते इति तु सर्वथा निर्णीतं वस्तु। भगवतः पाणिनेः अष्टाध्याय्याः महत्त्वं न केवलं भारतीयविद्वद्भिः एव सुविचारितं प्रत्युत पाश्चात्यैः आलोचकैः अपि भूयशः एतस्याः माहात्म्यं स्वीकृतम्।

पाणिनेरनन्तरं कतिपयशताब्द्याः अन्तरालं पश्चात् आचार्यः कात्यायनः व्याकरणक्षितिजस्य जाज्वल्यमाननक्षत्ररूपेण प्रोद्भासितः यस्य वार्तिकानि पाणिनितः अवशिष्टानां तथा च पाणिनेरनन्तरं भाषायां समागतानां शब्दानां सिध्यर्थं विभिन्ननियमान् प्रस्तुवन्ति। खेदस्यायं विषयः यत् स्वतन्त्ररूपेण वार्तिकविषये कोऽपि ग्रन्थः इदानीं न तिष्ठति। कालस्य सुदीर्घे अन्तराले प्रायः विनष्टः वार्तिकग्रन्थविशेषः। यानि पुस्तकानि स्वतन्त्रवार्तिकरूपेणोपलभ्यन्ते तेषां प्रामाणिकत्वमालोचनानन्तरं समाप्तिं याति। कात्यायनवार्तिकानां परिज्ञानाय केवलं भगवतः पतञ्जलेः महाभाष्यमेव तिष्ठति। तत्र कानि वार्तिकानि कात्यायनकृतानि वर्तन्ते, कानि अपरेषामाचार्याणां तिष्ठन्ति, कानि वा स्वयं भाष्यकृतस्तिष्ठन्ति इत्यस्य निस्सन्दिग्धं विवेचनम् अतीव कठिनम्। नूनं पतञ्जलेः प्रतिभायाः अयं विलक्षणः चमत्कारः येन वार्तिकानां परिरक्षणं जातं किन्तु तस्य महाभाष्यार्णवतः एतेषां पृथक्करणस्य प्रयासः चिरकालपर्यन्तं केनापि विदुषा न कृतः। सर्वप्रथमं कीलहॉर्नमहाशयेन "Katyayana and Patanjali" नामके स्वकीये ग्रन्थे विषयेऽस्मिन् गवेषणा कृता तदनन्तरमन्यैः पाश्चात्यैः विद्वद्भिः विषयेऽस्मिन् विचिकित्सितम्। भारतीयानां या व्याकरणाध्ययनस्य प्राचीना परिपाटी आसीत्, तस्यां विषयस्यास्य परिशीलनविषये विचिकित्सायाः अवकाश एव नासीत्, केनापि प्राचीनविदुषा

एतत्सम्बन्धे न ध्यातम् । काशिकाकौमुदीप्रभृतिषु टीकाग्रन्थेषु तु विषयोऽयम् अत्यधिकं समस्याच्छन्नः सञ्जातः यतः तेषु ग्रन्थेषु बहुषु स्थलेषु स्वमतिभिरपि तत्प्रणेतृभिः वार्तिकानां नवीनं संस्करणं विहितम् तथापि एतद्विषये प्रदीपकृता कैयटाचार्येण उद्योतकृता नागेशेन बहुशः चिन्तितम्, स्थाने-स्थाने उक्तं प्रदीपे उद्योते च 'इदं वार्तिकम्' इति । तथापि सर्वथा तत्रापि एतस्य सामग्र्येण निर्णयः न तिष्ठति, यस्य कारणं वर्तते यत् प्रदीपकारोद्योतकारयोः अपि पुरतः इयं समस्या प्रायः नासीत् यत् कानि वार्तिकानि कात्यायनीयानि, कानि वा अन्यदीयानि, एतस्य विषयस्य विवेचनम् आवश्यकम् । अतः समस्या इयं जटिला एव सञ्जाता । विषयेऽस्मिन् संकेतरूपेण बलदेवोपाध्यायमहोदयेन चर्चितम् । तदनन्तरं डॉ० रामसुरेशत्रिपाठिमहोदयः 'महाभाष्य में वार्तिकों के स्वरूप पर विचार' नामके पुस्तके वार्तिकानां प्रत्यभिज्ञानाय विभिन्नसंकेतानामुपस्थापनं कृतवान् । डॉ० वेदपतिमिश्रेण 'व्याकरणवार्तिकः एक समीक्षात्मक अध्ययन' इति ग्रन्थे वार्तिकानां विषये भृशमनुशीलनं कृतम् । 'काशिका का समालोचनात्मक अध्ययन' नामके स्वकीये पुस्तके काशिकास्थवार्तिकानां विचारक्रमे डॉ० रघुवीरविद्यालंकारः वार्तिकनिर्णयविषये कतिपयविचारान् प्रस्तुतीकृतवान् । एभिः महाशयैः वार्तिकानां क्वाचित्कं भाषाशास्त्रीयं महत्त्वमपि संकेतितम् । बेलवल्कर, श्री के० कृष्णमाधवशर्मप्रभृतयः विद्वांसः अपि विषयेऽस्मिन् विचारितवन्तः किन्तु केनापि विदुषा सामग्र्येण वार्तिकानामेषामध्ययनं न कृतम् इति कथनमतात्त्विकं न भविष्यति । नैकान्तं विद्वद्भिरेभिः सामग्र्येण वार्तिकानामध्ययनमेव न कृतं प्रत्युत वार्तिकनिर्णयविषये तु एषां महोदयानां विवेचनान्यपि नोपयुक्तानि । यथा च युधिष्ठिरमीमांसकमहाशयेन रामसुरेशत्रिपाठिमहानुभावेन च यदुक्तम् अत्यल्पमिदमुच्यते इत्यनेन प्रारब्धं सर्वं वार्तिकं सौनागानां तिष्ठति इति तु सर्वथा अनुचितमेव । सौनागानां यत्र वार्तिकानि तिष्ठन्ति तत्र पतञ्जलिना स्पष्टमेव तेषां नामनिर्देशः कृतः । एवमेव श्रीत्रिपाठिमहोदयः वक्तव्यवार्तिकयोः भेदाभेदमूलकम् अनावश्यकविवादं पर्युपस्थापितवान् । श्रीवेदपतिमिश्रेण श्रीरघुवीरविद्यालंकारेण च अत उत्तरं पठति, कश्चात्र विशेषः इति प्रतीकानन्तरं समागतानां सर्वेषां वार्तिकानां यत् कात्यायनप्रणीतत्वं स्वीकृतं तदपि नोपयुक्तम् । कीलहार्नमहाशयेनापि वार्तिकनिर्णयाय प्रदर्शिताः उपायाः प्रथमप्रयासरूपेण तु स्तुत्याः किन्तु वास्तविकरूपेण कात्यायनवार्तिकपरिज्ञानाय न क्षमाः । अतः एतेषामध्ययनेभ्यः निष्कर्षेभ्यश्च उपयोगिसाहाय्यमादाय मया वार्तिकनिर्णयस्य उचितलक्षणान्वेषणं ग्रन्थेऽस्मिन् कृतम् । अथ च भाषावैज्ञानिकदृष्ट्या वार्तिकानामध्ययनमपि विहितम् । यदि कात्यायनः नाभविष्यत् तदा पाणिनेरवशिष्टानां पाणिनेः पश्चात् समागतानां शब्दानां च निष्पत्त्यर्थं किमपि साधनं नाभविष्यत् तथा च यदि एतानि वार्तिकानि नाभविष्यन् तदा पतञ्जलेः सूक्ष्मेक्षिकायाः परिचयात्मकं महाभाष्यमेव नाभविष्यत् ।

खेदस्यायं विषयः यत् एवं प्रभावपूर्णः कात्यायनः विदुषां कृते उपेक्षणीय एव स्थितः। विदुषामेकपक्षस्य एवं विचारणया यत् कात्यायनः पाणिनेः तीव्रालोचकः, कट्वालोचकः वासीत् तथा च तस्य वार्तिकानि पतञ्जलिना भृशं खण्डितानि तेषां खण्डनाय वा महाभाष्यं प्रणीतम्, कात्यायनः सहजरूपेण उपेक्षायाः पात्रभूतः समभवत्। चिरकालपर्यन्तं दुराग्रहकारणात् विद्वद्भिः कात्यायनस्य वास्तविकमूल्य-विषये न निदिध्यातम् इति कथनं कथमपि अतिशयोक्तिमूलकं न भविष्यति। वस्तुतः पाणिनेः सूत्राणामुपरि कात्यायनेन वार्तिकानां यत् प्रणयनं कृतं तस्य कारणानि तान्येव आसन् यानि पतञ्जलेः महाभाष्यलेखनस्य। पाणिनिशास्त्रे दोषोद्भावनं वार्तिकलेखनस्य न कारणम् किन्तु पाणिनेः सूत्राणां संपूरणाय, सामयिकभाषासन्दर्भे तेषां संशोधनाय च यः विधिः कात्यायनेन अनुपालितः स विधिः पतञ्जलेः अप्रतिमप्रतिभातः तस्य नवनवोन्मेषशालिन्याः प्रज्ञायाः प्रखरतातश्च आच्छन्नः सञ्जातः। कात्यायनसम्पादितः आलोचनायाः विधिः यावत् सुष्ठुरूपेण न परीक्ष्यते तावत् कात्यायनस्य वैदुष्यस्य वास्तविकं मूल्यं विद्वद्भिः न ज्ञातुं शक्यते। यदि पतञ्जलेः महाभाष्यतः पृथक्रूपेण एषां वार्तिकानामध्ययनं विधीयते तदैव एषां विशिष्टतायाः अनिवार्यतायाः वा परिज्ञानं भवितुं शक्नोति तथा च एकमपि वार्तिकमधिकम् अनावश्यकं वा भवितुं न शक्ष्यति। यथा सूत्रकारविषये पतञ्जलिना उक्तं यत् 'एकेनापि वर्णेन नानर्थकेन भवितव्यम् किं पुनः इयता सूत्रेण' तथैवास्माभिरपि दृढं प्रतिपाद्यते यत् विशिष्टानुशीलनानन्तरं नैकेनापि वार्तिकेन अनर्थकेन भवितव्यम्।

प्राचीनसंस्कृतविद्यालये स्वकीयछात्रजीवनमारभमाणेन मया व्याकरणशास्त्रं बहुशः पठितम् किन्तु कालान्तरे एम० ए० कक्षानन्तरं साहित्यविषये पी-एच० डी० उपाधिः मया प्राप्तः, किन्तु हृदये सर्वदैव महती इच्छासीत् यत् व्याकरणशास्त्रे किमपि शोधकार्यं विधेयम्। अतः डी० लिट् उपाध्यर्थं 'कात्यायनवार्तिकमाश्रित्य-संस्कृतस्य भाषाशास्त्रीयम् अध्ययनम्' मया कृतम्। प्रस्तुतोऽयं ग्रन्थः अस्यैवाध्ययनस्य प्रतिफलरूपः। तस्मिन्नेव शोधकार्ये किञ्चिदपेक्षितं परिवर्तनं विधाय 'कात्याय-नवार्तिकानां भाषाशास्त्रीयमध्ययनम्' इति ग्रन्थोऽयं प्रणीतः। इयं दृष्टिः समायाता यत् पाणिनिविषये पतञ्जलिविषये च विद्वद्भिः बहुशः लिखितम्, आलोचितं वा, किन्तु कात्यायनस्य विषये यदभीष्टं यदावश्यकं वा तत् केनापि न लिखितम्। यद्यपि वार्तिकानां व्याकरणिकव्युत्पत्तिविषये प्राचीनैः टीकाकारैः बहुशः लिखितं किन्तु तेषां विवेचनेन वार्तिकानां स्वरूपस्य पूर्णतः ज्ञानं न लभ्यते। विशेषतः वार्तिकानां भाषाशास्त्रीयदृष्ट्या अध्ययनं केनापि न कृतम् अतः एतस्मिन् विषये शोधपूर्णग्रन्थप्रणयनस्य निर्णयः कृतः। प्रबन्धप्रणयनेऽस्मिन् मम पुरतः

विभिन्नाः समस्याः तिष्ठन्ति—कात्यायनस्य वार्तिकानि तात्त्विकरूपेण कानि सन्ति, विषयेऽस्मिन् अन्यैः यल्लिखितं तत् साधु वर्तते अथवा नहि, यदि औचित्यं तत्र न तिष्ठति तदा किं भाव्यम्, विषयेऽस्मिन् बहवः विद्वांसः मया पृष्टाः, कामेश्वर-सिंहदरभंगासंस्कृतविश्वविद्यालये ख्यातिलब्धाः कतिपये विद्वांसः वर्तन्ते तेषां पुरतः इयं समस्या समुपस्थापिता, किन्तु यथोचितरूपेण एतस्याः समस्यायाः समाधानं न सञ्जातम्, अतः एतस्य विषये गम्भीराध्ययनानन्तरमेव कोऽपि निष्कर्षः उपस्थाप्येत इति मत्वा कार्यमिदं स्वीकृतम्, तथा च वार्तिकानामेषां वास्तविकं महत्त्वम् एतेषां व्याकरणवैशिष्ट्यदृष्ट्या भाषा-शास्त्रीयाध्ययनधिया चैव तिष्ठति इति वार्तिकपरि-शीलनेन ज्ञायते। एषां रूपपरिवर्तनदृष्ट्या, ध्वनिपरिवर्तनदृष्ट्या अर्थपरिवर्तनधिया, वाक्यपरिवर्तनबुद्धया च अध्ययनं यदि विधीयेत तदैव एतेषां वास्तविकं मूल्यं परिज्ञास्यते। पाणिनेरनन्तरकालिकायाः भाषायाः विविधप्रवृत्त्याः ज्ञानाय एतस्याः समस्यायाः समाधानमनिवार्यमेव तिष्ठति। अतः एतेषां तद्दृष्ट्याध्ययनं कार्यम्। अस्मिन्नेव क्रमे इदमपि निदिध्यातं यत् यावत् कस्यापि वार्तिकस्य तात्त्विकार्थस्य परिज्ञानं नोपस्थाप्यते तावत् भाषाशास्त्रीयमध्ययनं दुष्करमेव भविष्यति अतः वार्तिकानां भाषाशास्त्रीयमहत्त्वानुशीलनसन्दर्भे एतेषामर्थदृष्ट्या प्रक्रियादृष्ट्या च विवेचनमपि विधास्यते। वार्तिकानां महती संख्या वरीवर्ति अतः प्रत्येकवार्तिकस्य पृथक्रूपेण परिशीलनन्तु अतीव कठिनम् अधिकाधिकश्रमसाध्यं समयसाध्यञ्च इति मत्वा यानि वार्तिकानि पाणिनेरनन्तरकालिकशब्दानां निष्पत्तिं प्रदर्शयन्ति तथा यानि भाष्यप्रत्याख्यातानि वर्तन्ते तथा यानि च भाष्यकारेण अनुचितरूपेण प्रत्याख्यातानि वर्तन्ते, तान्येव अध्ययनस्य विषयरूपेण इह स्वीकृतानि तथा च सर्वेषामेषां भाषा-शास्त्रीयविवेचनमपि अतीवकठिनम्, अतः कीदृशी भाषाशास्त्रीया तात्कालिकी प्रवृत्तिः आसीत्, एतस्य परिज्ञानाय यानि वार्तिकानि अधिकं मुखराणि तिष्ठन्ति तेषामेव परिशीलनमत्र विहितं तिष्ठति।

विषयस्य सुष्ठुरूपेण सौकर्येण च परिशीलनाय सप्तोन्मेषेषु प्रबन्धोऽयं विभक्तो विद्यते। भूमिकात्मके प्रथमोन्मेषे विषयौचित्यादिनिरूपणानन्तरं कात्यायनस्य देशकालसम्बन्धिसंक्षिप्तः परिचयः सम्प्रस्तुतः, वार्तिकसूत्रभाष्यादिकस्य किं लक्षणं, किं स्वरूपमिति च प्रतिपादितम्, एवं च वार्तिकस्य किं प्रयोजनं तिष्ठति तथा मुनित्रयस्य कः पारस्परिकः सम्बन्धः तिष्ठति इति विवेचितं तिष्ठति। द्वितीयोन्मेषे कात्याय-नवार्तिकानां निर्णयविषयात्मकं विवेचनं वरीवर्ति—'महाभाष्ये कात्यायनवार्तिक-निर्णयः, तृतीयोन्मेषे—'रूपपरिवर्तनदृष्ट्या कात्यायनवार्तिकैः निष्पन्नानां शब्दानां भाषाशास्त्रीयं विवेचनं', चतुर्थोन्मेषे 'ध्वनिपरिवर्तनधिया प्रकृतस्य विश्लेषणम्' 'पञ्चमोन्मेषे 'अर्थपरिवर्तनदिशा प्रकृतस्य अनुशीलनम्, षष्ठोन्मेषे 'वाक्यविचारधिया

प्रकृतस्य परिशीलनम्,' सप्तमोन्मेषे ग्रन्थे यत्र तत्र विन्यस्तसूत्राणामेकत्र निष्कर्षरूपा उपसंहृतिः प्रस्तुता वर्तते, तथा परिशिष्टे उपादेयस्रोतसां चर्चा तिष्ठति, येषां स्रोतविषयाणां चयनं विहितं तदपि किञ्चित्करमत्र प्रतिपाद्यते, सर्वप्रथमन्तु पाणिनेः अप्रतिमप्रतिभायाः निदर्शनरूपा या अष्टाध्यायी वर्तते, तामाश्रित्य प्रवृत्तानां शास्त्रप्रवृत्तिसूचकानां शास्त्रप्रवृत्तिविश्लेषकाणां वा कात्यायनवार्तिकानां महाभाष्यार्णवतः चयनं विधाय अध्ययनं कृतम्, तत्क्रम एव विभिन्नपाणिनीयसूत्राणामपि अध्ययनमपरिहार्यमेव। पतञ्जलेः महाभाष्यं विना किमपि कार्यं न संभविष्यति अतः तस्य विशदमध्ययनं ग्रन्थस्यास्य कृते सर्वथा उपादेयम्, अष्टाध्यायीपद्धत्या प्रयोगपुरस्सरं व्याकरणविषयसमुपस्थापनस्य प्रथमप्रयासरूपा काशिकावृत्तिः परिशीलिता, शब्दकौस्तुभम् समालोचितम्, प्रक्रियापरिपाट्याः प्रथमः ग्रन्थः **प्रक्रियाकौमुदी**, तदनन्तरं **सिद्धान्तकौमुदी** तथा प्रक्रियात्मकग्रन्थविशेषस्य **सिद्धान्तकौमुदी** इत्यस्य विश्लेषणस्वरूपा **प्रौढमनोरमा** तथा एवं च तद्विवेचकं **शब्दरत्नं**, **सिद्धान्तकौमुद्याः तत्त्वबोधिनीबालमनोरमाप्रभृतयः** टीकाः अपि बहुशः विचारिताः। व्याकरणदर्शनस्य **महाभाष्यानन्तरं** प्रथममौलिकविवेचकं **वाक्यपदीयम्**, **वैयाकरणभूषणसारः**, **परमलघुमञ्जूषाप्रभृतयः** शब्ददर्शनोपपादकाः ग्रन्थाः अपि ध्याताः। तथा च गोल्स्टूकरमहाशयस्य 'Panini' नामकः ग्रन्थः कीलहॉर्नमहाशयस्य 'Katyayana and Patanjali'—नामकं पुस्तकं बर्नेलमहाशयस्य 'On Aindra school of sanskrit Grammarians' बेलवेल्करमहाभागस्य Systems of sanskrit Grammar'; सुब्रह्मण्याशास्त्रिमहोदयस्य 'Lectures on Patanjali Mahabhasya' के० एम० शर्ममहाभागस्य 'Panini, Katyayana and Patanjali'—प्रभृतयः आंग्लभाषायां लिखिताः व्याकरणशोधग्रन्थाः युधिष्ठरमीमांसकस्य **संस्कृतव्याकरणशास्त्र का इतिहास**, वासुदेवशरणाग्रवालस्य **पाणिनिकालीनभारतवर्ष**, **'पाणिनिपरिचय'**, पण्डितबलदेवोपाध्यायस्य **'संस्कृत शास्त्रों का इतिहास,'** डॉ० प्रभुदयालवग्निहोत्रिमहोदयस्य **'पतञ्जलिकालीन भारतवर्ष,'** डॉ० रामसुरेशत्रिपाठिमहोदयस्य **'महाभाष्य में वार्तिकों के स्वरूप पर विचार,'** वेदपतिमिश्रस्य **व्याकरणवार्तिक एक समीक्षात्मक अध्ययन**, डॉ० रघुवीर विद्यालंकारस्य **काशिका का समालोचनात्मक अध्ययन**, डॉ० महेशदत्तशर्ममहाभागस्य **काशिका-कौमुद्योस्तुलनात्मकमध्ययनम्**—इत्यादिग्रन्थाः विभिन्नाः पत्र-पत्रिकाश्च आलोचिताः। तथा च प्रातिशाख्यनिरुक्तपाणिनीयशिक्षाप्रभृतयः प्राचीनाः संस्कृतभाषाशास्त्रग्रन्थाः, आधुनिकभाषाशास्त्रस्यापि संस्कृततः सम्बद्धाः विभिन्नाः ग्रन्थाः—ब्लूमफील्डमहाशयस्य—Language; ब्रीलमहोदयस्य Milanges de mythologie et de linguistique, Essai de semantique ह्विटनीमहाशयस्य Language and the study of Language, जो० वान्द्रियँज्महोदयस्य

Language, डॉ॰ पी॰ डी॰ गुणेमहाभागस्य A comparative philology, तारापोरेवालामहाशयस्य Elements of the science of language, सिद्धेश्वरवर्ममहाभागस्य Critical studies in the phonetic observations of Indian Grammarians एवं च हिन्दीभाषायां लिखिताः विभिन्नभाषाशास्त्रीयग्रन्थाश्च प्रस्तुताध्ययनस्य साहाय्यत्वेनोपादेयाः सञ्जाताः। एवञ्च बोट्लिकरौथमहोदयाभ्यां विरचितः शब्दकोषः भूयशः विवेचितः, यतः तत्र इदं सुस्पष्टं तिष्ठति यत् के शब्दाः संस्कृतसाहित्ये क्व कस्मिन्नर्थे वा प्रयुक्ताः वर्तन्ते। प्रायशः एकादशशताब्दीपर्यन्तं संस्कृतसाहित्ये समागतशब्दानामर्थादिकविवरणं तत्र तिष्ठति। मोनियरविलियम्स, बी॰ एस॰ आप्टे-प्रभृतीनां शब्दकोषाः अपि सम्यगवलोकिताः। ग्रन्थान्ते सहायकपुस्तकानुक्रमणिका तथा समुचिता देशनापि निबद्धा।

विषयस्यास्य परिशीलनेन अस्माभिरयं निष्कर्षः समुपस्थापितः, यत् पाणिनेरनन्तरं संस्कृतभाषायां—या तदानीन्तनकाले जनभाषा आसीत्—विभिन्नानि परिवर्तनानि परिवर्धनानि च समागतानि येषां परिशीलनार्थं कात्यायनवार्तिकानां स्वतन्त्ररूपेण अध्ययनमावश्यकमस्ति तथा इमानि परिवर्तनानि केन प्रकारेण सञ्जातानि, भाषाविज्ञानस्य काः विभिन्नाः प्रक्रियाः आसन् यासां कारणात् भाषायाम् एवंविधानि परिवर्तनानि जातानि। व्याकरणं भाषायाः शुद्धिविषये अशुद्धिविषये च विचारयति, यादृशी भाषा तिष्ठति तस्याः ज्ञानं व्याकरणं कारयति। व्याकरणम् एवंविधकलारूपं यस्य लक्ष्यं वाग्योगस्य इष्टप्रयोगस्य वा ज्ञानम्। इदमेव लक्ष्यमभिमुखीकृत्य व्याकरणं भाषायाः अनुशीलनं करोति, परन्तु भाषाविज्ञानं भाषायाः एव अध्ययनं विदधाति। या भाषा भाषाशास्त्रस्याध्ययनविषयरूपेण तिष्ठति, सा कथम् एवंविधा वर्तते, वर्तमानस्वरूपे कथं स्थिता तिष्ठति, भाषायां तद्रूपं कस्माद्धेतोः समागतम् इत्यादिप्रश्नाः भाषाशास्त्रीयैः विचार्यन्ते। भाषायाः वर्तमानं रूपं किम्बिधं वर्तते इति व्याकरणं प्रतिपादयति, तस्याः का भावः वर्तते इति साहित्यं शिक्षयति किन्तु तस्याः भावसाधनस्य मीमांसा तु भाषाशास्त्रेण प्रस्तूयते। भाषाशास्त्रं तु भाषायाः विकासस्य विभिन्नक्रमिकावस्थां विभिन्नविकाससरणिं चान्वेषयति तथा मनुष्यस्य भाषया सह किंरूपकः सम्बन्धः तदपि प्रस्तौति। अतः भाषाशास्त्रीयदृष्ट्या एतेषां वार्तिकानां परिशीलनं विधाय संस्कृतव्याकरणस्य परिरक्षणे, संस्कृतभाषायाः विभिन्नविकाससरणिसंकेतोपस्थापने, विभिन्नांविकाराण विभिन्नपरिवर्तनसम्बन्धिनियमानां च प्रस्तुतीकरणे इमानि वार्तिकानि केन प्रकारेण सहायकानि भवन्ति, इति निष्कर्षरूपेण ग्रन्थेऽस्मिन् ज्ञायते।

कात्यायनस्य देशकालसम्बन्धिपरिचयः

यथा प्रायशः अन्येषां संस्कृतविदुषां जीवनस्येतिहासः अन्धकाराच्छन्नः तथैव कात्यायनस्यापि तिष्ठति। कात्यायनस्य न कोऽपि स्वकीयः वार्तिकग्रन्थः इदानीमुपलभ्यते। यथा वृत्तौ साधु वार्तिकमिति वार्तिकलक्षणं तिष्ठति, तेन ज्ञायते यत् वृत्तौ पाणिनीयशास्त्रे साधु कात्यायनीयं वार्तिकं तिष्ठति। कस्यापि शास्त्रस्य विश्लेषणाय यदा अपरं शास्त्रं समायाति तदाऽतस्य प्रणेतुः पुरतः विभिन्नाः समस्याः समायान्ति। कात्यायनः जनजीवने प्रतिष्ठितस्य पाणिनीयशास्त्रस्य विषये लेखमारब्धवान् तदा धार्मिकस्वरूपं प्राप्ते पाणिनीयशास्त्रविषये किमपि आलोचनात्मकं लेखनमतीव दुष्करमासीत्। परिणामतः कात्यायनस्य बहवः विरोधिनः संजाताः, यैः कात्यायनः सन्देहमूलकदृष्ट्या अवलोकितः। अतः तस्य यः पृथक्ग्रन्थः आसीत् स प्रायः कालखण्डस्य सुदीर्घे अन्तराले विलुप्तः संजातः। तस्योद्धारकार्यं कृतं भगवता पतञ्जलिना स्वकीये महाभाष्ये। वस्तुतः यथा कात्यायनवार्तिकं पाणिनीयशास्त्रस्य व्याख्यानरूपमासीत्, पाणिनितः परित्यक्तानां नियमानां तदनन्तरं समागतनवीनशब्दार्थादीनां व्युत्पत्यर्थं प्रणीतानां नियमानां वा विश्लेषकरूपमासीत् वर्तते वा तथैव पतञ्जलेः महाभाष्यं कात्यायनवार्तिकानां व्याख्यानरूपमेव तथा च कात्यायनकालिकसंस्कृतभाषानन्तरं समागतभाषापरिवर्तनानामपि यत्र-तत्र निदर्शकं शास्त्रम्। अतः कात्यायनविषये यत्किञ्चित् ज्ञानं लभ्यतेऽस्माभिः तत् सर्वप्रथमं महाभाष्यमाश्रित्यैव तिष्ठति।

पतञ्जलिना कात्यायन[१]-कात्य-इतिनामद्वयस्य चर्चा वार्तिककारविषये कृता। 'आतोऽनुपसर्गे कः[२]' इति सूत्रस्थस्य 'के ह्रि संप्रसारणप्रसंग' इति वार्तिकस्य विश्लेषणक्रमे समाधानभाष्यत्वेन निर्दिशति भगवान् पतञ्जलिः—'योनादिष्टादचः पूर्वस्तत् कार्यं स्थानिवत्त्वं हि। प्रोवाच भगवान् कात्यस्तेनासिद्धिर्यणस्तु ते। त्रिकाण्डशेषे—'मेधाजित् कात्यः कात्यायनश्च सः, पुनर्वसुर्वररुचिः'। संस्कृतसाहित्येतिहासे विभिन्नकात्यायनानां चर्चा दरीदृश्यते। अत्र अस्माकम् अभिमतं वार्तिककारकात्यायनतः तिष्ठति, तन्नामव्यक्तित्वसम्बन्धी विवादः अत्र नेष्टः। संक्षेपतः इदं कथयितुं शक्यते यत् वररुचिः वार्तिककारकात्यायनतः भिन्नः। यत्तु मेदिनीकृता 'कात्यायनो वररुचौ विशेषे च मुनेः पुमान्' इति प्रतिपादितं तत् कस्याप्यन्यस्य

---

१. स्मादिविधिः पुरान्ते यद्यविशेषेण किं कृतं भवति। न स्म पुराद्यतन इति ब्रुवता कात्यायनेनेह। महा०, लट्स्मे ३।२।११८।

२. महा० ३।२।३

कात्यायनवररुचेः कृते उक्तं भवेत्। यतः अस्माकं कात्यायनतः स नूनमेव भिन्नः इति बहूनां विदुषां मतम्।[1] अस्य कात्यायनस्य स्थानविषये विद्वांसः विचिकित्सन्ति। प्रियतद्धिताः दाक्षिणात्याः यथा लोके वेदे च प्रयोक्तव्ये 'यथा लौकिकवैदिकेषु प्रयुञ्जते,—इति महाभाष्यवचनमवलोक्य केचन विद्वांसः तं दाक्षिणात्यं स्वीकुर्वंते। अत्रेदमुच्यते—श्रीमीमांसकेन यथा लौकिकवैदिकेषु इत्यस्य यत् प्रथमं वार्तिकत्वं स्वीकृतं तन्न समीचीनम्। स महाशयः 'सिद्धे शब्दार्थसम्बन्धे' इत्येतस्य विषये कथयति यदिदं कात्यायनवार्तिकं तिष्ठत्येव नहि, किन्तु कथनमिदं नौचित्यं भजते। यतः उद्योतकारः नागेशः वार्तिकस्यास्य व्याख्यानक्रमेण कथयति—'अथ पाणिनिसूत्रव्याख्यानभूतं वार्तिकमवतारयति .... इतः पूर्वं तु सवार्तिकशास्त्रान्वाख्यानप्रयोजनविषयप्रदर्शनपरो भाष्यकारस्यैव ग्रन्थ इति बोध्यम्। एतेन ज्ञायते यत् इदं कात्यायनस्य प्रथमं वार्तिकम्। पण्डितबलदेवोपाध्यायोऽपि कात्यायनस्य प्रथमवार्तिकत्वेन इदं स्वीकरोति। वस्तुतः 'यथा लौकिकवैदिकेषु' वार्तिकम् इति आश्रित्य कात्यायनस्य दाक्षिणात्यत्वस्वीकारः नोपयुक्तः। तद्विषये केचन इमामपि आपत्तिम् उपस्थापयन्ति यदत्र यतः पतञ्जलिना आचार्यः, भगवान् इतिविशेषणादीनां प्रयोगः पूर्वं न कृतः अतः अत्र वाक्ये कात्यायनः नाभिलक्षितः। किन्तु यथा पूर्वपक्षविषये किमपि निश्चयेन कथयितुं न शक्यते तथैव अपरपक्षोऽपि आधारहीन एव। अपरं च 'यथालौकिकवैदिकेषु' इति कात्यायनवार्तिकमेव न तिष्ठति इत्यपि बहूनां मतम्, अतः उपरिचर्चितं मतमपि खण्डितं भवितुं शक्नोति। आर० जी० भण्डारकरमहोदयः एनं दाक्षिणात्यमेव मनुते।[2] गोल्डस्टूकरमहाशयः वेबरमहाशयस्याभिमतं समर्थयन् कात्यायनं प्राच्यदेशीयं स्वीकरोति।[3] अपरे तु मध्यदेशीयमपि स्वीकुर्वंते, तदाधारः वर्तते 'गहादिषु पृथ्वीमध्यस्य मध्यमभावः'[4] एषु विचारेषु तस्य दाक्षिणात्यस्वीकारः एव वरं, यतः बहवः विद्वांसः पक्षस्यास्य समर्थकाः अवलोक्यन्ते।

यत्तु कात्यायनस्य विषये राजशेखरस्य काव्यमीमांसायां चर्चा उपलभ्यते यत्—'श्रूयते च पाटलिपुत्रे शास्त्रकारपरीक्षा अत्रोपवर्षवर्षाविहपाणिनिपिंगलाविहव्याडिः। वररुचिपतञ्जली इह परीक्षिता ख्यातिमुपजग्मुः। ......'ततश्च तस्यैव वर्षोपाध्यायस्य प्रधानान्तेवासी कौशाम्बीवास्तव्यः सोमदत्तद्विजन्मात्मजन्मा वसुदत्ता-

१. व्याकरणशास्त्र का संक्षिप्त इतिहास, पृ० ९६
2. India Antiquary, Vol. 11. P–240.
3. Panini—His place in Sanskrit literature p. 205.
४. महा०, ४।२।१३८

गर्भजपुष्पदन्तगणावतारो भगवान् कात्य-कात्यायन-गोत्रनामा श्रुतिधरापराभिधेयवररुचिनामा मुनिः पाणिन्युपज्ञातसूत्रन्यूनतापूरणमिव वार्तिकरूपेण कृतवान्'—इत्यादिवचनैः कात्यायनस्य विषये परिचयः लभ्यते किन्तु ऐतिहासिकानुशीलनेन परिचयेष्वेषु तथ्यस्य अभावः भृशमवलोक्यते ।

कात्यायनस्य कालविषये इति तु निश्चितरूपेण कथयितुं शक्यते यत् पाणिनेरवान्तरकालीनः पतञ्जलेश्च पूर्ववर्ती आसीत् । 'पुष्यमित्रो यजते'[१] इह पुष्यमित्रं याजयामः[२], पुष्यमित्रसभा[३], अरुणद्यवनः साकेतम् अरुणद्यवनो मध्यमिकाम्[४] इत्यादिपंक्तिभिः ज्ञायते यत् पतञ्जलिः पुष्यमित्रस्य सभायामासीत् तथा मिनाण्डर-नामकयवनद्वारा साकेतस्य आक्रमणसमये सः पुष्यमित्रस्याश्रये आसीत् । अतः तस्य समयः ख्रिष्टाब्दतः १५० वर्षं प्राक् तिष्ठति । युधिष्ठिरमीमांसकमते तस्य समयः विक्रमतः प्रायः १२०० वर्षं प्राक् आसीत्, किन्तु अधिकांशविद्वांसः ईसातः १५० वर्षपूर्वम् अस्य समयं स्वीकुर्वते । तदनुसारं कात्यायनस्य समयः ३५० ई० पूर्वतः ५०० ई० पूर्वं यावत् तिष्ठति[५] । यास्कस्य अवान्तरकालीनस्य पाणिनेः समयस्य ६०० ई० पूर्वतः ७०० ई० पूर्वं यावत् स्वीकरणं बहूनां विदुषामभिमतम्[६] । प्राचीनाभारतीयपरम्परा तु एषां कालविषये इतोऽपि अतिपूर्वसमयं स्वीकरोति । बहवः विद्वांसः पाणिनिं वाल्मीकेरनन्तरकालिकं मत्वा महाभारतसमकालिकं तं मन्यन्ते । तद्दृष्ट्या तु कात्यायनस्यापि समयः उपरिचर्चितसमयतः अधिकं पूर्वकालिकः भविष्यति किन्तु तात्त्विकानुशीलनेन ३५० ई० पूर्वतः ५०० ई० पूर्वं

---

१. महा०, ३।१।२६
२. महा०, ३।२।१२३
३. महा०, १।१।६८
४. महा०, ३।२।१११
5. "In the present state of our knowledge we cannot therefore, unfortunately, arrive at the greater approximation than 5C0-350... ... —
B. C. Nearer to the Latter — ......".

—*Systems of Sans. Gramm.*, P. 24

6. Perhaps 700-600 B. C. would be as near an approximation to Panini's time as in our present state of knowledge .... or rather want of knowledge, we are likely to get.

—*Systems of Sans. Gramm.*, p. 12.

यावदेव कात्यायनसमयः स्वीकरणीयः इति अन्येषामाचार्याणामभिमतवदेव आरम्भकीनोऽपि निवेशः।

सूत्रवार्तिकभाष्यलक्षणं, वार्तिकप्रयोजनञ्च

सूत्रस्य लक्षणविषये महाभाष्यकृता पतञ्जलिना सर्वप्रथमम् उक्तं—'लक्ष्यलक्षणे व्याकरणम्'। लक्ष्यं च लक्षणं चैतत् समुदितं व्याकरणं भवति। किं पुनर्लक्ष्य लक्षणं च। शब्दो लक्ष्यं सूत्रं लक्षणम्। एतेन ज्ञायते यत् शब्दसिद्धिः लक्ष्यं वर्तते किन्तु शब्दसिद्धिसाधनस्वरूपं लक्षणं सूत्रं तिष्ठति। सूत्रस्य लक्षणसन्दर्भे काव्यमीमांसायां राजशेखरेणोक्तम्—

अल्पाक्षरमसन्दिग्धं सारवत् विश्वतो मुखम्।
अस्तोममनवद्यं च सूत्रं सूत्रविदो विदुः[1]॥

तात्पर्यमिदं यत् यैः स्वल्पैः वाक्यखण्डैः वाक्यैर्वा विस्तृतस्यार्थस्य उपस्थापनस्य महान् प्रयासः विधीयते, तानि सूत्राभिधेयेन समन्वितानि। सूत्राणां स्वरूपं विवृण्वन् पी० एस० सुब्रह्मण्याशास्त्री कथयति यत् सूत्राणि अल्पवाक्यानि, स्पष्टानि, द्व्यर्थरहितानि विस्तृतानि भवन्ति[2]। एवमेव शिष्टोक्तं सूत्रलक्षणमपि ग्राह्यमेव—

लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च।
सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः॥

सूत्रस्य द्वौ भेदौस्तः—सामान्यम्, विशेषश्च[3], सामान्यविशेषावेव उत्सर्गापवादौ, क्वचित् उत्सर्गः—कर्मण्यण् इत्यादिः विधीयते, क्वचित् अपवादः—आतोऽनुपसर्गेक इत्यादिः निर्दिश्यते, येन अल्पीयसा आयासेन शब्दानां महती प्रतिपत्तिः स्यात्; लक्षणप्रपंचयोस्तु मूलसूत्रेऽप्याश्रयणात् इहापि लक्षणप्रपंचाभ्यां प्रवृत्तिः इति भर्तृहरिकथनात् लक्षणप्रपंचाभ्यां सूत्रवत् वार्त्तिकानामुपपत्त्या इति कैयटोक्तेश्च[4] इदमेव ज्ञायते यत् सूत्रसदृशमेव वार्त्तिकेष्वपि लक्षणप्रपंचयोः सद्भावः तिष्ठति। सूत्राणि शास्त्रप्रवृत्त्याः वृत्त्याः वा साधनभूतानि तिष्ठन्ति किन्तु नहि सूत्रत एव

---

१. का० मी०, पृ० १

2. Sutras are short sentences, unambiguous, clear and comprehensive. Lectures on Patanjali's. Mahabhasya, p 2.

३. किंचित् सामान्यविशेषवल्लक्षणं प्रवर्त्यम्, येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन् ... ... महा०, प्र० आ०

४. महा०, प्र०

शब्दाः प्रतिपद्यन्ते, किं तर्हि व्याख्यानतश्च, इति भाष्यवचनेन इदं विस्पष्टं यत् शब्दसिध्यर्थं नैकान्तं सूत्रैः एव कार्यं सेत्स्यति प्रत्युत् व्याख्यानमपि अपेक्षितं भवति। एषां सूत्राणां व्याख्यानभूतानि वार्तिकानि; वृत्तेर्व्याख्यानं वार्तिकम्—वृत्तौ साधु वा वार्तिकम्[1]। हरदत्तानुसारं सूत्रार्थप्रधानो ग्रन्थो वृत्तिः भवति[2], राजशेखरानुसारं 'सूत्रार्थसकलसारविवरणं वृत्तिः[3]। तात्पर्यमिदं यत् वृत्तिः शास्त्रप्रवृत्तिः इत्यर्थं बोधयति तथा च शास्त्रप्रवृत्तौ यत् साधकम् उपयुक्तं वा तत् वार्तिकम्। सूत्रे गुरुलाघवस्य सर्वथा आदरः तिष्ठति यतः छन्दोवत् सूत्राणि भवन्ति किन्तु वार्तिके एतद्विषये पूर्णतः समादरः नावलोक्यते, तथा चोक्तं हरिणा—भाष्यसूत्रे गुरुलाघवस्यानाश्रितत्वात्[4] अत्र भाष्यसूत्रमित्यतः भर्तृहरेः तात्पर्यं वार्तिकमित्यतः[5] तिष्ठति। कैयटेनापि कथितं—व्याख्यानसूत्रेषु लाघवानादरात्। वार्तिकेष्वपि सूत्रत्वव्यवहारः वार्तिककारेष्वपि आचार्यत्वव्यवहारः, आचार्याः सूत्राणि कृत्वा न निवर्तयन्ति इति भाष्यवचनात्। सूत्राणामुपरि व्याख्यानग्रन्थानां सामान्यमभिधानं वार्तिकमिति। पराशरोपपुराणे वार्तिकस्वरूपमेवं विश्लेषितं तिष्ठति—'मुनयश्च मनुष्याश्च प्रसादादेवशूलिनः। सूत्रव्याख्यां प्रकुर्वन्ति वार्तिकानां स्वरूपतः॥' उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते। तं ग्रन्थ वार्तिकं प्राहुर्वार्तिकज्ञाः मनीषिणः[6]।

विष्णुधर्मोत्तरपुराणे—

प्रयोजनं संशयनिर्णयौ च व्याख्याविशेषो गुरुलाघवं च।
कृतव्युदासो कृतशासनं च सवार्तिको धर्मगुणोऽष्टकश्च[7]॥

तथा च प्रयोजनं, संशयः, निर्णयः, व्याख्याविशेषः, गुरुः, लाघवः; कृतव्युदासः, अकृतशासनं च इत्यष्टौ वार्तिकस्य धर्माः वर्तन्ते। पदमंजरीकृता हरदत्तेन एवं लक्षितं वार्तिकं—'यत् विस्मृतमदृष्टं वा सूत्रकारेण तत् स्फुटम्। वाक्यकारो ब्रवीत्येवं तेनादृष्टं च भाष्यकृत्।' सूत्रकारेणानुक्तं वार्तिककार आह। तदुक्तं च दूषयति एवं भाष्यकारोवार्तिककारेण[8]। राजशेखरेण चोक्तम्—

---

१. महा०, प्र०, ४।२।६०
२. का०, पद०, पृ० १
३. का० मी०, पृ० ११
४. भा० दी०, पृ० ४८
५. वार्तिकं भाष्यसूत्राणि, हर्षवर्द्धनस्य लिंगानुशासनटीकायाम्, कारिका–४४
६. पराशरोपपुराणः, अ० ७
७. विष्णु, ३।६
८. का०, पद०, पृ० ७ भाग—१

उक्तानुक्तदुरुक्तचिन्तावार्तिकं[१], हेमशब्दानुशासने हेमचन्द्रेणाभिहितम्— उक्तानुक्तदुरुक्तानां व्यक्तिकारी तु वार्तिकम्। उद्योतकारेण श्रीमता नागेशेन स्थलद्वये वार्तिकस्य लक्षणं प्रस्तुतम्—'उक्तानुक्तदुरुक्तचिन्ताकरत्वं हि वार्तिकत्वम्'[२]। तथा च 'सूत्रेऽनुक्तदुरुक्तचिन्ताकरत्वं वार्तिकत्वम्'[३]। विश्वेश्वरसूरिणा चायं विचारः प्रस्तुतः—

उक्तानुक्तदुरुक्तादिचिन्तायत्र प्रवर्तते।
तद् वार्तिकमिति प्राहुः वार्तिकज्ञा विपश्चितः[४]॥

शेषनारायणेन एवं विश्लेषितं वार्तिकं—'तत्र च वार्तिके वररुचिरुक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते। तं ग्रन्थं वार्तिकं प्राहुः वार्तिकज्ञा विपश्चितः तदपि पतञ्जलिराक्षेपसमाधानपूर्वकमिष्ट्यादिभिश्च परिचस्कार'[५]।

एषु सर्वेषु लक्षणेषु उक्तानुक्तदुरुक्तचिन्तनमेव वार्तिकत्वमिति लक्षणं सर्वथामुखरम्। वार्तिकानां लक्षणविषये नागेशस्य लक्षणं बहुचर्चितं बहुचिन्तितं च तिष्ठति। तस्योभयलक्षणस्यैकमेव तात्पर्यं—सूत्रे उक्तस्य, अनुक्तस्य अथवा दुरुक्तस्य अनुचितरूपेणोक्तस्य विषयस्य चिन्ताकारकं विश्लेषणकारकं वा वाक्यं वार्तिकमभिधीयते। यत्तु कैयटेनोक्तं वार्तिकं व्याख्यानसूत्रमिति तदपि समीचीनमेव। तत्रेदं तात्पर्यं यत् वार्तिकम् एवंविधं सूत्रात्मकं वाक्यं यत् पाणिनेः मूलभूतसूत्राणां व्याख्यानत्वेन तिष्ठति। व्याख्याने पूर्वं जनाः केवलं चर्चापदस्य समावेशं कुर्वन्ति स्म किन्तु पतञ्जलिः अस्मिन् शब्दे व्यापकतात्पर्ये उदाहरणं प्रत्युदाहरणं तथा वाक्याध्याहार इति त्रयाणां समावेशं प्रस्तौति। एकत्र पतञ्जलिः वार्तिकान्यभिलक्ष्य एवं कथयति यत् वार्तिकानि कदाचित् तु तेषां विषयाणां चर्चां विदधति येषां चर्चा सूत्रे न कृता तिष्ठति तथा कदाचित् तु उक्तस्य प्रत्याख्यानं कुर्वते—'इह किञ्चित् अक्रियमाणं चोद्यते। किञ्चित् च क्रियमाणं प्रत्याख्यायते सूत्रभेदः कृतो भवति'।[६] पतञ्जलिः प्रतिपादनं प्रत्याख्यानं चेति उभयं वार्तिकस्य अन्तरंगं स्वरूपं मनुते। कैयटेन उभयस्य मार्मिकं विश्लेषणं कृतं[७]—'न्यायव्युत्पादनार्थं च आचार्यः

१. का० मी०, पृ० ११
२. महा०, ३।७।३।५६
३. महा०, उ०, १।१।१
४. सूक्तिरत्नाकरस्य हस्तलेखः, पृ० २
५. सूक्तिरत्नाकरस्य हस्तलेखः, पृ० २
६. महा०, ३।१।१२
७. महा०, प्र०, ७।१।९६

किञ्चित् प्रत्याचष्टे । नहि अत्रैकः पन्थाः समाश्रीयते'। प्रतिपादनन्तु अल्पधियां दृष्ट्या विधीयते किन्तु प्रत्याख्यानं श्रोतॄणां पाठकानां वा प्रतिपत्तिदृष्ट्या क्रियते। भर्तृहरिणा निर्दिष्टं—'भाष्यसूत्रमिति नाम सर्वथा सार्थकं तिष्ठति। भाष्यस्य व्याख्यानार्थं गम्भीरार्थकं वाक्यं वार्तिकम् इति वस्तुतः वार्तिकस्य रूपस्य द्योतकमभिधानं विद्यते। यतः एषामेव वार्तिकानामर्थस्य व्याख्याननिमित्तमेवतु भाष्यकारस्य समग्रः प्रयासः तिष्ठति। यत्तु लक्षणप्रपञ्चयोः सूत्रसदृशमेव वार्तिकेऽभ्युपपत्तिरिति उक्तं तदपि सर्वथा समीचीनम्। सूत्रकारस्य शैली वर्तते यत् सः प्रथमं लक्षणं प्रस्तौति, तदनन्तरं तस्यैव नियमस्य विशेषप्रकाराणामुल्लेखं विदधाति। अष्टाध्याय्यां लक्षणप्रपञ्चयोरिदं पौर्वापर्यं नियमतः प्रस्तुतं तिष्ठति। वार्तिकेऽपि एवमेव तिष्ठति किन्तु नानेन क्रमेण, क्रमविपर्यासः तत्र तिष्ठति। दृष्ट्यानया वार्तिकं पाणिनिसूत्रस्वरूपतः अत्यन्तमेव सामीप्यं भजते। निष्कर्षरूपेण इदं कथयितुं शक्यते यत् वार्तिकानि सूत्रस्य व्याख्यानानि वर्तन्ते, वृत्तिग्रन्थाः अपि सूत्रस्य व्याख्यानरूपाः वर्तन्ते। पार्थक्यं केवलमुभयोः स्वरूपे तिष्ठति। कस्याः अपि व्याख्यायाः मुख्यं तात्पर्यं भवति—भावप्राकट्यमिति, असङ्गतीनां निराकरणम्, आक्षेपाणाम् समाधानं तथा त्रुटीनां संकेतप्रदानम्। वार्तिके इदं सर्वं विद्यमानं तिष्ठति। एकमपरमपि तथ्यं ध्यातव्यं, यत् वार्तिकानामुद्देश्यमासीत् पाणिनिव्याकरणस्य दार्शनिककोटौ प्रापणं येनेदं व्याकरणं केवलं शब्दानां रूपसिद्धेः साधनं न भूत्वा शब्दार्थयोः गम्भीरतत्त्वानामपि निरूपकत्वेन सिद्धं स्यात्। कात्यायनस्य 'सिद्धे शब्दार्थसम्बन्धे' इति प्रथमं वार्तिकं व्याकरणस्य मौलिकतथ्यस्य अवतारणां विदधाति। पाणिनीयसूत्राणां तथा विशेषरूपेण वार्तिकानामालोचनं प्रत्यालोचनं महाभाष्यस्य कार्यम्। भाष्यस्य स्वरूपं विवृण्वन् आह हरिः—

> कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना।
> सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने[१]॥

तच्च भाष्यं न केवलं व्याकरणस्य निबन्धनं यावत् सर्वेषां न्यायबीजानां बोद्धव्यमित्यत एव सर्वन्यायबीजहेतुत्वादेव महच्छब्देन विशेष्यं महाभाष्यमित्युच्यते लोके।

पदमञ्जरीकारेण भाष्यस्वरूपमेवं प्रतिपादितम्—

'आक्षेपसमाधानपरो ग्रन्थो भाष्यम्'[२]। यत्र आक्षेपसमाधानपुरस्सरं तथा चोदाहरणप्रत्युदाहरणपुरस्सरं कस्यापि विषयस्य व्याख्यानं तत् भाष्यं कथ्यते। राजशेखरेणापि

---

१. वाक्य०, २।४८५

२. का० पद०, पृ० १

इदमेवोररीकृतम्—'आक्षिप्य भाषणात् भाष्यमिति[१]' । भाष्यस्य सुप्रचलितं लक्षणं तिष्ठति—

> सूत्रस्थं पदमादाय वाक्यैः सूत्रानुसारिभिः ।
> स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः[२]।।

एवमेव महाभाष्यस्य एकस्यां टीकायामुल्लिखितं तिष्ठति—

> सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः ।
> स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः[३] ।।

महाभाष्यं मूलतः पाणिनीयव्याकरणस्यैव भाष्यं, यद्यपि तत्र अन्येषां वार्तिकानां विचाराणां च सामग्र्येण औचित्यपूर्णं महत्त्वं तिष्ठति। नागोजीभट्टेन भाष्यस्वरूपमेवं विवेचितं—'व्याख्यातृत्वेऽपि अस्य इष्ट्यादिकथनेन अन्वाख्यातृत्वाद् इतरभाष्यवैलक्षण्येन महत्त्वम्[४] ।

गोल्डस्टूकरमते कात्यायनः पाणिनेः नियमानाम् औचित्यं प्रदर्शयितुं वार्तिकानि न व्यरीरचत्, न वा तस्य नियमानामालोचनातः रक्षणं वा ऐच्छत् प्रत्युत् तस्य कार्यमासीत् पाणिनेः सूत्रेषु दोषोद्भावनम्[५] । तन्मते वार्तिकानां विशिष्टं लक्षणमिदमेव वर्तते यत् तानि सूत्रेण परित्यक्तानि अथवा अपूर्णतया अभिव्यक्तीकृतानि तत्त्वानि आलोचयन्ति[६] । मैक्समूलरमहाशयः कात्यायनं पाणिनेः सम्पादकं समालोचकं च मनुते । एतन्मते कात्यायनवार्तिकानि पाणिनेः अज्ञतायाः उद्भावकानि प्रदर्शकानि च वर्तन्ते[७] । कीलहार्नमहाशयमते महाभाष्यस्य प्रथमनवाह्निकानाम-

---

१. का० मी०, पृ० ११, पटना प्रकाशन

२. क्षितीशचन्द्रमंजूषा ४।६ पृ० २८७

३. महा०, दाधिमथछाया टीका, नवाह्निकम् पृ० २

४. महा० १।१।१

५. Katyayana did not mean to justify and to defend the rules of Panini, but to find fault with them. *Panini*, p. 132

६ The characteristic feature of a Varttika is criticism in regard to that which is omitted or imperfectly expressed in Sutra. *Panini*, p. 132

७. (क) Professor Maxmuller 'Ancient Sanskrit Literature', p. 243 & 353

(ख) व्याकरणशास्त्र का संक्षिप्त इतिहास, पृ० ३६ इत्यत्रापि विश्लेषितम् ।

ध्ययनेनेदं ज्ञायते यत् वार्तिकानि इदं विचारयन्ति यत् किं किमपि वस्तु सूत्रतः बहिर्भूतं तिष्ठति यस्य निबन्धनावश्यकता सूत्रे आसीत् ? अथवा सूत्रे एवंभूतः कोऽपि शब्दः वर्तते यः अनावश्यकः अथवा त्रुटिपूर्णः आलोचनायोग्यो वा[1]। स पुनः कथयति यत् वार्तिकप्रणयनस्य एतस्माद् व्यतिरिक्तं न किमपि प्रयोजनमासीत् यत् तानि पक्षपाततः पूर्वाग्रहतश्च विरहितानि भूत्वा पाणिनेः सूत्राणां विषये सम्भावितानां समुपस्थापितानां वा आलोचनानां विस्तृतविवेचनतः निराकरणं, सिद्धान्त विहीनालोचनातः तेषां परिरक्षणम् अथ च तेषां क्वापि शुद्धीकरणम्, अनपेक्षितस्वोपस्थापनम्, अपेक्षितवस्तुनः निबन्धनस्योपस्थापनं च अकुर्वन् यत्र सूत्राणां परिरक्षणम् औचित्यप्रदर्शनं च सम्भवमासीत्।[2] कात्यायनस्य वास्तविकं कार्यं तिष्ठति पाणिनिव्याकरणे उक्तानाम्, अनुक्तानां, दुरुक्तानां दुर्बोधानामनुचितानां वा अर्थानामनुध्यानम्। पतञ्जलिः न्यायपूर्वकं तानि वार्तिकानि तेनैव क्रमेणोपस्थापितवान् तथा तदानीन्तनकालपर्यन्तम् उपलब्धानां वार्तिकानां प्रकाशे पूर्णतां यावत् प्रापितवानस्ति। एवं विदधतः पतञ्जलेरपि प्रयासः वार्तिककृतः तुल्यमेव उक्तानुक्तदुरुक्तार्थचिन्तनं तत्पूर्णत्वं चासीत्। एवंविधं साधनमन्वेष्टव्यं भवेत्, यत् पाणिनीयदृष्टो पूर्णं कथयितुं शक्यते इति च कीलहार्नमहाशयस्य मतं वार्तिकप्रयोजनं विशिनष्टि। मुनित्रयस्य पारस्परिकः सम्बन्धोऽपि कात्यायनवार्तिकप्रयोजनविश्लेषणाय आवश्यकः। भगवतः पाणिनेः सूक्ष्मेक्षिकातः अवशिष्टा ये प्रयोगाः तथा च तदनन्तरं विस्तृतकालखण्डे परिवर्तनशीलाः विकृतिमापन्नाः नवीनाश्च शब्दाः कात्यायनस्य नवनवोन्मेषशालिन्या प्रतिभया साधुत्वमापन्नाः। भाषाशास्त्रीयावलोकनेन क्वापि एवं कथयितुं न शक्यते यदेवं विधाय कात्यायनः पाणिनेः तीव्रालोचकः द्वेषी वा आसीत्। 'उक्तानुक्तदुरुक्तचिन्ताकरत्वं वार्तिकत्वम्' इति लक्षणे दुरुक्तपदस्य वास्तविकतात्पर्यानवगतेः केचन विद्वांसः भ्रान्ताः भवन्ति तथा च प्रतिपादयन्ति यत् कात्यायनः पाणिनेः कटुवालोचकः। यत्तु हरदत्तेनोक्तं 'सूत्रकारेणानुक्तं वार्तिककार आह तदुक्तं

1. *Katyayana and Patanjali*, p. 43
2. **The object of the varttikas is then no other than this without bias or prejudice to discuss such objections as might be raised to the rules of Panini's Grammer and on the one hand to justify Panini by defending him against unfounded criticism and on the other hand to correct, reject and add to the rules laid down by him, where defence and justification were considered impossible.**

Katyayana And Patanjali, p. 48.

च दूषयति, एवं भाष्यकारो वार्तिककारेण,' तत्र ज्ञायते यत् भाष्यकारः पाणिनिसूत्र-रक्षणार्थं कात्यायनाक्षेपाणां खण्डनं कृतवान्। शब्दकल्पद्रुमेऽपि एवमेवोल्लिखित-मस्ति–

"परं पतञ्जलिः सूत्रपाठस्य वार्तिकस्य च महाभाष्यं विधाय सर्वतः प्रमाद-परिशून्योऽयम् अष्टाध्यायीग्रन्थः, इति प्रदर्शयन् कात्यायनतीव्रदृष्ट्या ररक्षैनं समादरणीयं ग्रन्थमुत्तमम्।"

एभिः उक्तिभिः ज्ञायते यत् कात्यायनेन भयंकररूपेण अनावश्यकं वा पाणिनिः आक्षिप्तः यस्य रक्षणं पतञ्जलिना कृतम्। किन्तु वस्तुस्थितिस्तु सर्वथा विपरीतैव। दुरुक्तशब्दस्य अयमपि अर्थः भवितुमर्हति यत् दुःखेन यदुक्तं तिष्ठति अर्थात् यदुक्तमेवं काठिन्यपूर्णं वर्तते[1] यत् सौकर्येण ज्ञातुमक्षमम् अथवा यदि 'दुरुक्तम्' इत्यस्य दूषणयुक्तमिति अर्थावगतिः तदापि का हानिः? भाषानुशीलनधिया यदि विचारयामः तर्हि तु पाणिनिकात्यायनयोः परस्परं प्रतिस्पर्धायाः द्वेषभावस्य वा कुतोऽवसरः? कोऽपि शब्दः यदि इतः शताब्दीत्रयपूर्वं कस्मिन्नपि रूपे आसीत् इदानीं रूपान्तरं प्राप्तः, कस्मिंश्चिदपरस्मिन् अर्थे आसीत्, साम्प्रतन्तु अर्थान्तरमुपलब्धः, यदि कस्यापि वैयाकरणस्य पुरतः गच्छति तदा स स्वसामयिकभाषामाधृत्य स्वसामयिक-विश्लेषणानुरूपं च तस्य निष्पत्तिमुपस्थापयिष्यति। इदमपि भवितुं शक्नोति यत् पाणिनिदृष्टिकोणे यस्य शब्दस्य निष्पत्तिसरणिः तत्वतः समीचीनासीत् कात्यायन-धिया असमीचीना, वादे वादे जायते तत्त्वबोधः, अतः विचारसरणौ भेदः परमस्वाभाविकः। किन्त्वेतस्य नेदं तात्पर्यं यदुभावपि पाणिनिकात्यायनौ परस्परं प्रतिस्पर्द्धिनौ आस्ताम्।

उभयोः दृष्टिकोणवैषम्यं प्रतिद्वन्द्वित्वेन मन्यमानैः कतिपयैः पाश्चात्यैः मनीषिभिः

---

१. वार्तिकं–(वृत्तिरूपेण कृतो ग्रन्थः) **An explanatory or supplementary rule which explains the meaning of that which is said, of that which is left unsaid, and of that which is imperfectly said; or a rule which explains what is said or but imperfectly said and supplies Ommissions,** उक्तानुक्तदुरुक्तार्थव्यक्ति (or चिन्ता) कारि तु वार्तिकम् **the term is particularly applied to the explanatory rules of Katyayana on Panini sutras.**

V. S. Apte, ***The Practical Sanskrit English Dictionary*****; p. 845**

भारतीयैश्च विद्वद्भिः कात्यायनः तीव्रालोचकरूपेण लक्षितः । एषु गोल्डस्टूकर[1] वेबर[2]-बर्नेल[3]-बेलवल्कर[4] प्रभृतयः प्रामुख्यं भजन्ते । नैकान्तं गोल्डस्टूकरमहोदयः इदमुद्भावयति, यद् कात्यायनः पाणिनेः तीव्रालोचकः प्रत्युत स इदमपि प्रस्तौति यद् क्वापि पतञ्जलिनापि अनावश्यकमेव कात्यायनवार्तिकानां खण्डनं कृतम् । एवं प्रतिभाति यद् खण्डनमिदं खण्डनाय एव वर्तते, यत्तु अनुचितमेव तिष्ठति[5] । एस० सी० चक्रवर्ती अपि कात्यायनं पाणिनिशास्त्रे अनावश्यकदोषोद्भावकरूपेण स्वीकरोति ।[6] किन्तु कीलहार्नमहोदयः विदुषामेषामालोचनां सर्वथा विखण्डयति । स कात्यायनं पाणिनेः प्रशंसकं, मित्रम्, अनुयायिनं, शिष्यं वा मनुते[7] तन्मते

---

1. Katyayana in short does not leave the impression of an admirer or friend of Panini, but that of an antagonist often too, of an unfair antoganist.

   Panini p 132

2. Prof. Weber, *Indische studiem*, Vol. XIII. p. 298, 3211, 399,-& 502.

3. A. C. Burnell, *On the Aindra Shool of Sanskrit Grammarians*. p.–91–92.

4. "Katyayana subjected Panini's Astadhyayi to a searching Criticism. Since here his object was not to explain Panini but to find faults in his grammer ... . - ... "

   Shripad Krishna Belvalkar.

   Systems of Sankrit Grammar p. 24.

5. He sometimes overdoes his defence of Panini, and becomes unjust to Katyayana. *Panini*, P. 133

6. He defends Panini in it from the ill-conceived and often erroneous attacks by Katyayana preferred in his varttikas.

   Introduction of Nyas, vol. 1

7. So far calling Katyayana an unfair antagonist of Panini, I would rather claim for him the title of a follower or judicious admirer of Panini, who dispassionately examines the rules laid down by his master, considers the objections which have

पतञ्जलिः यथा भयंकररूपेण पाणिनिमाक्षिप्तवान् न तथा कात्यायनः ।[१]

अस्माकं मतमितो सर्वथा भिन्नम् । मुनित्रयस्य पुरतः इदमेव लक्ष्यमासीत् यत् लघुनोपायेन शब्दाः प्रतिपत्तव्याः, येनाल्पेन प्रयासेन शब्दानां महौघः प्रतिपद्येत। अनया दृष्ट्या एषां सम्बन्धः चिन्तनीयः । यत्किंचिदपि कात्यायनदृष्ट्या स्वल्प-नियमसाध्याः शब्दाः आसन् तेषां कृते संक्षेपतः स वार्तिकानि प्रणीतवान् पतञ्जलिश्च तात्कालिकभाषासमाश्रयणेन अवशिष्टशब्दसिध्यर्थं स्वकीयनियमान् प्रस्तुतवान् । अतः एषु न कोऽपि कस्यापि विरोधी वर्तते नापि प्रशंसकः शिष्यो वा । पाणिनि-कात्यायनयोः परस्परं द्वेषबुद्धिसमन्वितत्वरूपकं यद्विदुषां मतं तस्याधारः कथासरित्सागरः,[२] यत्र इतिहासतः तत्त्वतः वा सर्वथा भिन्ना[३] गाथैका तिष्ठति यत्र चर्चितं यत् पाणिनिः वर्षनामकाचार्यस्य शिष्यः आसीत् । पूर्वं स जडबुद्धिरासीत् किन्तु तीव्रतपोऽनन्तरं स सर्वविद्यामुखं नवं व्याकरणम् इन्दुशेखरप्रसादात् विरचितवान् । कात्यायनः वर्षस्य मेधावी छात्रः आसीत् । स पाणिनिविरोधाय वार्तिकं प्रणीतवान् । रामभद्रदीक्षितेन पतञ्जलिचरिते उक्तं यत् पाणिनिकात्यायनौ परस्परं विवादसंलग्नौ अन्योन्यं प्रति शापग्रस्तौ बभूवतुः[४] । इयं कथा सर्वथा

---

actually been or which might be raised to them, is ever ready to defend and justify Panini ......

Katyayana and Patanjali, p. 47

१. It is on the other hand equally true that in many cases his criticism is much more thorough going and destructive than Katyayana's and that Panini has suffered more at his hands than at those of the varttikakara.

Katyayana and Patanjali, p. 52

२. कथासरित्सागरः, ४।२० तथा ४।८८

३. The story is an absurd one, and is useful only to show that an Aindra School of grammar was known in the 10th. century and that it was said to have been superseded by Panini's.

On the Aindra School of Sanskrit Grammarians, p. 3

४. यस्मादविज्ञाय मम प्रभावं वृषध्वजानुग्रहभाजनस्य ।
सूत्रेष्वनुक्तोक्तदुरुक्तचिन्तावृथोद्यमं वार्तिकमातनिष्ठाः ॥
भवानजानन् भगवत्प्रसादविवर्तभूतान्यपि वार्तिकानि ।
मद्दयं यतः शापमदा मदेन ततो विशीर्येत तवापि मूर्धाः ॥

पतञ्जलिचरितम्, १।६७-६८

काल्पनिकी वर्तते। पाणिनिकात्यायनयोः न एककालावस्थितिः। शब्दकल्पद्रुमेऽपि एवं विश्लेषितं विद्यते—'कात्यायनपाणिन्योः शब्दशास्त्रपाठेन पाणिनिः कात्यायनात् पूर्वतनः इत्यनायसेनैव विज्ञायते। ततः कात्यायन एव पाणिनिकृतव्याकरणस्य वार्तिककारः स स्वग्रन्थे, विदुषां वरं पाणिनिमाचार्यत्वेन स्वीकृतवान्।' श्री वासुदेवशरणाग्रवालमहोदयेन कात्यायनदृष्टिकोणस्य तात्त्विकमनुशीलनं कृतमस्ति। तन्मते कात्यायनवार्तिकैस्तु पाणिनीयं शास्त्रं जीवनदानं प्राप्नोत्। कात्यायनः पाणिनेः सुयोग्यः उत्तराधिकारी आसीत् न तु प्रतिस्पर्द्धाशीलः[1]। तत्त्वतः वार्तिककारः कस्मादपि पूर्वाग्रहहेतोः द्वेषबुद्धितः वा सूत्राणां प्रत्याख्यानं न करोति प्रत्युत पाणिनीयं व्याकरणं सर्वथा सुरक्षितं तिष्ठेदिति कामयते तस्य चेतः।

कात्यायनेन बहुशः यथा पाणिनेः समादरः विहितः[2], तेनावलोक्यते यत् स पाणिनेरनुयायी, परमभक्तः सर्वथा समर्पितः, कश्चिदेवंभूतः जनः आसीत् यस्य परमलक्ष्यमेव आसीत् तत्पदचिह्नानुसरणं विधाय संस्कृतभाषायाः परिरक्षणम्। पतञ्जलिना च यथा स्वपूर्ववर्त्युभयाचार्ययोः कृते यः समादरभावः अनेकशः प्रस्तुतः स उक्तमतमेव समर्थयति। पाणिनेः अनुस्मरन् पतञ्जलिः एवं प्रतिभाति यथा स साक्षात् कमपि परमदेवं अनुस्मरति–'प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचावकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयतिस्म[3]। अपरत्र च मांगलिक आचार्यो महतः शास्त्रौघस्य मंगलार्थं वृद्धिशब्दमादितः प्रयुंक्ते[4]। अन्यच्च आचार्येण सूत्रं पठितम्[5]। कात्यायनं प्रत्यपि पतञ्जलिः समादरभावेन, पूर्णतः समन्वितः अवलोक्यते, तद्यथा 'तदाचार्यः सुहृद्भूत्वा अन्वाचष्टे[6]', आचार्येण प्रयोजनानि पठितानि[7], मांगलिक आचार्यः महतः शास्त्रौघस्य मंगलार्थं सिद्धशब्दमादितः प्रयुंक्ते[8], न ब्रूमो वृत्तिसूत्रवचनप्रामाण्यादिति। किं तर्हि वार्तिकवचनप्रामाण्यादिति।

---

१. वासुदेवशरण अग्रवाल, पाणिनिकालीन भारतवर्ष, पृ० ७-८

२. (क) आचार्याचारात् संज्ञासिद्धिः, महा०, १।१।१
(ख) एकशेषनिर्देशाद् वा स्वरभिन्नानां भगवतः पाणिनेः सिद्धम्।
महा०, ८।४।६८

३. महा०, १।१।१

४. महा०, १।१।१

५. महा०, ५।१।११५

६. महा०, ३।३।१३७

७. महा०, ६।१।१३

८. महा०, प्र० आ०

तथा चात्र कैयटः—'वार्तिककारवचनस्यापि स्मृतिशास्त्रत्वात् प्रामाण्यमाश्रित-मित्यर्थः[1]। एषु सर्वेषु स्थलेषु पाणिनिसदृशमेव सम्मानभावना पतञ्जलिना वार्तिककृतं प्रति प्रदर्शिता। वस्तुतः महाभाष्यमष्टाध्याय्याः सूत्राणां व्याख्यानं वर्तते प्रत्युत तद्विश्लेषणाय प्रस्तुतानां कात्यायनवार्तिकानां बृहद् व्याख्यानं तिष्ठति। भाष्यकृतः पूर्वस्मिन् काले अनेकैः वैयाकरणैः वार्तिकानां रचनां कृतं येषु कात्यायनस्य सुनागस्य च वार्तिकानि प्रमुखानि आसन्। एषां वार्तिककृतां मतानां याथार्थस्य परीक्षणं विधाय खण्डनमण्डन द्वारा पतञ्जलिना स्वाभिमतं प्रदर्शितं तथा च स्वकीयविशिष्टानामिष्टीनामुद्भावनं च कृतं तेन। तत्त्वतः महाभाष्यं कात्यायन-वार्तिकानामेव विस्तृतं विशदं च व्याख्यानं वरीवर्ति। पतञ्जलिः कात्यायनस्य पूर्णतया समर्थकः विद्यते। स स्वयमेवाक्षेपं, संशीतिं चोपस्थाप्य वार्तिकानां समा-धानं प्रस्तौति। स्वयमेव दूषणमुद्भावयति तस्य निरासं च करोति। वार्तिकस्य सिद्धान्तानां व्याख्याने, एतस्य समर्थने च विभिन्नाः युक्तीः स प्रस्तौति। एतेन भाष्यकारस्य अप्रतिमप्रतिभायाः एव परिचयः नोपलभ्यते प्रत्युत कात्यायनं प्रति तस्य पूर्णास्थायाः अपि परिचयः संप्राप्यते।

तात्त्विकविवेचनेन परिज्ञायते यत् इमे त्रय एव आचार्याः स्वस्वलक्ष्यं प्रति पूर्णरूपेण समर्पिताः वर्तन्ते तथा यथा कात्यायनः स्वकीयपूर्ववर्तिनं पाणिनिम्प्रति श्रद्धासमन्वितः तथैव तद्विषये पतञ्जलेः तिष्ठति दृष्टिः। शब्दसिद्धिरूपं विशिष्टं लक्ष्यं प्रति समर्पिता इमे कदापि प्रतिद्वन्द्विभावान्विताः न, प्रत्युत समादरभावयुक्ता एव। वासुदेवशरणाग्रवालबलदेवोपाध्यायसत्यकामवर्मप्रभृतीनां विदुषां मतमपि एवमेव तिष्ठति। यथा पाणिनिं प्रति कात्यायनस्य दृष्टिः एकस्य श्रद्धामयस्य आलोचकस्यासीत्, एवंभूतस्य समर्पितस्य भक्तस्य वासीत्—यः स्वभगवता निर्दिष्टं पन्थानं सर्वदैवानुसरति तदनुस्मरति च। इयमेव विशिष्टा विलक्षणा वा दृष्टिः कात्यायनं प्रति पतञ्जलेरासीत्।

---

१ ।१।२०प्र ,०हाम .१

रूपान्तरेण ते देवा विचरन्ति महीतले।
ये व्याकरणसंस्कारपवित्रितमुखा नराः ॥

॥ द्वितीयोन्मेषः ॥

महाभाष्ये कात्यायनवार्तिकनिर्णयः

कात्यायनस्य वार्तिकानां प्रत्यभिज्ञानमतीव दुष्करं कार्यं वरीवर्ति। कात्यायनस्य स्वकीयं किमपि पुस्तकमवश्यमेव आसीत् यत्र पाणिनिसूत्रोपरि पृथक् वार्तिकानां परिगणनं भवेत् किन्तु कालखण्डस्य सुदीर्घव्यवधानकारणात् अद्य कोऽपि एवंविधः ग्रन्थः नोपलभ्यते यत्र वार्तिकानां पृथक् परिगणनं भवेत्। यानि तु वार्तिकपाठतः सम्बद्धानि पुस्तकानि[1] उपलभ्यन्ते तेषां मौलिकता नूनमेव संशीतिमुद्वहति।[2] वस्तुतः महाभाष्यतः एव संगृहीतानि तत्र वार्तिकानि तिष्ठन्ति अतः सर्वप्रथमं

---

१. (क) वार्तिकपाठ - बम्बई युनिवर्सिटी लायब्रेरी सं० १८४४।
(ख) वार्तिकपाठ - पं० भीमसेन शर्मा, नेशनल पब्लिशिंग हाउस, दिल्ली १९०१ ई०।
(ग) अष्टाध्यायी सवार्तिक, न०डी० १२५७ गवर्नमेण्ट ओरियेन्टल मैन्युस्क्रिप्ट लायब्रेरी, मद्रास।
(घ) अष्टाध्यायीसूत्रपाठः, वार्तिक गणपाठसहित, वृन्दावन गुरुकुल सं० १९६६
(ङ) अष्टाध्यायीसूत्रपाठः, वार्तिकसमलंकृतः, निर्णयसागर १६५४ ई०।
(च) अष्टाध्यायीसूत्रपाठः — वार्तिकगणपाठ धातुपाठपाणिनीयशिक्षापरिभाषा पाठसहितः श्रीमनोरमा प्रेस, मैलापुर, मद्रास १९३६ ई०।

2. So far as we know at present, the Varttikas of Katyayana do not exist separately in Ms. Mss. which profess to give the Srimadbhagavat-Katyayanavirachita-Varttikapatha are indeed to be met within different and widely distant parts of India, but a very superficial examination is sufficient to prove that the Varttikpatha which they contain, has been compiled and, I have no hesitation in saying, very carelessly from the Mahabhashya at a comparatively modern date.

Katyayana and Patanjali P. 6-7

पतञ्जलेः महाभाष्य एव कात्यायनस्य वार्तिकानां दर्शनं संजायते एवं च तदनन्तरं काशिकाप्रक्रियाकौमुदीसिद्धान्तकौमुदी प्रभृतिषु व्याकरणग्रन्थेषु एषां वार्तिकानां विवेचनमुपलभ्यते। किन्तु महाभाष्ये वार्तिकानां महार्णवः दरीदृश्यते, तत्र कानि वार्तिकानि कात्यायनस्य वर्तन्ते कानि अन्येषामाचार्याणां तिष्ठन्ति, कानि वा स्वयं भाष्यकृतः इत्यनुशीलनं तत्त्वतः कठिनम्। काशिकायां, प्रक्रियाकौमुद्याम् अथ च अन्येषु व्याकरणग्रन्थेषु अपि वार्तिकानां स्वरूपे भेदः तिष्ठति, एतस्मात् हेतोरपि वार्तिकनिर्णये महत्-काठिन्यं तिष्ठति। एषु समालोचकेषु श्री वेदपतिमिश्रः, युधिष्ठिरमीमांसकमहाभागः, गोल्डस्टूकरमहाशयः, एफ० कीलहॉर्नमहाभागः[१], श्रीरामसुरेशत्रिपाठिमहोदयः, श्रीरघुवीरविद्यालंकारः अन्ये च कतिपये विद्वांसः एतद्विषये स्वकीयं मतं समुपस्थापयन्ति एवं च वार्तिकप्रत्यभिज्ञानस्य विभिन्नलक्षणानि प्रस्तुवन्ति, किन्तु एषु कोऽपि महाशयः निस्सन्दिग्धरूपेण अस्याः समस्यायाः निराकरणे सर्वथा शक्तः नावलोक्यते।

स्वकीयग्रन्थस्यास्मिन् उन्मेषे मया स्थाने-स्थाने एषां विदुषां मतमुपस्थाप्य यथावश्यकं तेषां खण्डनं मण्डनं वा विधाय कात्यायनवार्तिकानां प्रत्यभिज्ञानाय कतिपये उपायाः प्रदर्शिताः अत्र तेषामेव अनुशीलनं प्रस्तूयते—

भाष्यवचनेभ्यः कात्यायनवार्तिकानां पृथक्करणाय श्रीवेदपतिमिश्रेण उक्तं यत् भाष्ये पाणिनिसूत्रोपरि यदा कापि शंका समुपस्थाप्यते, तदा क्वचित् 'किंचातः क्वचिच्च' 'कश्चात्र विशेषः' इति वाक्यद्वयमुपलभ्यते। भाष्यकारेण एवंविधवाक्यद्वयस्यास्योपस्थापनेन वार्तिकनिर्णयरूपसमस्यायाः सौकर्येण समाधानं विहितमस्ति, सम्भवतः तथ्यमिदं विद्वद्भिः एतत्पूर्वं न ध्यातम् इति श्री मिश्रमहाशयाभिमतम्। तन्मते यदि शंकायाः स्थापनानन्तरं 'किं चातः' इति वाक्यस्य प्रयोगः तिष्ठेत् तदा एतदनन्तरं यद्विवेचनं समायाति तन्नूनं भाष्यकारस्य स्वीयं तिष्ठति किन्तु कस्याः अपि शंकायाः स्थापनानन्तरं यदि 'कश्चात्र विशेषः' इति वाक्यं समायाति तदा तदव्यवहितोत्तरं वार्तिकमवश्यमेव कात्यायनस्य भवेत्।[२] अत्र प्रथमं मया 'किं चातः' इत्यनन्तरं समागतेवचनानां वार्तिकावार्तिकत्वं विश्लेष्यते—

भाष्ये विभिन्नेषु स्थलेषु विभिन्नसमस्यानां समाधानार्थं 'किं चातः' इति वाक्यं प्रस्तूय विचाराः प्रकटिताः तिष्ठन्ति। यथा वृद्धिरादैच्' इति सूत्रे अयं विचारः

---

१ In attempting them to determine which are the Varttikas of Katyayna, we are mainly left to our own resources.

Katyayana and Patanjali, p. 7

२. व्या० वा० एक० स० अ०, पृ० ७०

अवलोक्यते यत् किमत्र सूत्रे तद्भावितग्रहणं तिष्ठति अथवा आदैज्मात्रस्य ग्रहणं, तत्र प्रश्नः समुदेति किं चातः, किं पुनरिदं तद्भावितग्रहणं— वृद्धिरित्येवं ये आकारैकारौकारा भाव्यन्ते तेषां ग्रहणम्, आहोस्विदादैज्मात्रस्य[1] ? उभयथा शास्त्रे दर्शनात्पक्षद्वयेऽपि दोष संभवादयं प्रश्नः, तत्र प्रश्नस्यास्य सम्बन्धे 'किं चातः' इति वचनं तिष्ठति यस्याशयः वर्तते यत् उभयोः किमपि तिष्ठतु किमेतेन भाव्यम्, समाधानक्रमेण भाष्ये तिष्ठति—यदि तद्भावितग्रहणम् शालीयः मालीयः' इति वृद्धलक्षणश्छो न प्राप्नोति — ••• •••अथादैज् मात्रस्य ग्रहणम्, सर्वाभासः-सर्वभास इति 'उत्तरपदवृद्धौ सर्वं च' इत्येव विधिः प्राप्नोति। अत्र 'किं चातः' इति कथनानन्तरं समागतंसर्वं वाक्यं भगवतः पतञ्जलेरेव न तु कात्यायनस्य। एवमेव 'विशेषणानां चाजातेः[2] इति सूत्रे कथमिदं विज्ञायतेजातिर्यद् विशेषणम् इति, आहोस्विद् जातेर्यानि विशेषणानि' इति शंकायाः समाधानपुरस्सरं भाष्यकारः पूर्वं पृच्छति 'किं चातः' तदनन्तरमेव उभयपक्षविषये स्वकीयं समाधानं प्रस्तौति।

यत्तु कीलहॉर्नमहाशयेनोक्तं यत् अग्रादिष्वासमासे प्रतिषेधः इति विभाषाग्रे प्रथमपूर्वेषु[3] इति सूत्रोपरि कात्यायनवार्तिकं वर्तते तन्न समीचीनं यतः तत्र किमयं प्राप्ते विभाषा आहोस्विदप्राप्ते इत्याक्षेपभाष्यस्य प्रत्याक्षेपभाष्यं-कथं च प्राप्ते, कथं चाप्राप्ते तिष्ठति। तस्य विश्लेषणार्थं महाभाष्यकारः ब्रूते किं चातः ? तदनन्तरं प्राप्तविभाषायां दूषणमुद्भावयति-'यदि प्राप्तौ आभीक्ष्ण्येऽनिष्टा विभाषा प्राप्नोति। अन्यत्र चेष्टा न सिद्ध्यति। अथाप्राप्ते-अग्रादिष्वप्राप्तविधेःसमास प्रतिषेधः इति दूषणभाष्यं प्रस्तौति भाष्यकारः। काशिकायां प्रक्रियाकौमुद्यां सिद्धान्तकौमुद्यां च क्वापि वार्तिकरूपेण एतस्य वचनस्य न परिगणनं कृतम्। प्रसंगस्य पूर्वापरक्रमानुशीलनेनापि इदमेव विस्पष्टं यदेतत् भाष्यवचनं न तु कात्यायनीयं वार्तिकम्।

'लट् स्मे[4]' इति सूत्रे वार्तिकद्वयं तिष्ठति 'स्मपुरा भूतमात्रे' न स्म पुराद्यतने इति। तत्र-किमयं स्मादिविधिः पुरान्तोऽविशेषेण भूतमात्रे भवति। तत्र वक्तव्यं 'स्मलक्षणः पुरालक्षणश्चाद्यतने न भवत इति, आहोस्वित् 'स्मलक्षणः पुरालक्षणश्चाविशेषेण भूतमात्रे भवतः' इति तत्र स्माद्यर्थं न स्म पुराद्यतन इति वक्तव्यम् ?

---

१. महा० १।१।१

२. अष्टाध्यायी, १।२।५२

३. अष्टाध्यायी, ३।४।२४

४. अष्टाध्यायी, ३।२।११८

इति भाष्यप्रश्नः तदनन्तरं भाष्यकृता उक्तं-किं चातः[1] ?- एकतरस्मिन् वार्तिके स्मपुरा शब्दौ उपलक्षणत्वेन आश्रयणीयौ तत्र पूर्वस्मिन् परस्मिन् वा विशेषमपश्यन् पृच्छति किं चातः इति । तदन्तरं पूर्वप्रत्याख्यानवार्तिकं तिष्ठति-'स्मादिविधिः पुरान्तो यद्यविशेषेण किं कृतं भवति न स्मपुराद्यतन इति ब्रुवता कात्यायनेनेह'[2] अत्र स्मादिविधिः इत्यादि न कात्यायनवार्तिकं प्रत्युत भाष्यवार्तिकमेव ।

अस्माकं मते 'किं चातः' इत्यनन्तरं समागतानां सर्वेषां वचनानामनुशीलनेन इदं सहजरूपेण स्पष्टं भवति यत् इमानि न कात्यायनवार्तिकानि प्रत्युत भाष्यवचनान्येव । अतः श्रीवेदपतिमिश्रश्रीरघुवीरविद्यालंकारयोः[3] एतद्विषये विशेषरूपेण ऊहापोहकरणमेव अतात्त्विकम् यतः किं चातः इत्यनन्तरस्थस्य वचनस्य वार्तिकत्वप्रसरः एव न बरीवर्ति ।

'कश्चात्र विशेषः' इति वाक्यानन्तरं समागतानि वार्तिकानि कात्यायनस्य वर्तन्ते न तु भाष्यकारस्य इति मतं कतिपये आलोचकाः समर्थयन्ति, तेषु मिश्रविद्यालंकारौ तु इदमपि कथयतः यत् 'कश्चात्र विशेषः' इति वचनानन्तरं भाष्ये यद्वाक्यं समायाति तन्नूनमेव कात्यायनवार्तिकम् । श्रीवेदपतिमिश्रमते प्रायशः सप्ततिस्थलेषु 'कश्चात्र विशेषः' इत्यनन्तरं वार्तिकमायाति तथा किमपि एवंभूतं स्थलं न वर्तते, यत्र 'कश्चात्र विशेषः' इत्यनन्तरं वार्तिकं न तिष्ठेत् ।[4] श्री रघुवीरविद्यालंकारमते कश्चात्र विशेषः इत्यनन्तरं भाष्यकारः किमपि वार्तिकमवश्यमेव प्रस्तौति । तन्मते इदं वाक्यं भाष्ये प्रायः पञ्चसप्ततिस्थलेषु समायाति ।[5] उभावपि इमौ आलोचकौ विषयेऽस्मिन् अत्यन्तविश्वस्तौ स्तः यत् कश्चात्र विशेषः इत्यनन्तरं सर्वं वार्तिकं कात्यायनीयमेव ।

---

१. अष्टाध्यायी ३।२।११८

२. तत्रैव

३. का० का० स० अ०, पृ० १३९-१४०

४. कश्चात्र विशेषः वाक्य भाष्य में लगभग ७० स्थानों पर उपलब्ध होता है जहाँ तक हमारा ज्ञान है, कोई भी ऐसा स्थल भाष्य में नहीं है जहाँ कश्चात्र विशेषः कहकर वार्तिक न दिया गया हो । व्या० वा० एक० स अ०, पृ० ७२

५. कश्चात्र विशेषः इस वाक्य के पश्चात् भी भाष्यकार कोई न कोई वार्तिक अवश्य देते हैं । यह वाक्य भाष्य में लगभग ७५ स्थानों पर उपलब्ध होता है एवं सभी जगह इसके पश्चात् कात्यायन का वार्तिक दिया गया है ।
रघुवीर विद्यालंकार, काशिका का समालोचनात्मक अध्ययन, पृ० १३७

किन्तु अस्माकम्मते कश्चात्र विशेषः इति कथनानन्तरम् अव्यवहितोत्तरं सर्वं वाक्यं कात्यायनवार्तिकमेव इति कथनं न न्याय्यम् । स्वकीयमतपरिपोषणार्थं प्रथमं श्रीमिश्रद्वाराप्रस्तुतोदाहरणानां तदनन्तरं श्रीविद्यालंकारेण प्रस्तुतोद्धरणानांसमीक्षणं विधीयते तदनन्तरं कतिपयोदाहरणैः इदं स्पष्टीकरिष्यते यत् कश्चात्र विशेषः इत्यनन्तरं समागतानि वचनानि भाष्यवचनान्येव न तु कात्यायनीयानि । कश्चात्र विशेषः इत्यनन्तरस्थं वाक्यं वार्तिकमेव एतदर्थं प्रमाणत्वेन यदुक्तं मिश्रेण 'अनुकरणं चानितिपरम्[१]' इति सूत्रे भाष्यकारेण यल्लिखितम् 'इदं विचारयिष्यति ते प्राग्धातुवचनं प्रयोगनियमार्थं वा स्यात् संज्ञा नियमार्थं वेति', एतस्मिन् सन्दर्भे 'विचारयिष्यति' पदमन्यं कमपि जनं संकेतयति[२] । अयमेव विचारः 'ते प्राग्धातोः'[३] सूत्रोपरि तिष्ठति—किमिदं प्राग्धातुवचनं प्रयोगनियमार्थम् । एते प्रागेव धातोः प्रयोक्तव्याः । आहोस्वित् संज्ञानियमार्थम् कश्चात्र विशेषः, प्राग्धातुवचनं प्रयोगनियमार्थमिति चेदनुकरणस्येतिकरणपरप्रतिषेधोऽनिष्टशब्दनिवृत्त्यर्थः, इति वार्तिकं वर्तते, तन्न समीचीनम् । अत्र श्रीमिश्रस्य इदं विवेचनं यत् 'विचारयिष्यति' पदं कमपि अन्यं जनं-वार्तिककारं-संकेतयति, अयुक्तमेव प्रतिभाति, यतः भाष्ये 'विचारयिष्यते' इति वर्तते, भवेन्नाम यदपरस्मिन् संस्करणे श्रीमिश्रेण विचारयिष्यतीति अवलोकितं, किन्तु सन्दर्भदर्शनेन इदमेव विज्ञायते यत् तत्र 'मया विचारयिष्यते' इत्येव भाष्यकारस्याभीष्टं तिष्ठति । 'ते प्राग्धातोः' इत्यत्र कश्चात्र विशेषः इति कथयित्वा पूर्वोक्तं यद् वार्तिकं तिष्ठति तदपि न कात्यायनकृतम् । भाष्यस्य यल्लक्षणं—'स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः' तदनुसारमिदमत्र स्पष्टीभवति यत् कश्चात्र विशेषः इति भाष्यप्रश्नः, यस्य ऊहापोहविषये भाष्यकारेण प्राग्धातुवचनमित्याद्युपस्थापितम् । स्वयमेव स्वकीयवार्तिकेन कामपि शंकामुद्भाव्य पुनस्तस्याः शंकायाः प्रत्याक्षेपरूपमपरं वार्तिकं पुनश्च तस्य खण्डनाय वार्तिकान्तरोपस्थापनं न कात्यायनशैली; प्रत्युत भाष्यकारस्येयं शैली । काशिकादिष्वप्येतस्य वार्तिकस्यादर्शनात् वार्तिकमिदं भाष्यवचनमेवेति न तु कात्यायनप्रणीतम् ।

डॉ० रघुवीर विद्यालंकारः श्रीमिश्रमतं समर्थयन् कश्चात्र विशेषः इति वचनानन्तरं कात्यायनवार्तिकं वर्तते, इति कथयति उदाहरति च 'इग्यणः सम्प्रसारणम्' । तत्र तन्मते सम्प्रसारणसंज्ञायां वाक्यस्य संज्ञा चेद्वर्णविधिः[४] इति वार्तिकं वर्तते किन्तु आस्माकीनमभिमतमितो भिन्नम् । स्वमतोपरिपोषणार्थमत्रत्यं भाष्यं

१. अष्टाध्यायी १।४।६१
२. व्या० वा० एक० स० अ०, पृ० ७२
३. अष्टाध्यायी १।४।७०
४. अष्टाध्यायी, १।१।४५ सूत्रोपरि भाष्यम्

प्रस्तुभ:- किमियं वाक्यस्य सम्प्रसारण-क्रिया क्रियते इग्यण् इत्येतद् वाक्यं संम्प्रसारण-संज्ञं भवतीति। आहोस्विद्वर्णस्य-इग्यो यणः स्थाने वर्णः स सम्प्रसारणसंज्ञो भवतीति, कश्चात्र विशेष: ? सम्प्रसारणसंज्ञायां वाक्यस्य संज्ञा चेद् वर्णविधिः इति वाक्यपक्षे वचनम्। वर्णपक्षे वर्णसंज्ञाचेन्निर्वृ त्तिः इति वचनम्। पुनश्च समाधानार्थं वचनं तिष्ठति-विभक्तिविशेषनिर्देशस्तु ज्ञापक उभयसंज्ञात्वस्य।[1]

अत्रत्यं समग्रं भाष्यमवलोक्य स्पष्टमेव विज्ञायते यदत्र कात्यायनवार्तिकस्य नावकाश:, यत: इग्यण: सम्प्रसारणमिति कथयित्वा यदि 'किमियं वाक्यस्येत्यादि' भाष्यवचनं न तिष्ठेत् तदा केवलं सम्प्रसारणसंज्ञायां वाक्यसंज्ञा-चेद्वर्णविधि: इति कथनेन योऽर्थ: इष्ट: तस्य उपपत्तिरेव न स्यात्। तथैव वर्णसंज्ञाचेन्निर्वृ त्तिः एतस्याभिप्रेतस्यापि ज्ञानं न भवेत् तथाचोभयोरनन्तरं 'विभक्तिविशेषनिर्देशस्तु' इत्यादिकथनमपि पूर्वापरकथनं विना तात्पर्यविहीनमेव भविष्यति। वार्तिककारस्य नेयं शैली यत् पूर्वं स्वकीयं किमपि मतं समुपस्थाप्य तस्य खण्डनं विधाय पुनश्च तस्य समाधानोपस्थापनम् विदध्यात्।

गोतोणित्[2] इत्यस्य विश्लेषणक्रमे भाष्यकार: किमिदं गोत: परस्य सर्वनाम-स्थानस्य णित्त्वमुच्यत आहोस्वित् सर्वनामस्थाने परतो णित्कार्यमतिदिश्यते ? कश्चात्र विशेष: ? गोत: सर्वनामस्थाने णित्कार्यातिदेश — ... ... — — ... सर्वनामस्थाने णित्त्ववचने ह्यसंप्रत्ययः षष्ठ्यनिर्देशात् इति वचनद्वयं प्रस्तौति। तच्च भाष्यवचनं न तु कात्यायनवार्तिकम्, यत: स्वयं भाष्यकृता गोत: परस्य सर्वनामस्थानस्य णित्त्वकार्यं सूत्रस्याभिमतमथवा सर्वनामस्थाने परत: णित्कार्यम् अतिदिष्यते इति प्रश्न: समुपस्थापित: तथा चात्र इदमुपन्यस्तं यत् अन्यतरस्मिन् सति कश्चात्र विशेषः ? तदनन्तरं प्रश्नस्यास्य व्याख्यानक्रमेण उपर्युक्तं वचनद्वयमुप-स्थापितम्। प्रदीपकृता चैवेदं समर्थितम्-'गांकुटादि सूत्रे यावन्त: पक्षा उक्तास्ते सर्वे इह सम्भवन्ति। तत्र णकारस्येत: सर्वनामस्थानेऽभावाद् भावे वा तदनुवादे प्रयोजनाभावात् णित्त्वव्यपदेशाभाव: ... ... — ... — भाष्ये तु भावनापक्ष एवाशंक्य निराकृत: पुरस्तात् स्थापितश्च।'[3] अत्र स्पष्टीभवति यत् भगवता पतञ्जलिना एव पूर्वं शंकाया: उपस्थापनं विहितं तथा चास्या: निराकरणंच कृतम्। काशिकादिष्वपि वार्तिकरूपेण गोतोणित् इत्यत्र वचनद्वयस्यास्य चर्चा न तिष्ठति।

---

१. अष्टा०, १।१।४५ सूत्रोपरि भाष्यम्।

२. अष्टाध्यायी, ७।१।९०

३. ७।१।९० सूत्रोपरि प्रदीपः।

अणिञोरनार्षयोर्गुरुपोत्तमयोः ष्यङ् गोत्रे[1] इति सूत्रे आक्षेपभाष्यं वर्तते—किम्पुनरयमणिञो रादेशः आहोस्विदणिञ्भ्यां परः, कश्चात्र विशेषः ? इत्यनन्तरं यानि वार्तिकानि सन्ति तानि सर्वाणि भाष्यवार्तिकानि, यतः उभयपक्षस्य समर्थने दोषोद्भावनं, दोषनिराकरणं चात्र तिष्ठतः तच्च भाष्यवचनमेव ।

'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्त्तासणौ'[2] इति सूत्रं प्रस्तूय स्वयं भाष्यकार आह—शब्दकर्मेति कथमिदं विज्ञायते—शब्दो येषां क्रियेति, आहोस्विच्छब्दो येषां कर्मेति ? इति प्रश्नमुपस्थाप्य कथयति भगवान्—कश्चात्र विशेषः ? अर्थात् अन्यतरस्मिन् स्थिते किमन्तरं किं वैशिष्ट्यं वा स्यास्यति ? तत्र प्रथमपक्षे आक्षेपवार्तिकं तिष्ठति—'शब्दकर्मनिर्देशे शब्दक्रियाणामिति चेद् ह्वयत्यादीनां प्रतिषेधः' पुनश्च तत्र आक्षेपान्तरं वार्तिकम् 'श्रृणोत्यादीनामुपसंख्यानमशब्दक्रियत्वात्'। तदनन्तरम् द्वितीयपक्षाभ्युपगमभाष्यं वर्तते – अस्तु तर्हि शब्दो येषां कर्मेति। द्वितीयपक्षे आक्षेपवार्तिकम् शब्दकर्मण इति चेज्जल्पतिप्रभृतीनामुपसंख्यानम्। स्पष्टमेवेह ज्ञायते यत् सूत्रस्य व्याख्यानक्रमेण स्वयं भाष्यकारेण या शंका समुपस्थापिता—यत् कर्मशब्देन क्वचित् क्रिया गृह्यते यथा कर्त्तरि कर्मव्यवहार इति क्वचित्तु साधनं कर्मयथा वेः शब्दकर्मण इति। ततश्चोभयथा व्यवहारदर्शनात् सन्दिहानः भाष्यकारः स्वयं पृच्छति—शब्दकर्मेति कथमिदं विज्ञायते — इति प्रश्नमुपस्थाप्य तस्य स्ववार्तिकैः समाधानं प्रस्तौति। यदि कात्यायनस्य इमानि वार्तिकानि अभविष्यन् तदा स्वयमेव एकमाक्षेपं प्रस्तूय ततः अपरोक्षेपस्य प्रस्तुतीकरणं तथा च पुनरन्यस्मिन् पक्षे आक्षेपस्य तत्समाधानस्योपस्थापनं वार्तिककारस्य नेष्टं, स तु स्वमतं स्पष्टतया एकेनैव वार्तिकेन उपस्थापयति। अतः कश्चात्र विशेषः इति कथनानन्तरं समागतं वार्तिकं कात्यायनस्यैव वर्तते इति कथनमतात्त्विकमेव। एवमेव किं पुनः शब्दस्य ज्ञाने धर्मः, आहोस्वित् प्रयोगे। कश्चात्र विशेषः[3] ? इति कथयित्वा ज्ञाने धर्म इति चेत्तथा अधर्मः इति ज्ञानपक्ष दूषणवार्तिकम् अवलोक्यते। पुनश्च अन्यैः विभिन्नैः वार्तिकैः प्रश्नस्यास्य समाधानं तिष्ठति। इहापि ज्ञाने धर्म इति भाष्यवचनमेव। कश्चात्र विशेषः इत्यनन्तरं प्रयुक्तं सर्वं वाक्यम् यदि वार्तिकम् स्यात्तर्हि, 'आत्ममाने खश्च'[4] इति सूत्रे प्रत्याक्षेपभाष्यक्रमेण लिखितम् कश्चात्र विशेषः यको वा श्यनो वा इत्यपि वार्तिकं स्यात् किन्तु तत्त्वतः इदं भाष्यवचनम्। यत्तु तत्रस्थभाष्यप्रसंगावलोकनेनैव स्पष्टम्।

---

१. अष्टाध्यायी ४।१।७८

२. अष्टाध्यायी १।४।५२

३. महा० पस्पशाह्निकम्।

४. अष्टाध्यायी ३।२।८३

आकडारादेका संज्ञा[1] इति सूत्रस्य प्रयोजनविश्लेषणक्रमे आचार्यपतञ्जलिः प्रश्नमुद्भावयति—किमर्थमिदमुच्यते ? समादधाति च—अन्यत्र संज्ञासमावेशान्नियमार्थं वचनम्, पुनश्च तत्र काकुभाष्यं तिष्ठति—अस्ति प्रयोजनमेतत्, किं तर्हीति आक्षेपभाष्ये उक्तं कथन्त्वेतत् सूत्रं पठितव्यम् । किम् आकडारादेका संज्ञा इति आहोस्वित् प्राक्कडारात् परं कार्यम् इति ? कुतः पुनरयं सन्देहः ? उभयथा ह्याचार्येण शिष्याः सूत्रं प्रतिपादिताः । केचिद् आकडारादेका संज्ञेति केचित् प्राक्कडारात् परं कार्यम् इति । एतदनन्तरं तिष्ठति आक्षेपभाष्यं—कश्चात्र विशेषः ? पाठद्वये स्थिते किं वैशिष्ट्यं स्थास्यति को लाभो वा भविष्यति ? उत्तरयति आचार्यः तत्रैकसंज्ञाधिकारे तद्वचनम् ।

अनेन विवेचनेन लभ्यते यत् कश्चात्र विशेषः इत्यनन्तरं समागतं वार्तिकं कात्यायनस्य वर्तत इति श्री मिश्रप्रभृतीनां मतं नोचितम् यतः अत्र भाष्यकारः सूत्रकृता निर्दिष्टस्य सूत्रपाठद्वयस्य औचित्यमनौचित्यंच विश्लेषयति, इति तु नूनमेव स्वयं भाष्यकृतः वचनम् ।

अपर आह इति उक्त्वा यद्वचनं तिष्ठति तत् कात्यायनस्य वार्तिकं न; प्रत्युत अन्यस्य कस्यापि वैयाकरणस्याभिमतं तिष्ठति यस्य विषये भाष्यकृता यत्र-तत्र भाष्ये उक्तम् । तद्यथा—अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि 'इति सूत्रे क्षीरलवणयोर्लालसायाम्' इति कात्यायनवार्तिकं येन क्षीरस्यति माणवकः, लवणस्यत्युष्ट्रः इति रूपसिद्धः भवति तत्र कस्यचिदपरस्य वैयाकरणस्य सिद्धान्तं भाष्यकारः प्रस्तौति—अपर आह—सर्वप्रातिपदिकेभ्यो लालसायामिति वक्तव्यं—दध्यस्यति मध्वस्यतीत्येवमर्थम् तथा च—अपर आह—सुक्वक्तव्यो दधिस्यति मधुस्त्यतीत्येवमर्थम् ।[2]

उभयप्राप्तौ कर्मणि[3] इति सूत्रे भाष्ये 'उभयप्राप्तौ कर्मणि षष्ठ्याः प्रतिषेधेऽकादिप्रयोगेऽप्रतिषेधः' इति वार्तिकं वर्तते । तत्र 'अपर आह' इति कथयित्वा भाष्यकृता एकमन्यदपि वार्तिकं प्रस्तुतम्—'अकाराकारयोः प्रयोगे प्रतिषेधो नेति वक्तव्यम् तथा 'शेषे विभाषा' अत्र प्रदीपकार आह—अकाकारव्यतिरिक्तस्त्रीप्रत्यय एव नान्यस्मिन्निति केचिदाहुः । अपरे तु प्रत्ययमात्रेऽकाकारवर्जिते विकल्पमिच्छन्ति । शब्दानामनुशासनमाचार्यस्याचार्येणेति वा ।

१. अष्टाध्यायी १।४।१
२. महा०, ७।१।५१
३. अष्टाध्यायी, २।३।६६

अत्र उद्योतकारः—अपरे त्विति-नोदाहरणमादरणीयमिति तद्भावः। विवेचनेनानेन ज्ञायते यत् 'अपरे तु' इत्यनेन कैयटनागेशावपि अपर आह इत्यनन्तरस्थं वचनं कात्यायनीयं न स्वीकुरुतः। लघ्वक्षरं पूर्वम्[1] इति वार्तिकानन्तरं भाष्ये तिष्ठति—आचार्यान्तरमतप्रदर्शकभाष्यम्—अपर आह—सर्वत एवाभ्यर्हितं पूर्वं निपततीति वक्तव्यम्। एतेन विस्पष्टं यत् अपर आह— ... ...आचार्यान्तर-वार्तिकं भवति।

दृष्टं साम[2] इति सूत्रोपरि कलिशब्दतः अपि ढक्विधानार्थं वार्तिकं वर्तते—'दृष्टं साम कलेर्ढक्' येन कलिनादृष्टं सामकालेयं सामगीयते इति निष्पद्यते, अत्र भाष्ये एतदनन्तरं तिष्ठति-अपर आह—सर्वत्राग्निकलिभ्यां ढक्—व्यापकवार्तिकेन अनेन सर्वेषु प्राग्दीव्यतीयेष्वर्थेषु ढक्विधानं क्रियते। अत्र स्पष्टमेव भाष्यकृता कस्यापरस्याचार्यस्य वार्तिकं प्रस्तुतम्।

एषां वार्तिकानां विवेचनेन स्पष्टरूपेण ज्ञायते यत् अपर आह इति उक्त्वा यानि वार्तिकानि भाष्ये तिष्ठन्ति तानि कात्यायनव्यतिरिक्ताचार्यप्रणीतानि वर्तन्ते। यत्तु श्रीरघुवीरविद्यालंकारेणोक्तं यत् यानि सूत्राणि कात्यायनवार्तिकविरहितानि वर्तन्ते तत्रापि भाष्यकृता अपर आह इति कथयित्वा अन्येषामाचार्याणां वार्तिकानि प्रस्तुतानि[3] तन्न समीचीनं, यतः श्रीविद्यालंकारेण उदाहरणार्थं यानि वार्तिकानि सूत्राणि वा प्रस्तुतानि तानि स्वयमेव निदर्शनानि यत् तत्र सर्वत्र सूत्रानन्तरं पूर्वं वार्तिकं तिष्ठति। तदनन्तरमेव अपर आह इति कथयित्वा वार्तिकान्तरं विद्यते। तथा च—प्रोपाभ्यां युजेरयज्ञपात्रेषु[4] 'इत्यत्र पूर्वं स्वराद्युपसृष्टात्' इति वार्तिकं तदनन्तरम् अपर आह—स्वराद्यन्तोपसृष्टात् इति वार्तिकम्। 'इको ह्रस्वोऽङ्यो गालवस्य'[5] इत्युपरि 'इको ह्रस्वत्वमुत्तरपदमात्रे' इत्युपसंख्यानवार्तिकम्। तदनन्तरं 'सर्वान्ते लोकविज्ञानम्' 'इयङुवङव्ययप्रतिषेधः' इति वार्तिकद्वयं तदा तिष्ठति—अपर आह—भ्रकारो भ्रुकुंसादीनामिति वक्तव्यम्। अत्र सर्वत्र पूर्वं वार्तिकं तिष्ठति तदनन्तरम् अपर आह इति उक्त्वा वार्तिकान्तरं तिष्ठति।

---

१. महा०, २।२।३४ इत्युपरि वार्तिकम्।
२. अष्टाध्यायी, ४।२।७
३. का० का० स० अ०, पृ० १६१
४. अष्टाध्यायी, १।३।६४
५. अष्टाध्यायी, ६।३।६१

महाभाष्ये वार्तिकानि नैकान्तं गद्ये एव तिष्ठन्ति प्रत्युत पद्ये अपि बहुशः पठ्यन्ते । किमिमानि श्लोकवार्तिकानि कात्यायनीयानि आहोस्विदन्याचार्यप्रणीतानि, प्रश्नोऽयं विवादास्पदः । श्रीवेदपतिमिश्रमते एषु श्लोकेषु कतिपयाचार्याणां कृतीनां समावेशः वर्तते, सम्भवतः एषु कात्यायनस्यापि श्लोकाः यतः 'कश्चात्र विशेषः' इत्यनन्तरं समागताः श्लोकाः कात्यायनीयाः किन्तु किं चातः इत्यनन्तरस्थाः श्लोकाः न कात्यायनकृताः[1] । तत्र 'किं चातः' इति कथयित्वा यद्वार्तिकं तिष्ठति तत्तु नूनमेव न कात्यायनप्रणीतं प्रत्युत भाष्यवचनमेव, यथा च 'च्छ्वोः शूडनुनासिके च'[2] इत्यत्र 'अथ क्ङिद्ग्रहणमनुवर्तते, आहो न ? इति क्ङिदनुवर्तनविचार-भाष्यानन्तरं किं चातः ? इति तिष्ठति तदनन्तरं' 'शूट्त्वे क्ङिदधिकारश्चेच्छः षत्वम् तुक्प्रसज्यते । निवृत्ते दिव ऊठ्भावस्तदर्थं तपरः कृतः' इत्यादिश्लोकवार्तिकं तत्तु भाष्यवार्तिकमेव यतः तत्र विश्लेषणानन्तरं भाष्यकार, आह—क्व पुनः क्ङिद्ग्रहणं प्रकृतम् ? अनुनासिकस्य क्विझलोः क्ङिति इति यदि तदनुवर्तते, अज्झनगमां सनि क्विझलोश्चेति क्विझलोरपि दीर्घत्वं प्राप्नोति, झलि तावन्न दोषः सनमत्र झल-ग्रहणेन विशेषयिष्यामः सनि झलादाविति । क्वावप्याचार्यप्रवृत्तिर्ज्ञापयति—नानेन क्वौ दीर्घत्वं भवतीति, यदयं 'क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसंप्रसारणं च' इति दीर्घत्वं शास्ति । अत्र कैयटाचार्यः—वाक्यकारो वच्यादिष्वजनानां दीर्घत्वं शास्ति, तेन ज्ञापयति—मण्डूकप्लुत्यादिभिन्यायैरिहैव क्ङिद्ग्रहणं सम्बध्यते न पूर्वत्रेत्यर्थः । एतेन ज्ञायते यत् वाक्यकारस्य—वार्तिककारस्यसिद्धान्तं विश्लेषयितुमेव भाष्यकारः उपर्युक्तं श्लोकवचनं प्रस्तौति ।

'कश्चात्र विशेषः' इत्यनन्तरमपि समागतानि श्लोकवार्तिकानि कात्यायनस्य न वर्तन्ते, यतः अस्माभिः पूर्वमेव स्पष्टीकृतं-यत् कश्चात्र विशेषः इत्यनन्तरस्थं वाक्यं कात्यायनीयं न तिष्ठति, श्लोकवार्तिकसम्बन्धेऽपि एकमुदाहरणं प्रस्तुमः येनेदं समर्थितं जायते-दो दद्धोः[3] इत्यनन्तरम् अवदत्तं विदत्तं च प्रदत्तं चाऽऽदिकर्मणि । सुदत्तमनुदत्तं च निदत्तमिति चेष्यति[4] । इति श्लोकवार्तिकं विद्यते तदनन्तरं 'कश्चात्र विशेषः' इति पठित्वा तान्ते दोषो दीर्घत्वं स्यात् दान्ते दोषो निष्ठानत्वम् ··· ···· ··· ··· ···· धान्ते दोषो धत्वप्राप्तिः ··· ··· ··· ··· ··· ·· थान्तेऽदोष-

---

१. व्या० वा० एक स० अ०, पृ० ७१

२. अष्टाध्यायी, ६।४।१६

३. अष्टाध्यायी ७।४।४६

४. महा०, ७।४।४६

स्तस्मात्थान्तम्[1] इति श्लोकवार्तिकम्। अत्र सर्वथा स्पष्टं यत् श्लोकस्य एकचरणं पठित्वा तस्य विश्लेषणं विधाय पुनः अपरचरणं तस्य च विश्लेषणमिति भाष्यशैली। उद्योतकारेणापि-'भाष्यकृतस्त्वयंभावः' इत्युक्त्वा भाष्यस्येदं श्लोकवार्तिकमिति समर्थितम्।

श्री पी० एस० सुब्रह्मण्याशास्त्री स्वीकरोति यत् सामान्यतः कात्यायनस्य वार्तिकानि गद्यमयानि वर्तन्ते किन्तु एषु तेन प्रणीतानि अपि कानिचित् वार्तिकानि विद्यन्ते तद्यथा हयवरट् सूत्रे–

प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न।
आचारादप्रधानत्वाल्लोपश्च बलवत्तरः[2]॥

किन्तु आस्माकीनं मतमितो भिन्नम्। वार्तिककारः कात्यायनः नूनमेव श्लोकवार्तिककारतः भिन्नः। न्यासकारेण श्रीमताजिनेन्द्रबुद्धिमहाशयेन बहुशः एवं स्पष्टीकृतम् तथा च न कोपधायाः[3] इति सूत्रस्थं 'कोपधप्रतिषेधे तद्धितवुग्रहणं कर्तव्यम्' इत्यस्य व्याख्यानावसरे उक्तं तेन-'इदं हि वार्तिककारमतमाश्रित्योक्तम्। तत् पुनः श्लोकवार्तिककारस्य सूत्रकारमतानुसारिणो दर्शनमाश्रित्य वक्ष्यति[4]।' तथैव 'धि च'[5] इति सूत्रस्थं ... ...

धिभस्योर्न सिध्येतु तस्मात्सिज्ग्रहणं न तत्।
छान्दसो वर्णलोपो वा यथेष्कर्तारमध्वरे॥[6]

इति श्लोकवार्तिकं संकेतयता भाष्यमतमुपस्थापयता च काशिकाकृता भाष्यकारस्त्वाह-चकाधीत्येव भवितव्यमिति 'इत्यस्य विश्लेषणं कुर्वन्नाह न्यासकारः' एवमिदं तावत् श्लोकवार्तिककारस्याभिमतं दर्शितम्। इदानीं भाष्यकारस्य मतं दर्शयितुमाह–'भाष्यकारस्तु आहेत्यादि'[7]। पदमञ्जरीकृतापि एतदेव समर्थितं तत्रैव-पूर्वं तु श्लोकवार्तिककारस्य मतं दर्शितम्[8]। पुनश्च तत्रैव सिज्ग्रहणसमर्थकविषयकं

---

१. महा०, ७।४।४६
२. Katyayana's Varttikas are generally prose though some of them are verses. P. S. Subrahmanya Shastri, *Lecture's on Patanjali's Mahabhasya*, vol. 1, 2nd, ed. p. XX–VIII.
३. अष्टाध्यायी, ६।३।३७
४. का०, ६।३।३७, सूत्रोपरि न्यासः।
५. अष्टाध्यायी, ८।२।२५
६. का०, ८, २।२५, सूत्रे श्लोकवार्तिकम्।
७. का०, ८।२।२५ सूत्रे न्यासः।
८. का०, ८।२।२५ सूत्रे पदमञ्जरी।

श्लोकवार्तिककाराभिमतं प्रदर्शयन् आह न्यासकारः—एवं श्लोकवार्तिककारमतेन सिज्ग्रहणं कर्तव्यमिति स्थितम्। तदुक्तम्–'घसिभसोर्न·········न तत् इति। ततश्च 'धि' सकारे सिचो लोपश्च काद्धीति प्रयोजनम्' इत्येतदवस्थितं श्लोकवार्तिककारस्य मतम्[1]।

विवेचनेनानेनेदं स्पष्टं यत् न्यासकारपदमञ्जरीकारावुभावपि स्पष्टरूपेण श्लोकवार्तिककारं कात्यायनतः पृथक्व्यक्तिरूपेण स्वीकुरुतः। प्रदीपकारः कैयटोऽपि श्लोकवार्तिककारं भिन्नं जनं मनुते तथा 'असिद्धवदत्राभात्[2]' इति सूत्रे 'यदि तर्हि अयं योगो नास्ति'—उत्तु क्नः कथमोर्विनिवृत्तौ, णेरपि चेटि कथं विनिवृत्तिः।

अब्रुवतस्तव योगमिमं स्यात्
लुक् च चिणो नु कथं न तरस्य[3]॥

इति भाष्यस्थं श्लोकवार्तिकं विवृण्वन् आह प्रदीपकारः—वार्तिककारोक्तेषु प्रयोजनेषु प्रत्याख्यातेषु श्लोकवार्तिककारोक्तप्रयोजनोपक्षेपः एतस्य विश्लेषणं कुर्वन् कथयति नागेशः—'वार्तिककारः—कात्यायनः। श्लोकवार्तिककारस्तु अन्य एवेति भावः'। एवं प्रयोजनाभावादस्य योगस्यानारम्भत्वे स्थिते श्लोकवार्तिककृता प्रयोजनान्युक्तानीति संगतिं दर्शयति प्रत्याख्यातेष्वित्यनेन[4]। तथा च 'अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे[5]' इति सूत्रव्याख्यानाय भाष्ये समागतानि—'प्रकर्षं चेत्तम कृत्वा·········दृष्टमभ्यन्तरं त्रिषु' इति श्लोकवार्तिकचतुष्टयानि विश्लेषयन् एतेषां निर्मातुः विषये आह उद्योतकारः 'एते श्लोकाः भाष्यकृत एव, न वार्तिककृतः, संपुटीकरणाभावात्'[6]। श्रीशिवदत्तोऽपि इदमेव मतं स्वीकरोति—'वाक्यवार्तिककारात् श्लोकवार्तिककारो भिन्न एवेति[7]।'

विश्लेषणेनानेन इदं स्पष्टीभवति यत् श्लोकवार्तिककारः कात्यायनाद् भिन्नः। अस्माकम्मते बहूनि श्लोकवार्तिकानि स्वयं भाष्यकृता प्रणीतानि तथा कानिचिद् अन्यैः आचार्यैश्च प्रणीतानि। कैंष्टादिविदुषां स्पष्टतया श्लोकवार्तिककारतः कात्यायनस्य भिन्नत्वनिरूपणम् इदमेव विशिनष्टि।

---

१. का०, ८।२।३५ सूत्रे पदमञ्जरी
२. अष्टाध्यायी, ६।४।२२
३. महाभाष्यम्, ६।४।२२
४. महा०, अ० ६।४।२२
५. महा०, ४।१।७८
६. महा०, उ० ४।१।७८
७. सिद्धा०, पृ० ५०५

महाभाष्ये कात्यायनव्यतिरिक्तवार्तिककाराणामुल्लेखः बहुशः लभ्यते।[1] तेषु भरद्वाजसौनागकुणरवाडव[2]क्रोष्ट्रीयादीनां वार्तिकान्यपि तिष्ठन्ति येषां चर्चा स्वयं भाष्यकृता कृता। एतेषामाचार्याणां नाम गृहीत्वा यानि वार्तिकानि भाष्यकारेणोक्तानि तानि तु स्पष्टतया कात्यायनवार्तिकतः पृथक्कर्तुं शक्यन्ते तथा च 'अपर आह' इत्यादिवचनैः अन्याचार्यवार्तिकानामुपस्थापनमपि कात्यायनवार्तिकतः एतेषां पृथक्त्वे सहायकं भवति।

'न वा' इति कथयित्वा यद्वचनानि महाभाष्ये अवलोक्यन्ते तान्यपि न कात्यायनीयानि। भाष्ये क्वापि 'सिद्धं तु' इत्यनेन वार्तिकारम्भः विधीयते क्वापि 'न वा' इत्यनेन। एक एव आचार्यः एकस्मिन् एव ग्रन्थे स्वकीयाभिमतसिद्धये द्विविधशैल्याः प्रायशः आश्रयणं न करोति। सिद्धं तु इति कथयित्वा समाधानेन यत् सौम्यत्वम् औदार्यं च प्रकटीभवति 'न वा' इति कथने तन्न तिष्ठति। 'सिद्धं तु' इत्यनेन यस्य आरम्भः तिष्ठति तद्वार्तिकविषये स्वयं भाष्यकृतापि उक्तं—'वार्तिकवचनप्रामाण्यादिति' सिद्धं तु क्वाङ्स्वतिदुर्गतिवचनात् प्रादयः क्तार्थे इति।[3] किन्तु 'न वा' इति प्रतीकेन यस्यारम्भः, तद्विषये क्वापि भगवता नोक्तं यदिदं वार्तिकमिति। तथा च "न वाऽस्त्रीपूर्वपदविवक्षितत्वात्' इति 'कुक्कुटयादीनामण्डादिषु पुंवद्वचनम्' इति उपसंख्यानवार्तिकानन्तरम् उपसंख्यानानर्थक्यबोधकवार्तिकत्वेन तिष्ठति। भाष्यकृता चोक्तं तत्र न वा वक्तव्यं, किं कारणम्? अस्त्रीपूर्वपदविवक्षितत्वात् ......—।[4] अत्र स्पष्टतया ज्ञायते यत् 'नवाऽस्त्री' इत्यादि वचनं भाष्यवार्तिकमेव न तु कात्यायनवार्तिकं यतः स्वयमुपसंख्यानं विधाय तस्य वैयर्थ्योत्पादनं कात्यायनेन कृतमिति न युक्तम्। एवमेव 'संयोगान्तस्य लोपे यणः

---

१. (क) भारद्वाजीयाः पठन्ति घुसंज्ञायां प्रकृतिग्रहणं शिद्विकृतार्थम्।
महा०, १।१।२०

(ख) एवं हि सौनागाः पठन्ति—नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम्। महा०, ३।२।५६

(ग) तत्र सौर्यभगवतोक्तमनिष्टिज्ञो वाडवः पठति। महा० ८।२।१०६

(घ) सिद्धंत्विवदितोरिति वार्तिकं वाडवस्य, महा०, उद्यो०, ८।२।१०६

(ङ) परिभाषान्तरमिति च मत्वा क्रोष्ट्रीयाः पठन्ति नियमादिको गुणवृद्धी भवतो विप्रतिषेधेन, महा०, १।१।३

२. महा०, २।२।१८

३. महा०, २।२।१८

४. महा०, ६।३।४२

प्रतिषेधः[1]', इति वार्तिकानन्तरं समागतं 'न वा झलो लोपात्' इति प्रत्याख्यानवार्तिकं भाष्यवार्तिकमेवेति अनुसन्धेयम् ।

डॉ० एफ० कीलहॉर्नमहोदयस्य अभिमतं विद्यते यत्र भाष्ये 'उक्तं वा' इति वचनं तिष्ठति अथवा तदनन्तरं यत् वचनं समागच्छति तत् सर्वं स्वयं वार्तिककृतः एव वर्तते । एतस्य प्रमाणत्वेन स कथयति यत् इदं तु निश्चितं यत् यत्र कात्यायनः 'उक्तम्' अथवा 'उक्तं वा' इतिशब्दैः स्वकीयापरवार्तिकानामुद्धरणं प्रयच्छति तानि प्रायशः सर्वाण्येव वार्तिकानि महाभाष्ये उपलभ्यन्ते ।[2] यद्यपि इदं तु निश्चप्रचमेव यत् क्वापि उक्तं वा इति कथयित्वा कात्यायनस्यापि वार्तिकानि वर्तन्ते, तद्यथा स्थानिवदादेशोऽनल्विधौ[3] इत्यत्र अपवादप्रसंगस्तु स्थानिवत्त्वात् इत्यनन्तरम् उक्तं वा इति वार्तिकं, यद्विषये नागेशः कथयति—'भाष्ये उक्तं वेति वार्तिकस्योक्तमित्यंशं व्याचष्टे ·· ·· ••• ।' अत्र नागेशस्य स्पष्टमभिमतं यदिदं वार्तिकमिति । किन्तु उक्तं वा इति कथयित्वा यत् कात्यायनवार्तिकम् उपलभ्यते तत् प्रायः विरलमेव । 'उक्तं वा' इति वचनानां सामग्र्येण यदानुशीलनं विधीयते तदा इदं स्पष्टरूपेण ज्ञायते यत् उक्तम् इति पदद्वारा उद्धृतानि वाक्यानि भाष्यकृत एव भवन्ति न तु वार्तिककृतः । तथा च स्थानिवदादेशोऽनल्विधौ इत्यत्र 'करोतिपिबत्योः प्रतिषेधः इत्यनन्तरम्' उक्तं वा इति वचनं समागच्छति तत्र भाष्यवार्तिकमेव इति प्रसंगावलोकनेन स्पष्टरूपेण ज्ञायते । 'हलादिः शेषः[4]' इति सूत्रे, 'तस्मादनादिलोपः' इत्यनन्तरम् उक्तं वा इति कथयित्वा भाष्यकारेणोक्तं किमुक्तं प्रति विधास्यते हलादि शेष इति । अयमिदानीम्प्रतिविधान कालः इदं प्रतिविधीयते ·· ·· ••• इदं प्रकृतमत्र लोपोऽभ्यासस्य इति । अत्र वचनमिदम् 'अजादेर्द्वितीयस्येति[5], सूत्रे भाष्यस्थं' 'सति तस्मिन् प्रतिषेध इति चेद्धलादिशेषः दोषः'

---

१. महा०, ८।२ २३

२. A very Strong argument in fovour of the assumption that patanjali has recorded and commented on all the varttikas of katyayana is furnished by the fact that whenever katyayana in such words as उक्तं or उक्तंवा refers to another of his varttikas the varttika so instanced or referred to is invariably to be found in the Mahabhashya. —F. Keilhorn.

Katyayana and Patanjali P. 45 & 46 F. N.

३. महा०, १।१।५६

४. महा०, ७।४।६०

५. महा०, ६।१।२

लोकवद्धलादिशेषे' इति वचनद्वयानन्तरं 'ननु चोक्तं सति तस्मिन् प्रतिषेध इति चेद्धलादिशेषे दोष इति, प्रतिविधास्यते हलादिशेषे' इति पूर्वप्रतिश्रुतप्रतिविधानस्य संकेतकम्। इदं तु नूनमेव भाष्यकृतः वचनम्, यतः यदि 'प्रतिविधानार्थं कात्यायनः हलादिशेषः' इत्यत्र किमपि उक्तवान् भवेत् तदा तु कापि संगतिः भवितुमर्हति परन्तु इह पूर्णतः भाष्यकारस्यैव प्रतिविधानत्वम्, इत्युभयवचनस्य परस्परं संगतिरपि न तिष्ठति एतेन स्पष्टमेव यत् उक्तं वेति पदात्मकं वाक्यं मुख्यतया भाष्यकृत एव।

महाभाष्ये 'अत उत्तरं पठति' इति वाक्यानन्तरं यद्वार्तिकं तिष्ठति तद् कात्यायनस्य विद्यते किन्तु वाक्यस्यास्य पूर्वं यत् किंचित् तिष्ठति तत्तु भाष्यकारस्य स्वकीयवचनं वार्तिकं वा, इति युद्धिष्ठिरमीमांसकेन प्रोक्तं[1] तदपि न समीचीनम्। यतः तेन कृंचानुप्रयुज्यते लिटि[2], वदव्रजहलन्तस्याचः[3] इत्यादिसूत्रेषु अत उत्तरं पठति इत्यनन्तरं पठितानि वार्तिकानि उदाहरणत्वेन प्रस्तुतानि तथा च प्रतिपादितं मित्रमहाशयेन यद् अत उत्तरं पठति इत्यतः पूर्वं यत्किंचिदपि वचनं वर्तते तत् भाष्यवचनं भवति न तु वार्तिककृतः। किन्तु तथ्यमिदं 'भूते' इति सूत्रप्रकरणे ध्यातव्यम्। तत्र विश्लेषणक्रमे निष्ठायामितरेतराश्रयत्वात् प्रसिद्धिः इत्याक्षेपवार्तिकम्, अव्ययनिर्देशात् सिद्धम् इति समाधानवार्तिकं, न वा तद्विधानस्यान्यत्राभावात् इति अधिकारवैयर्थ्याक्षेपवार्तिकम् इति वार्तिकत्रयम् अत उत्तरं पठति इत्यतः पूर्वं तिष्ठति। तदनन्तरं 'प्रयोजनं कुमारघाती शीर्षघाती आखुहा विडालः सुत्वानः सुन्वन्तः सुसुपुषोऽनेहाः अग्निमादधानस्य इति समाधान वार्तिकं पठति आचार्यः। इह यदि केवलं प्रयोजनमित्यादिरित्येव कात्यायनस्य वार्तिकं तिष्ठतीति वाच्यं तत्तु असमीचीनमेव, यतः 'भूते' इति सूत्रस्य विश्लेषणक्रमे पूर्वं स्वयमेव भाष्यकारेण विभिन्नप्रश्नानामुपस्थापनं कृतं तदनन्तरमेव तेषां समाधानं च विहितम् अतः भाष्यशैलीमवलम्ब्य एव इमानि वार्तिकानि तिष्ठन्ति। 'प्रयोजनं कुमारघाती' इत्याद्यपि कस्यापि मंत्रस्य अंशरूपेणोपलक्ष्यते न तु कात्यायनवार्तिकरूपेण। 'कृञ्चानुप्रयुज्यते लिटि[4]' इत्यत्र अत उत्तरं पठति इत्यनन्तरं 'कृञोनुप्रयोगवचनमस्तिभुवोः प्रतिषेधार्थम्' इत्यपि भाष्यवार्तिकमेव तिष्ठति यत्तु तत्प्रसंगध्यानात् स्पष्टमेवावलोक्यते। भूवादयो धातवः[5] इत्यत्र कुतोऽयंवकारः इति प्रश्नानन्तरम्

१. व्या० वा० एक० स० अ०, पृ० ७४–७५
२. अष्टाध्यायी, ३।१।४०
३. अष्टाध्यायी, ७।२।३
४. अष्टाध्यायी, ३।१।४०
५. अष्टाध्यायी, १।३।१

अत उत्तरं पठति भूवादीनां वकारोऽयं मंगलार्थः प्रयुज्येत 'इति कात्यायनवार्तिकं न वर्तते प्रत्युत भाष्यवार्तिकं यतः तत्र स्पष्टतः भाष्यकारः' 'मांगलिक आचार्यः महतः शास्त्रौघस्य मंगलार्थं वकारमागमं प्रयुंक्ते। मंगलादीनि मंगलमध्यानि मंगलान्तानि शास्त्राणि प्रथन्ते वीरपुरुषाणि भवन्ति आयुष्मत्पुरुषाणि च, अध्येतारश्च मंगलयुक्ता यथा स्युरिति' इति कथयति तत्तु स्पष्टतः सूत्रे वकार-प्रयोजनस्य विश्लेषणं विद्यते। तत्रत्यं प्रदीपकारोक्तम् उद्योतकारोक्तं चावलोक्यं इदं स्पष्टमेव। अत उत्तरं पठति इत्यतः पूर्वं भाष्यवचनमेव तिष्ठति न कात्यायनीयम्, इति यदुक्तं श्रीमिश्रेण तथा श्रीविद्यालंकारेण[1] च यदुक्तं यत् अत उत्तरं पठति' इत्यतः अव्यवहितोत्तरं वचनं कात्यायनवार्तिकं तदपि न पूर्णतया समीचीनं यतः 'इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ'[2] इति सूत्रोपस्थापनानन्तरं वार्तिकं तिष्ठति' अन्वादेशे समानाधिकरणग्रहणम्[3]—(अत्र कैयटः पश्चात्कथनमात्रमन्वादेशः', इति कथयति, तत्पदमादाय नागेशः कथयति—कथितानुकथनस्यान्वादेशत्वे वार्तिका-नुत्थानादाह—पश्चादिति), तदनन्तरम् अपरं वार्तिकं तिष्ठति अन्वादेशश्च कथितानुकथनमात्रम् एतस्य व्याख्यानावसरे भाष्यकार आह—अन्वादेशश्च कथितानुकथितमात्रं द्रष्टव्यं तद्द्वेष्यं विजानीयाद्—इदमाकथितमिदमेव यदानुकथ्यत इति। तदाचार्यः सुहृद्भूत्वान्वाचष्टे—अन्वादेशस्य कथितानुकथितमात्रं द्रष्टव्य-मिति[4]। अत्र स्पष्टरूपेण ज्ञायते यत् वार्तिकद्वयमिदं कात्यायनप्रणीतम्। प्रथम-वार्तिकस्य व्याख्यानावसरे कैयटमतं विवृण्वन् कथयति नागेशः कथितानुकथनस्या-न्वादेशत्वे वार्तिकानुत्थानादाह। उत्तरवार्तिकस्य विश्लेषणाय कथयति प्रदीपकृत प्रत्यासत्येदमेव कथितं यदानुकथ्यते तेनैव तदान्वादेशो भवतीति भ्रान्तिनिवारणाय वार्तिकम्। उद्योतकृता चोक्तं—'तथा च स्वतात्पर्यं वार्तिककृता वार्तिकान्तरेण' व्याख्यातमिति भावः। वार्तिकद्वयस्यानन्तरम् अत उत्तरं पठति इति कथयित्वा 'अशादेशवचनं साकच्कार्थम्' इति तिष्ठति तदनन्तरं शित्करणं सर्वादेशार्थम् इत्यादिवार्तिकानिवर्तन्ते। तानि सर्वाणि प्रसंगावलोकनेन भाष्यवचनानि एव प्रतिभान्ति[5]। विवेचनस्य नेदं तात्पर्यं यत् अत उत्तरं पठति इत्यनन्तरस्थं यत्र क्वापि वार्तिकं तिष्ठति तत् सर्वं कात्यायनकृतं न वर्तते, प्रत्युत वाक्यस्यास्य पूर्वं कात्यायनवार्तिकं न तिष्ठति। वाक्यादनन्तरं कात्यायनवार्तिकमेव तिष्ठति इति

१. का० का०, स० अ० पृ० १३६
२. अष्टा०, २।४।३२
३. तत्रैव वार्तिकम्
४ महा०, २।४।३२
५. महा०, २।४।३२

यः दुराग्रहः समालोचकानां तिष्ठति तद्विषये आस्माकीनः निवेशः वर्तते यत् सर्वथा इदं मतं न स्वीकार्यम्। भाष्ये एवंविधान्यपि कात्यायनवार्तिकानि वर्तन्ते यानि अत उत्तरं पठति इत्यनन्तरं समागतानि वर्तन्ते किन्तु तेषां प्रत्यभिज्ञानस्य अपरः उपायः अवलम्बनीयः। तद्यथा प्रायशः सर्वत्र सूत्राक्षरमवलम्ब्य यत् वार्तिकानि एषु स्थलेषु समागतानि वर्तन्ते तानि कात्यायनीयानि वर्तन्ते-तद्यथा-अनुर्लक्षणे[1] इत्यत्र अनुर्लक्षणे वचनानर्थक्यं सामान्यकृतत्वात् इति वार्तिकम्। यथा च 'अनेकमन्यपदार्थे'[2] इत्यस्य विवेचनसन्दर्भे स्वयं भाष्यकारः विभिन्नां शंकां समुपस्थाप्य तेषां समाधानार्थं कात्यायनवार्तिकं प्रस्तौति—अनेकवचनमुपसर्जनार्थम् 'किन्तु एतदनन्तरं यानि वार्तिकानि वर्तन्ते तानि समान्येव भाष्यवचनानि, यतः कात्यायनवार्तिकविश्लेषणाय एव एषामुपस्थापनं तत्र तिष्ठति। एवमेव काम्यच्च[3] इत्यत्र चकारप्रत्याख्यानपुरस्सरं काम्यचश्चित्करणानर्थक्यं कस्येदर्थाभावात्' इति वार्तिकं कात्यायनप्रणीतमेव अत्र केचिद् व्याचक्षते—'अन्तेऽस्य चकारोऽनर्थक-धातुस्वरेणैवान्तोदात्तत्वस्य सिद्धत्वात् स आदौ कर्तव्य·········इत्यादिपदमञ्जरी-कारव्याख्यानमालोचयता काम्यचश्चित्करणानर्थक्यमिति वार्तिकविरोधेन पुत्रिकामिष्यतीत्यादौ सति शिष्टस्य स्वरं बाधित्वाचित् स्वर एव यथा स्यादिति चित्त्वमिति हरदत्तोक्तमपास्तम्[4]' इति उद्योतकारवचनेन स्पष्टं परिज्ञायते।

श्रीयुधिष्ठिरमीमांसकेन वार्तिकस्वरूपविश्लेषणक्रमे उक्तं यत् महाभाष्ये विभिन्नस्थलेषु 'अत्यल्पमिदमुच्यते' इति कथयित्वा कात्यायनीयवार्तिकेभ्यः विस्तृतानि वार्तिकानि उद्धृतानि सन्ति। एतस्य पूर्णसम्भावना वर्तते यत् इमानि सर्वाणि वार्तिकानि सौनागीयानि एव विद्यन्ते।[5] श्रीवेदपतिमिश्रोऽपि एतदेव समर्थयन् आह यत् इदं सम्भवं यत् भाष्ये 'अत्यल्पमिदमुच्यते इत्युक्त्वा यानि वचनानि तिष्ठन्ति तानि सौनागानां वर्तन्ते। यावत् विषयेऽस्मिन् विरोधिप्रमाणानि नोपलभ्यन्ते तावत् इदमेव मतं स्वीकार्यम्।'[6]

श्रीविद्यालंकारमते अत्यल्पेत्यादिना भाष्यकारः प्रायशः स्वकीयमतोद्भावनमेव कुरुते। यत्र कात्यायनवार्तिकेषु संशोधनमभीष्टमासीत् तत्रैव पतञ्जलिना

---

१. अष्टा०, १।४।८३
२. अष्टा०, २।२।२४
३. अष्टा०, ३।१।९
४. महा० उद्यो०, ३।१।६
५. सं० व्या० शा० का इति०, भाग १
६. व्या० वा० एक स० अ०, पृ० १३५

अत्यल्पेत्युक्त्वा स्वकीयवार्तिकानि उपस्थापितानि। तन्मते कैयटोपाध्यायस्यापि एवमेवाभिमतं,[१] तद्यथा तेनोऽक्तं वार्तिकस्याव्याप्तिमुद्भावयन् भाष्यकार आह —'अत्यल्पमिति'।[२] यत्र सूत्रे वार्तिकाभावः तिष्ठति किन्तु शब्दनिष्पत्तये एतस्यावश्यकता वरीवर्ति तत्र भाष्यकारेण स्वकीयविचारोद्भावनाय अत्यल्पमित्यादिकथितम्।[३] एवंचतेन विचारितं[४] यत् यद्यपि भाष्यकृत् अत्यल्पेत्यादिना स्वशब्दैरेव सूत्रेषु वार्तिकेषु च संशोधनं प्रस्तौति किन्तु कतिपयेषु स्थलेषु अपवादाः अपि लभ्यन्ते तद्यथा 'टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः'[५] इति सूत्रे कात्यायनस्य षष्ठं वार्तिकं वर्तते 'ख्युन उपसंख्यानम्' अत्र भाष्यकृतोक्तम् अत्यल्पमिदमुच्यते ख्युन इति, नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम्। किन्तु ३।२।५६ सूत्रे ४।१।८७ सूत्रे च भाष्यकारेण सौनागानां वार्तिकत्वेन उभयोः वार्तिकत्वं स्वीकृतम्[६]।

डॉ० रामसुरेशत्रिपाठी तु इदं कथयति यत् अत्यल्पमिदमुच्यते इत्यव्यवहितोत्तरस्थानि वार्तिकानि भाष्यकृतः तिष्ठन्त्येव नहि[७], प्रायः एतस्य आधारः मीमांसकमहोदयस्यमतमेव तिष्ठति, डॉ० कीलहॉर्नमहाशयमते केवलं द्वित्राणि स्थलानि परित्यज्य अत्यल्पेत्यादिवचनानन्तरं पठितानि वचनानि सामान्यतः भाष्यवचनान्येव[८]।

एतेषां विचारकाणां विवेचनेन इदं स्पष्टीभवति यत् एभिः अत्यल्पेत्यादिवचनान्वितवचनविषये इदं स्वीकृतं यत् इदं वचनं भाष्यकृतः वर्तते सौनागानां वा तिष्ठति किन्तु कात्यायनस्य न विद्यते, एतद्विषये तु इमे सर्वे महानुभावाः ऐकमत्यमेव भजन्ते। अत्र समेषामेषां विचाराः समालोच्यन्ते—

सौनागानां वार्तिकानि महाभाष्ये सप्तसूत्रोपरि तिष्ठन्ति तत्र कुगतिप्रादयः[९]

---

१. का० का० स० अ०, पृ० १३८
२. महा०, प्र० ३।२।३०
३. का० का० स० अ०, पृ० १३८
४. तदेव, पृ० १३९
५. अष्टा०, ४।१।१५
६. एवं हि सौनागाः पठन्ति नञस्नञ इति महा०, ३।२।५–४।१।८७
७. डॉ० रामसुरेश त्रिपाठी, महाभाष्य के अन्तर्गत वार्तिकों के स्वरूप पर विचार, पृ०–१२५।
८. का० का० स० अ०, पृ० १।३९ इत्यत्र उद्धृतम्।
९. अष्टा०, २।२।१८

इति सूत्रे नवसौनागवार्तिकानि तिष्ठन्ति। सौनागवार्तिकानां विषये द्विविधा शैली महाभाष्ये उपलभ्यते। एकत्र 'एतदेव च सौनागैर्विस्तरतरकेण पठितम्'[1] इति, अपरत्र 'एवं हि सौनागाः पठन्ति'[2] इति कथयित्वा वचनानि तिष्ठन्ति। अत्यल्पमिदमुच्यते इति कथयित्वा केवलमेकमेव सौनागवार्तिकं भाष्ये लभ्यते—'तत्तुटिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्क्वरपः'[3] इति सूत्रे 'रव्युन उपसंख्यानमिति' कात्यायनवार्तिकस्य पूरकरूपेण तिष्ठति 'नजस्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम्'। वार्तिकमिदं सौनागप्रणीतमिति आढ्यसुभगेति सूत्रे तथा च 'स्त्रीपुंसाभ्यां नञ्स्नञौ०'[4] इत्यादिसूत्रे महाभाष्यकृता स्पष्टरूपेणोक्तम् एवं हि सौनागाः पठन्तीत्यनेन।

विवेचनस्यास्य इदं तात्पर्यं यत् भाष्ये यत्र क्वापि सौनागवार्तिकं तिष्ठति तत्र नाम्ना पतञ्जलिना अभिधानं कृतम्, अतः इतो व्यतिरिक्तेषु वार्तिकेषु सौनागवार्तिकत्वोपस्थापनविषयकं विदुषां मतं भ्रान्तिपूर्णमेव। यत्तु युधिष्ठिरमीमांसकमहोदयेन, रामसुरेशत्रिपाठिमहाशयेन, वेदपतिमिश्रेण, चोक्तम्—अत्यल्पेत्यादिवचनानन्तरमागतं सर्ववचनं सौनागवार्तिकं वर्तते इति तु सर्वथा संगतिरहितमेव। यतः अत्यल्पेत्यनन्तरं केवलं नञ्स्नञीकक्० इत्यादिवचनमेव सौनागवार्तिकं विद्यते। अत्यल्पमिदमुच्यते इत्युक्त्वा यानि वचनानि तिष्ठन्ति तत्र कतिपयवचनानामनुशीलनेन एतेषां विषये स्पष्टतया ज्ञायते।

गाङ्कुटादिभ्योऽञ्णिन्ङित्[5] इति सूत्रे वार्तिकं तिष्ठति 'मेश्चाननुबन्धकस्याम्वचनम्' तत्र वार्तिकपूर्तिभाष्यं विद्यते—'अत्यल्पमिदमुच्यते—'मे'रिति।' 'तिप्सिब्मिपा'मिति वक्तव्यम्[6]। अत्र प्रदीपकार आह—वार्तिककारस्याव्याप्तिमुद्भावयन् आह—अत्यल्पमिति[7]। उद्योतकारमते—'वस्तुतस्तु' परस्मैपदानां णलतुविदो लटो वे'त्यादौ यथासंख्यनिर्वाहाय परस्मैपदानां क्रमेणोपस्थितये 'तिप्त'सित्यादिसूत्रस्थक्रमेणोपस्थितौ

1. महा०, २।२।१८ अत्र प्रदीपकारः– कात्यायनभिप्रायमेव प्रदर्शयितुं सौनागैर्विस्तरकेण पठितमित्यर्थः।
2. अष्टा०, ३।२।५७, ४।१।१५, ४।१।७४, ४।१।८७, ४।३।१५४, ६।१।९५, ६।३।४२
3. अष्टा०, ४।१।१५
4. अष्टा०, ३।२।५६, ४।१।८७
5. अष्टा०, २।४।४९
6. महा०, २।४।४९
7. महा०, प्र० २।४।४९

सानुबन्धकयोरेवोपस्थितिरिति भाष्याशयः'[1]। प्रदीपोद्योतयोः विवेचनेन परिज्ञायते यत् सर्वथा इदं भाष्यवचनम्, न तु सौनागवचनम्। 'धातोरेकाचो हलादेः क्रियासमभिहारेयङ्[2]' इत्यत्र ऊर्णोतेश्चोपसंख्यानामिति कात्यायनवार्तिकं तत्र अत्यल्पमिदमुच्यते 'ऊर्णोतेरिति कथयित्वा सूचिसूत्रिमूत्र्यटचर्त्यशूर्णोतिग्रहणं यङ्विधावनेकाजहलाद्यर्थम्' इति न्यूनतापूरकवार्तिकं[3] भाष्यवार्तिकमेव तिष्ठति। 'सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो 'णिच्'[4] इत्यत्र 'सत्यस्य कृञ्यापुक् च' इति वार्तिकस्य न्यूनताप्रदर्शनार्थं भाष्ये तिष्ठति—'अत्यल्पमिदमुच्यते सत्यस्य इति णिविधावर्थवेदसत्यानामापुक् च वाच्यम्' इति भाष्यवचनतात्पर्यम्[5]। 'अरण्यान्मनुष्ये' इति सूत्रस्य 'अत्यल्पमिदमुच्यते मनुष्य इति' कथयित्वा अव्याप्तिमुद्भावयन् भाष्यकारः प्रस्तौति स्वकीयं वचनम्पथ्यध्यायन्यायविहारमनुष्यहस्तिष्विति वक्तव्यम्,[6] कद्रुकमण्डल्वोश्छन्दसि[7] सूत्रांशपूरकभाष्यम्—'अत्यल्पमिदमुच्यते कद्रुकमण्डल्वोरिति कद्रुकमण्डलुमधुजतु, पतयालूनामिति वक्तव्यम्[8]' इत्यपि स्पष्टमेव सूत्रस्य सम्पूरकं भाष्यवचनम्। न पदान्ताट्टोरनाम्[9] इत्यत्र 'अत्यल्पमिदमुच्यते अनामिति अनाम्नवतिनगरीणां चेति वक्तव्यम् इति सूत्रांशपूरकं भाष्यवचनमेव। 'नाडीमुष्ट्योश्चेति' सूत्रे 'नासिकायांध्मश्च घेटश्चेति' वार्तिके अव्याप्तिमुपस्थापयता भाष्यकृतोक्तम् 'अत्यल्पमिदमुच्यते नासिका नाडीमुष्टिघटीखारीषु[10]'। उद्योतकारमते अत्र अपिना नाडीमुष्ट्योश्चेति सूत्रस्यापि अव्याप्तिः दूरीकृता[11]। एतेनापि स्पष्टमेव ज्ञायते यदिदं भाष्यवचनमेव। 'कष्टाय क्रमणे' इति सूत्रे न्यूनताप्रदर्शकं भाष्यं वर्तते—'अत्यल्पमिदमुच्यते कष्टायक्रमणे[12] इति'।

---

१. महा०, उ० २।४।४९
२. अष्टा०, ३।१।२१
३. महा०, ३।१।२१
४. अष्टा०, ३।१।२५
५. महा०, ३।१।२५
६. महा०, ४।२।१२९
७ अष्टा०, ४।१।७१
८ महा०, ४।१।७१
९. अष्टा०, ८।४।४२
१०. महा०, ३।२।३०
११. महा० उ० ३।२।३०
१२. अष्टा०, ३।१।१४

विवक्षितवार्तिकमिदं तिष्ठति सत्रकक्षकष्टकृच्छ्रगहनेभ्यः कण्वचिकीर्षायाम्[1]। अत्र अपरस्य कस्याप्याचार्यस्य मतं विवृण्वता भाष्यकृता उक्तम् 'अपर आह समादिभ्यश्चतुर्थ्यन्तेभ्यः क्रमणेऽनार्जवे क्यङ् वक्तव्यः'। अत्र उद्योतकृता यदुक्तम् 'अतएव सूत्र थंव्याख्यानोत्तरम् अत्यल्पमिदमुच्यते कष्टाय क्रमणे इति। सत्रादिभ्यः कण्वचिकीर्षायामिति वक्तव्यम् इत्युत्तरभाष्यं संगच्छते[2], इत्यनेनापि ज्ञायते यत् कात्यायनव्यतिरिक्तमेवेदं वार्तिकम्। एवमेव ३।१।६७, ३।१।१३८, ४।१।६७, ५।१।१०, ७।३।३४, ७।४।३५, इत्यादिसूत्रस्थभाष्यानुशीलनेनापि ज्ञायते यत् एकस्मिन् स्थाने एव अत्यल्पमिदमुच्यते इत्युक्त्वा समागतंवचनं सौनागवचनं तिष्ठति अन्यत्र न क्वापि एतस्योपपत्तिः।

महाभाष्ये द्वित्राणि एवंभूतानि स्थलानि तिष्ठन्ति यत्र अत्यल्पमुच्यते इति प्रतीकानन्तरं समागतानि वचनानि कात्यायनवार्तिकानि तिष्ठन्ति तद्यथा—'पंचमी भयेन' इति सूत्रे वार्तिकावतरणभाष्यम् अत्यल्पमिदमुच्यते 'भयेन' इति तदनन्तरं वार्तिकं समायाति 'भयभीतभीतिभीभिः'। एतदनन्तरं कस्याप्यपरस्य आचार्यस्य मतमुपस्थापितं तिष्ठति-अपर आह भयनिर्गतजुगुप्सुभिः इत्यादिना[3]। भयभीतेत्यादिवार्तिकं विश्लेषयता कैयटाचार्येणापि एतस्य कात्यायनवार्तिकत्वमेवोररीकृतम्-भयेनेति स्वरूपग्रहणादव्याप्तिं मत्वा, वार्तिकारम्भः[4]। एवमेव 'अन्तः पूर्वपदाट्ठञ्'[5] इत्यत्र वार्तिकावतरणभाष्यम् अत्यल्पमिदमुच्यते इति वरीवर्ति, तदनन्तरं संग्राहकवार्तिकं तिष्ठति—'समानस्य तदादेश्च अध्यात्मादिषु चेष्यते' इति[6]। तथैव 'इच्छा'[7] इत्यत्र आक्षेपभाष्यम् अत्यल्पमिदमुच्यते इति पुरस्कृत्य—वार्तिकं तिष्ठति इच्छापरिचर्यापरिसर्यामृगयाटाट्यानामुपसंख्यानम् इति। सिद्धान्तकौमुदीमतेनापि एषां स्थलानां वार्तिकत्वं, तत्त्वबोधिनीकृता, बालमनोरमाकारेण चापि इदं समर्थितं भवति। एवंच विद्यालंकारमहाशयस्य इदमपि कथनं सर्वथा पूर्णतां न लभते यत् अत्यल्पमिदमुच्यते इत्यनन्तरस्थं सर्वं वचनं भाष्यवचनमेव वर्तते। वस्तुतः एतद्विषये कीलहॉर्नमहाशयस्य मतमेव अस्माभिरपि समर्थ्यते यत् द्वित्राणि स्थानानि परित्यज्य अत्यल्पेत्यनन्तरं समागतं सर्वं वचनं भाष्यकृत एव।

१. महा०, ३।१।१४
२. महा०, उ० १।१।१४
३ महा०, २।१।३६
४. महा० प्र०, २।१।३६
५ अष्टा०, ४।३।६०
६. महा०, ४।३।६०
७. अष्टा०, ३।३।१०१

'एवं तर्हि' इति प्रतीकानन्तरं समागतानि वार्तिकानि भाष्यकृत एव तिष्ठन्ति 'हलन्ताच्च'[१] इति सूत्रे एवं तर्हि दम्भेर्हल् ग्रहणस्य जातिवाचकत्वात् सिद्धम् 'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः'[२] इत्यत्र एवं तर्हि नानार्थाः 'साधकतमं करणम्'[३] इत्यत्र एवं तर्हि लोकतः एतत्सिद्धम् 'द्विर्वचनेऽचि'[४] इत्यत्र, एवं तर्हि द्विर्वचनानिमित्तेऽच्यजादेशः स्थानिवदिति वक्ष्यामि, इत्याद्युदाहरणानामवलोकनेन स्पष्टरूपेण तथ्यमिदं समर्थितं भवति। एवमेव यद्येवम् एकमपि इदं तर्हि, इत्यादिवचनानन्तरं समागतानि वचनानि भाष्यवचनान्येव तिष्ठन्ति न तु कात्यायनकृतानि।

यत्तु काशिकायां वार्तिकानामन्ते वक्तव्यम्, उपसंख्यानम्, वाच्यम् इत्यादिकं तिष्ठति तत्सम्बन्धे डॉ० रामसुरेश त्रिपाठी कथयति यत् काशिकाकृतः पूर्वं वक्तव्यं वार्तिकं च पृथक्-पृथक् आस्ताम्। काशिकाकारेण वक्तव्यवार्तिकयोः एकत्र समन्वयः कृतः। एवमेव तन्मते संभवतः काशिकाकारः अधिकं यथा स्यात्तथा संक्षेपतः स्वटीकायाः प्रस्तुतिं वांछितवान् तथा वार्तिकानां निर्देशाय किमपि चिह्नमपि प्रस्तुतं कर्तुं स ऐच्छत् तत् चिह्नं वक्तव्यम् इत्यत्र तेन प्राप्तम्। फलतः वक्तव्यम् इत्यस्य वार्तिकम् इत्यस्य च एवं सम्बन्धनं संजातं यत् कालान्तरे वार्तिकपाठाः एव विकृताः संजाताः[५]। पुनः श्रीत्रिपाठिमहाभागः कथयति यत् वक्तव्यम् इत्यनेन युक्तानि वाक्यानि कात्यायनस्य मूलवार्तिकानि न वर्तन्ते तथा च कात्यायनवार्तिकैः सह वक्तव्यमित्यंशस्य अन्वयस्य प्रारम्भः भाष्यकारेण एव कृतः, भाष्यकृतः स्वकीयवार्तिकान्यपि वक्तव्यमित्यंशेन युक्तानि तिष्ठन्ति। श्रीविद्यालंकारेणापि वक्तव्यवार्तिकयोः समस्या स्वकीयपुस्तके समुपस्थापिता[६]। वस्तुतः अस्याः समस्यायाः अस्माकम्मते प्रसरः एव न वर्तते। वक्तव्यम् इति तु वार्तिकम् इतिवत् किमपि तथाभूतं तत्वं तिष्ठतीति विचारस्यास्य नावकाशः। कात्यायनवार्तिकानां विश्लेषणपुरस्सरमेव भाष्ये वक्तव्यम् इति उक्तम्; नैकान्तं वक्तव्यमेव तिष्ठति प्रत्युत वाच्यम् इत्यपि तिष्ठति। भाष्यस्य वक्तव्यम्, वाच्यम्, उपसंख्यानम्, कर्तव्यः-इत्याद्याधृत्य काशिकाकृता, प्रक्रियाकृता,

---

१ महा०, १।२।१०

२. महा०, १४३७

३. महा०, १।४४२

४. महा०, १।१।५९

५. महाभाष्य के वार्तिकों के स्वरूप पर विचार।

६. का० का० स० अ० पृ० १३०–१३१

सिद्धान्तकौमुदीकारेण च वार्तिकेषु एषामंशानां समन्वयः विहितः। 'एङि० पररूपम्'[1] इत्यत्र 'शकन्ध्वादिषु च' इति कात्यायनवार्तिकं, तत्र भाष्यस्य व्याख्यानं वरीवर्ति 'शकन्ध्वादिषु पररूपं वक्तव्यमित्यर्थः'। इदमेवाश्रित्य काशिकायां शकन्ध्वादिषु पररूपं वक्तव्यम् प्रक्रियायां-सिद्धान्तकौमुद्यां च शकन्ध्वादिषु पररूपं वाच्यमिति वार्तिकस्वरूपम्। 'खच्च डिद्वा'[2] इति मूलवार्तिकं, भाष्ये एतस्य व्याख्यानमेवं तिष्ठति-'खच्च डिद्वा वाच्यः'। भाष्ये 'डे[3] च' इति मूलवार्तिकं व्याख्यानं 'डे च विहायसो' विह इत्ययमादेशो वक्तव्यः' 'काशिकायां डे च विहायसो विहादेशो वक्तव्यः इति। खरुसंयोगोपधप्रतिषेधश्च[4] इति मूलवार्तिकं, भाष्ये 'स्वरुसंयोगोपधानां च प्रतिषेधो वक्तव्यः' इति विश्लेषणं, काशिकायां खरुसंयोगापधात्प्रतिषेधो वक्तव्यः इति। वहेरनियन्तृकस्य[5] इति मूलवार्तिकं, वहेरनियन्तृकस्येति वक्तव्यम् इति भाष्यविश्लेषणं, तदेव काशिकायां वार्तिकत्वेन पठितम्। एवं बहुशः अवलोक्यते यत् भाष्यव्याख्याने स्थितस्य वक्तव्यमित्यंशस्य वार्तिके समन्वयः काशिकाकृता, परवर्तिभिः वैयाकरणैश्च कृतः अतः वक्तव्यवार्तिकयोः क्वापि विभाजनरेखा नोचिता तथा च कदापि एतद्विषये पार्थक्यनिरूपणस्य प्रसरः एव नासीत् अतः एतस्य विवादोपस्थापनम् असाम्प्रतमेव। यत्तु श्री त्रिपाठी कथयति यत् वक्तव्यम् इत्यंशः कात्यायनस्य मूलवार्तिकेषु न वर्तते तदपि सर्वथा न सिद्धम्, यतः वक्तव्यम् इत्यनेन युक्तमपि कात्यायनवार्तिकं भाष्ये दृश्यते[6]। एवमेव उपसंख्यानम् इतस्य विषयेऽपि अस्यां दृष्ट्या न चिन्तनीयम् यतः क्वापि भाष्यकृता वार्तिकविश्लेषणाय उपसंख्यानमित्यस्य प्रयोगः अकारि किन्तु कर्तव्यः इति केवलं भाष्यव्याख्यानेष्वेव लभ्यते न तु मूलवार्तिकपाठे। एवञ्च वेबरमहोदयस्य इदमपि कथनमनौचित्यपूर्णं यत् कात्यायनवार्तिकेषु 'वक्तव्यः' 'कर्तव्यः' इति पदद्वयं समन्वितं तिष्ठति[7]।

---

१. महा०, ६।१।९४ सूत्रोपरि।
२. महा०, ३।२।३८
३. महा०, ३।२।३८
४. महा०, ४।१।४४
५. महा०, १।४।५२
६. महा०, ४।४।१७
७. On page 399 (Ind. Stud. XIII) Prof. Weber states that on the whole the Varttikas of Katyayana are easily detected in the Mahabhasya, because as a rule they are followed by a short Paraphrase which ends with the word 'वक्तव्य' or 'कर्त्तव्य' .... Moreover Prof. Weber, too has regarded as varttikas

डॉ० कीलहॉर्नमहोदयेन इदं विचारितमस्मिन् सन्दर्भे यत् भाष्यस्य तानि सर्वाणि वाक्यानि वार्तिकानि यानि द्विः पठितानि सन्ति, इदमेवमपि व्याख्यातं तेन यत् येषां व्याख्यानांशाः व्याख्येयांशाश्च उपलभ्यन्ते तानि सर्वाणि कात्यायनवार्तिकानि। कीलहॉर्नमहोदयः भाष्यस्य प्रथमाध्यायस्य प्रथमपादस्य त्रिषु आह्निकेषु पठितानां प्रायः शतोत्तरं पंचत्रिंशत्संख्याकानां वार्तिकानां संगतिमुपपाद्य स्वकीयं प्रयासं प्रस्तौति[१]। इति तु निश्चितं यत् वार्तिकनिर्णयस्य सर्वप्रथमः प्रयासः अनेनैव महाशयेन कृतः किन्तु स्वकीयेऽस्मिन् प्रयासे स न सर्वथा सफलः। स्वकीयमतस्योपस्थापनक्रमे स बहुषु स्थलेषु औचित्यं न भजते। तद्यथा विभाषाविवधात्[२] इति सूत्रे महाभाष्ये 'वीवधाच्चेति वक्तव्यम्' इति पूरकवार्तिकं लभ्यते। अत्र कीलहॉर्नमहाशयः कथयति यत् एतस्य वार्तिकत्वं नोपयुक्तं तथा यच्च उद्योतकृता एतस्य वार्तिकत्वमुररीकृतं तदपि असमीचीनमेव किन्तु अस्माकं मतमितो भिन्नम्। कीलहॉर्नमहाशयस्य विषयेऽस्मिन् विप्रतिपत्त्याः कारणं भाष्यकाशिकयोः सूत्रपाठभेदः तिष्ठति। भाष्ये सिद्धान्तकौमुद्यां च 'विभाषा विवधात्' इति सूत्रं किन्तु काशिकायां 'विभाषा-विवधवीवधात्' इति सूत्रस्वरूपम्। यदि काशिकापाठः स्वीक्रियते तदा वार्तिकस्य प्रसरः एव न तिष्ठति, प्रायः अतएव कीलहॉर्नमहाशयः अत्र वार्तिकत्वं न स्वीकरोति किन्तु काशिकाकृतः अयं सूत्रपाठः अनार्षः प्रक्षिप्तो वा, पदमञ्जरीकृतापि इदमेव सुचिन्तितं—'वीवधशब्दो वार्तिके दर्शनात् सूत्रे प्रक्षिप्तः[३]' तत्त्वबोधिनी-कृताप्युक्तं—'वीवधाच्चेति वक्तव्यम्' इति वार्तिकं न्यायसिद्धार्थकथनपरमितिभावः वृत्तिकृत्तु सूत्रे विवधशब्दं प्रक्षिप्य विभाषा विवधविवधात् इति पपाठ[४]। वार्तिकस्यास्य औचित्यविषये वैयाकरणेषु मतान्तरमवलोक्यते—काशिकाकारः सूत्रे एव वीवधशब्दस्योपसंख्यानं करोति, न्यासकारः वृत्तिकृतः सूत्रपाठमिमं स्वीकरोति। प्रदीपकृत् तु वार्तिकस्यौचित्यमंगीकरोति—'वीवधाच्चेतिवक्तव्यमिति'। अत्र विवधशब्दवीवधशब्दौ पर्यायौ। तत्राविरतिकन्यायो न संभवति, उभाभ्यां

---

the statements of Patanjali which ends with the 'वक्तव्यम्' Katyayana and Patanjali, पृ० ६, इत्यत्र उद्धृतम्।

१. The couclusion then which we have arrived at is this, that the Paraphrased sentences which we note within the Mahabhasya, belong to Katyayana the author of the varttikas. *Katyayana and Patanjali*, p. 26

२. अष्टा०, ४।४।१७

३. का०, पद०, ४।४।१७

४. सि०, तत्त्व, ४।४।१७

प्रत्ययस्येष्टत्वात् । ततो वीवधाच्चेति वक्तव्यमित्युक्तम्[1] । इदमेव विश्लेषयन्नाह उद्योतकारः उभाभ्याम्प्रत्ययस्येति । ष्ठन् इत्यर्थः । 'वीवधिकः इत्यस्यापीष्टत्वादिति भावः' । एकदेशविकृतन्यायेनैव वीवधग्रहणस्य सिद्धाविदं व्यर्थमित्यन्ये । विवधवीवधशब्दौ स्वतन्त्रावेव, न प्रकृतिविकारभावापन्नाविति वार्तिकाशयः[2] । सिद्धान्तकौमुदीकारः एकदेशविकृतस्यानन्यत्वाद्वीवधादपि ष्ठन् स्वीकरोति तन्मते विवधवीवधशब्दौ उभयतो बद्धशिक्ये स्कन्दवाह्ये काष्ठे वर्तेते अतः पर्यायवाचकौ स्तः एकदेशविकृतन्यायेन अपरस्यापि विकृतत्वात् सूत्रस्यविवधशब्दात् ष्ठनि कृते वीवधादपि भवति । तत्त्वबोधिनीकारः इदं विवृण्वन् कथयति यत् वैयाकरणानां एकः पक्षः वार्तिकमिदं न्यायसिद्धार्थकथनपरं मन्यते तद्यथा मनुष्यग्रहणेन कस्यचित् षडंगुलेरपि ग्रहणं भवति तथैव सूत्रे विवधशब्दतः ष्ठनि सति वीवधशब्दादपि भविष्यति परे तु एवं न्यायसिद्धार्थकल्पने 'सुदिन-दुर्दिन नीहारेभ्यश्च' इति वार्तिकेन सुदीनशब्दादपि प्रत्ययापत्तिः । तस्मादपूर्वमेव वार्तिकमिति वदन्ति । यद्यपि विवधवीवधशब्दौ पर्यायौ किन्तु एकदेशविकृतन्यायेन उभयत्रष्ठन् भविष्यति इति तु न युक्तम् यतः उभाभ्यां विवधवीवधशब्दाभ्यां ष्ठन् प्रत्ययः इष्टः । अत्र प्रदीपकृता उद्योतकृता च कृतः वार्तिकस्वीकारः सर्वथा उपयुक्तः । वार्तिकस्योपयोगित्वे अनुपयोगित्वे च विदुषां मतभेदः तिष्ठति किन्तु तत्र केनापि इदं नोक्तं यदिदं कात्यायनवार्तिकमेव नहि वर्तते । काशिकाकृता तु यदस्य पाठः न विहितः तेनापि एतस्यावार्तिकत्वं न स्पष्टीकृतं यतः तेन सूत्रे एव एतस्य समावेशः कृतः एवं तेन बहुशः अन्येषु स्थलेषु कृतमपि तिष्ठति । हरदत्तकैयटनागेशज्ञानेन्द्रसरस्वतीप्रभृतीनां वैयाकरणानां विशिष्टः पक्षः सर्वथा एतस्य वार्तिकत्वं स्वीकरोति, वार्तिकोचितं सूत्रस्य सम्पूरणत्वमपि सर्वथा वार्तिकेऽस्मिन् लक्ष्यते अतः कीलहॉर्नमहाशयस्य अत्र वार्तिकास्वीकरणम् असाम्प्रतमेव प्रतिभाति । यत्तु 'लिट्यभ्यासस्योभयेषाम्'[3] इत्यत्र ग्रहिवृश्चतिपृच्छतिभृज्जतीनामविशेषः इति वार्तिकं कीलहॉर्नमहोदयः कात्यायनवार्तिकत्वेन न स्वीकृत्य भाष्यवचनं कथयति तदयुक्तमेव यतः वार्तिकं पठित्वा स्वयं भाष्यकारः कथयति— 'यदुच्यते वृश्चेरविशेष' इति तन्न । यद्यत्र रेफस्य संप्रसारणं न स्याद्वकारस्य प्रसज्येत । रेफस्य पुनः संप्रसारणे सति उरदत्वस्य स्थानिवद्भावात् 'न संप्रसारणे संप्रसारणम्' इति प्रतिषेधः सिद्धो भवति । तस्माद्वक्तव्यम्— ग्रहेरविशेषः पृच्छतिभृज्जत्योरविशेष इति[4] । एतेन स्पष्टरूपेण ज्ञायते यत् भाष्यकारः वृश्चति-

---

१. महा०, प्र०, ४।४।१७

२. महा०, उ०, ४।४।१७

३. अष्टा०, ६।१।१७

४. महा०, ६।१।१७

विषये वार्तिककारं दूषयति तथा ग्रहेरविशेषः पृच्छतिभृज्जत्योरविशेष इति नियमं स्वीकरोति। काशिकाकृता वार्तिकमिदं नोल्लिखितं किन्तु एतद्विवेचनं तत्र सामग्र्येण तिष्ठति[१]। पदमञ्जरीकारः स्पष्टरूपेण एतस्य वार्तिकत्वं स्वीकरोति 'वृश्चति-पृच्छतिभृज्जतीनामविशेषः इति वार्तिकम्। काशिकाकृतः विवेचनस्य विषयेऽपि तेनोक्तं यत्—'तत्र वार्तिककारस्याभिप्रायमाह—वृश्चतेरिति। असति सूत्रे यद्रूपं, तदेव सतीत्यभिप्रायेण वार्तिकारेणैतदुक्तमित्यर्थः[२]। कैयटाचार्योऽपि सर्वथा एतस्य वार्तिकत्वं स्वीकरोति भाष्यकारस्तु 'असति सूत्रे यद्रूपं तदेव सतीत्यभिप्रायेणैतदुक्तम्' रेफस्य संप्रसारेण सत्यसति वा विशेषोनास्तीति मत्वा वार्तिककारेणैतदुक्तम्, तच्चायुक्तमिति मन्यमान आह यदुच्यत इति[३]। नागेशोऽपि वार्तिकत्वमेतस्यांगीकरोति—'वृश्चताविशेषं वदतो वार्तिककारस्याभिप्रायमाह—असतीति[४]'। विवेचनेनानेन इदं सुस्पष्टं यत् ग्रहिवृश्चतीत्यादिकात्यायनवार्तिकमेव; काशिकायां कौमुद्यां च एतस्यादर्शनेन कीलहॉर्नमहोदयः एतस्य वार्तिकत्वम् अस्वीकरोति।

एवमेव सहितसहाभ्यां चेति[५] वचनं कीलहॉर्नमहाशयः भाष्यवचनं स्वीकरोति तदपि अयुक्तमेव यतः प्रदीपकृता स्पष्टरूपेण एतस्य वार्तिकत्वं प्रस्तुतं—'नन्वेकदेशविकृतस्यानन्यत्वात् संहितशब्दग्रहणेन सहितशब्दस्य सिद्धं ग्रहणम्। एवं तर्हि विद्यमानं हितमस्य सहितम् इति यदा व्युत्पत्तिसदर्थं वार्तिकम्[६]। काशिकाप्रक्रियासिद्धान्तकौमुदीष्वपि एतस्य वार्तिकत्वेन स्वीकारः स्पष्ट एव। एवमस्माभिरवलोकितं यत् कीलहॉर्नमहाशयेनापि वार्तिकनिर्णये यन्मतं स्थिरीकृतं तत् सर्वथा अयुक्तम्। अस्माभिः वार्तिकनिर्णयस्य कृते कानिचित् तत्त्वानि स्वीकृतानि येषामत्र प्रस्तुतीकरणं विधीयते—

वार्तिकस्य लक्षणविषये विवेचनक्रमे पूर्वमेव अस्माभिः स्थिरीकृतं यत् वार्तिकं विरचय्य पुनः विभिन्नैः वार्तिकैः स्वकीयमतस्य उपस्थापनं खण्डनं वा वार्तिककृतः न कार्यम्। न कोऽपि आचार्यः स्वकीयं मतमुपस्थाप्य स्वयमेव तस्य त्वरितमेव प्रत्याख्यानं विदधाति। कीलहॉर्न महाशयमते एक एव निर्माता स्वप्रणीते ग्रन्थे

---

१. का॰, वृश्चतेः सत्यसतिवायोगेनास्ति विशेषः — — — पृच्छतिभृज्जत्योरविशेषः, ६।१।१७

२. का॰, पद॰ ६।१।१७

३. महा॰, प्र॰ ६।१।१७

४. महा॰, उ॰, ६।१।१७

५. महा॰, ४।१।१७ सूत्रे वार्तिकम्।

६. महा॰, प्र॰ ४।१।७०

एकस्मिन् एव विषये द्विविधव्याख्यानशैल्याः अनुसरणं कर्तुं न शक्येत, एतदर्थं भाष्ये द्वौ पृथक्भेदौ तिष्ठतः। वयमिदं कल्पितुं शक्नुमः यत् पतञ्जलिना यत्र वाक्यांशः व्याख्यानांशश्च द्वावपि उपस्थापितौ तत्र उभयोः एकः तत्कृतः न वर्तते ...... वाक्यांशानां भाषा तथा शैली पृथक्-पृथक् वर्तेते अतः भाष्यस्य वाक्यांशस्य च निर्माता पृथक्-पृथक् जनः विद्यते। पतंजलेः उद्धरणप्रस्तुतीकरणस्य प्रक्रियाः, यतः वाक्यांशाः उद्धृताः सन्ति, इदमेव स्पष्टीकरोति यत् एषां वाक्यांशानां निर्माता पतंजलितः भिन्न कोऽपि जनः ... ... इमे एव व्याख्येयाः वाक्यांशा वार्तिकनाम्ना अभिधीयन्ते।[1] वस्तुतः किमपि कात्यायनवार्तिकमाश्रित्य तस्य उपयोगित्वानुपयोगित्वविषये विश्लेषणं भास्यकारस्य शैली। शेषनारायणस्य ... ... 'तदपि पतञ्जलिराक्षेपसमाधानपूर्वकमिष्ट्यादिभिश्च परिचस्कार'[2] इति वाक्येनापि इदमेव मतं समर्थयते। आक्षिप्य भाषणात् भाष्यम्[3] इति राजशेखरपरिभाषातः इदं ज्ञायते-पूर्वं कस्यापि वस्तुनः आक्षेपप्रत्याक्षेपपुरस्सरं प्रतिपादनं भाष्यलक्षणम्। हरदत्तेनापि इदमेव स्थिरीकृतं यत्तु आक्षेप प्रत्याक्षेपैः एवं विभिन्नसमाधानैश्च व्याख्यानं विधीयते तत् भाष्यं कथ्यते–'आक्षेपसमाधानपरो ग्रन्थो भाष्यम्, तदिह कात्यायनप्रणीतानां वाक्यानां पतंजलिप्रणीतं विवरणम्[4]। अतः महाभाष्ये एवं-भूतानि वचनानि यानि उत्तरप्रत्युत्तराक्षेपप्रत्याक्षेपरूपेण तिष्ठन्ति तानि सर्वाणि प्रायशः भाष्यवचनान्येव न तु कात्यायनवार्तिकानि।

वार्तिकस्वरूपनिर्णये एकं महत्त्वपूर्णं काठिन्यं तिष्ठति–भाष्यानन्तरं काशिका-प्रक्रियाकौमुदीसिद्धान्तकौमुदीप्रभृतिषुव्याकरणग्रन्थेषु कतिपयवार्तिकानां पाठभेदः। एतस्य मुख्यं कारणमिदमपि वर्तते भाष्ये यः सूत्रपाठः वर्तते न स सर्वत्र काशिकाया मवलोक्यते। सूत्रपाठे भेदोपस्थापनात वार्तिकेभेदा[5] संजातः तिष्ठति। सिद्धान्त-कौमुदी तु पूर्णरूपेण महाभाष्यस्य सूत्रपाठमनुसरति वार्तिकस्वरूपे उभयत्र प्रायशः वैषम्यं न तिष्ठति किन्तु काशिकायां, तस्याः अनुसरणपथे वर्तमानायां प्रक्रियाकौमुद्यां च महदन्तरं तिष्ठति। अत्र स्थालीपुलाकन्यायेन कतिपयोदाहरणानि प्रस्तूयन्ते–

१. भाष्ये–सूत्रम्—समो गम्यृच्छिभ्याम्[6]।
,, वार्तिकम्—१–समो गमादिषु विदिप्रच्छिस्वरतीनामुपसंख्यानम्।

---

१. *Katyayana and Patanjali*, p. 25–27
२. शेषनारायणः, सूक्तिरत्नाकरस्य हस्तलेखः, पृ० २
३. काव्यमीमांसा—पृ० ११
४. का०, पद प्रारम्भे एव।
५. का०, पद प्रारम्भे एव
६. भा०, १।३।२६

भाष्ये—वार्तिकम्—२–अतिश्रुदृशिभ्यश्च ।
,, ,, ३–उपसर्गादस्त्यूह्योर्वावचनम् ।

काशिकायां—सूत्रम्—समो गम्पृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्यः
,, वार्तिकम् दृशेश्चेति वक्तव्यम् ।

२. भाष्ये—सूत्रम् — प्रत्यपिभ्यां ग्रहेः[1] ।
,, वार्तिकम् प्रत्यपिभ्यां ग्रहेश्छन्दसि ।
काशिकायां— प्रत्यपिभ्यां ग्रहेश्च्छन्दसि इति सूत्रमेव, वार्तिकस्यावश्यकतैव नहि सूत्र एव छन्दसीत्यस्य गतार्थत्वात् ।

३. भाष्ये, सिद्धान्तकौमुद्याञ्च—सूत्रम्—लाक्षारोचनाठ्ठक्[2] ।
,, वार्तिकम्— ठप्रकरणे शकलकर्दमाभ्यामुपसंख्यानम्

काशिकायां— सूत्रम् — लाक्षारोचनाशकलकर्दमाठ्ठक्
वार्तिकम्—शकलकर्दमाभ्यामणपीष्यते

ठकः विधानमत्र सूत्र एव कृतम् । प्रदीपकारमते शकलकर्दमयोः सूत्रे पाठोऽनार्षः ।

४. भाष्ये, सिद्धान्तकौमुद्यां च—

सूत्रम्—सास्मिन् पौर्णमासीति; वार्तिकम्—सास्मिन् पौर्णमासीति संज्ञायाम् । काशिकायां प्रक्रियाकौमुद्यां च सूत्रम्—'सास्मिन् पौर्णमासीति संज्ञायाम् । प्रदीपकृता संज्ञाग्रहणं सूत्रेऽनार्षमिति प्रतिपादितम् । तत्त्वबोधिनीकारमते' वृत्तिकृता तु सूत्रे एव संज्ञायामिति प्रक्षिप्तम् ।

५. भाष्ये, सि०—ग्रामजनबन्धुभ्यस्तल्, इति सूत्रम्
काशिकायां, प्र०—ग्रामजनबन्धुसहायेभ्यस्तल् ।
भाष्ये वार्तिकम्—गजसहाभ्यां च ।
सि० कौ०—गजसहाभ्यां चेति वक्तव्यम् ।
काशिकायां—गजाच्चेति वक्तव्यम् ।
प्र० कौ०—गजाच्चेष्टः ।

---

१. भा०, ३।१।११८
२. महा०, ४।२।२
३. अष्टा०, ४।२।४३

६. भाष्ये, सि० कौ०, सूत्रम्—प्रज्ञाश्रद्धार्चाभ्योणः[1]
,, ,, वार्तिकम्—वृत्तेश्च
काशिकायां—प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः

अत्र आह ज्ञानेन्द्रसरस्वती—वृत्तेश्चेति वार्तिकमिदं; काशिकाकृता तु वृत्तिशब्दः सूत्रे प्रक्षिप्तः।

७. भाष्ये सि० कौ०, सूत्रम्—स्वाङ्गाच्चेतः[2]।
,, वार्तिकम्—स्वाङ्गाच्चेतोऽमानिनि।
सि० कौ० ,, —अमानिनीति वक्तव्यम्।
काशिकायां प्र० कौ०, सूत्रम्—स्वाङ्गाच्चेतोऽमानिनि, पदमञ्जरीकारः हरदत्तः स्वीकरोति— अमानिनीति

वार्तिकदर्शनात् सूत्रे प्रक्षिप्तम्[3]। एवमेव प्रदीपकारेणापि व्याख्यातम्—'स्वाङ्गाच्चेतः इत्येतावत् सूत्रमिति मत्वा वार्तिकारम्भः'। अत्र कैयटोक्तेरेतत् प्रतीयते यदत्र सूत्रपाठे तदानीमपि अमानिनिग्रहणसत्त्वासत्त्वे मतान्तरमासीदेव। नव्यैः सर्वैः वैयाकरणैस्तु 'स्वाङ्गाच्चेतः' इत्येव सूत्रमुररीकृतम्।

८. भाष्ये सि० कौ०—प्रकृत्याशिषि.[4]
,, वार्तिकम्—प्रकृत्याशिष्यगवादिषु
काशिकायां—सूत्रम्—प्रकृत्याशिष्यगोवत्सहलेषु

प्रकृत्याशिषि इत्येतावत् सूत्रं, परिशिष्टं भाष्यवार्तिकदर्शनात् सूत्ररूपेण पठितम् इति पदमञ्जरीकारः[5]। 'अगोवत्सहलेषु' इति तु भाष्यवार्तिकदर्शनात् सूत्रे केनचित् प्रक्षिप्तम् इति प्रदीपकारः[6]। नागेशमतेवार्तिकस्यादिशब्देन भाष्योदाहरणात् वत्सहलयोरेव संग्रहः[7]। सिद्धान्तकौमुद्याम् 'अगोवत्सहलेष्विति वाच्यम्' इति वार्तिकम्। भाष्यस्थम् 'अगवादिषु' इत्यवलोक्य वार्तिकमेतत् यत्तु काशिकाकारेण सूत्र एव परिगणितम्।

---

१. महा०, ५।२।१०१
२. महा०, ६।३।४०
३. का० पद०, ६।३।४०
४. महा०, ६।३।८३
५. का०, पद०, ६।३।८३
६. महा०, प्र०, ६।३।८३
७. महा०, उ०, ६।३।८३

६. भाष्ये सूत्रम्—पूजनात्पूजितमनुदात्तम्[1]।
,, वार्तिकम्—पूजितस्यानुदात्तत्वे काष्ठादिग्रहणम्।
काशिकायां सूत्रम्—पूजनात् पूजितमनुदात्तं काष्ठादिभ्यः।
'काष्ठादिभ्य इति' सूत्रे वार्तिकदर्शनात् कैश्चित् प्रक्षिप्तम्[2]।

विवेचनेनानेनास्माकमिदं तात्पर्यं यत् सूत्रे पाठभेदादपि वार्तिकभेदः समजनि यस्माद्धेतोः वार्तिकस्वरूपे महदन्तरं संजातं येन च वार्तिकनिर्णये काठिन्यं समायातम्। एतस्मिन् विषये अस्माकं मतं यत् भाष्यकृतः पाठ एव तात्त्विकरूपेण ग्राह्यः तथा च तत एव गृहीतानि वार्तिकानि स्वीकरणीयानि।

भाष्ये कात्यायनवार्तिकानां प्रत्यभिज्ञानाय प्रसंगतः तेषां ध्यानमावश्यकम् इति श्रीवेदपतिमिश्रस्य मतं सर्वथा उचितम्।[3] प्रत्येकं लेखकः स्वप्रतिपाद्ये एकसूत्रताम् विशेषतः निदिध्याति। यदि प्रतिपादनमध्ये केनापि वाक्यसमूहेन वाक्यविशेषेण वा एकसूत्रतायाः भंगः संजायते तदा स वाक्यसमूहः वाक्यविशेषो वा तस्य लेखकस्य कृतिः न तिष्ठति। सामान्यतः कात्यायनस्य यावन्ति वार्तिकानि विद्यते तेषु प्रत्येकस्मिन् प्रकरणे तु एकसूत्रता आवश्यकैव। यदि किमपि तां विश्रृंखलितां विदधाति तदा नूनमेव तदन्यदीयमेव। यदि वचनस्यास्य भाष्यकारेण सम्बन्धः प्रतीयते तदा तत्र कथमपि कात्यायनवार्तिकस्य नावकाशः। यस्य सूत्रस्य व्याख्यानाय वार्तिकं समायातं तिष्ठति तेन सूत्रविशेषेण तस्य कः सम्बन्धः व्याख्यानस्य किं तात्पर्यं, किम्पर्यन्तं वार्तिकस्य व्याप्तिः, क्व च अव्याप्तिः, इति सर्वं यदि विचिन्त्येततदा भाष्यवचनेभ्यः तस्य पृथक्करणं सुष्ठूपपद्येत।

श्रीवेदपतिमिश्रेण प्रतिपादितं यत् वार्तिकानां परिज्ञानाय व्याख्याप्रसगे भाष्यकृता कृतं सम्पुटीकरणमतीवसहायकम्। सम्पुटीकरणमित्यस्य तात्पर्यं–प्रतीक-द्वारा व्याख्यानमेव भवति[4]। नागेशेनोक्तम्–'एते श्लोकाः भाष्यकृत एव न वार्तिककृतः सम्पुटीकरणाभावात्'[5]। एतत् सम्पुटीकरणं कात्यायनवार्तिकानां परिज्ञानाय अधिकम् उपयुक्तं तिष्ठति। श्रीमिश्रमहाभागस्येदं विवेचनं समालोचनानिकषे विखण्डितं भवति। सम्पुटीकरणशब्दस्य महाशयेनानेन यद् व्याख्यानं कृतं–'प्रतीकमुपस्थाप्य व्याख्यानं' तन्न समीचीनम्। 'सम्पुटीकरण'–इति शब्दस्य

१. महा०, ८।१।६७
२. महा०, प्र०, ८।१।७
३. व्या० वा० एक स अ०, पृ० ७८
४. व्या० वा० एक स० अ०, पृ० ७८
५. महा०, उ० ४।१।७८

व्युत्पत्तिलभ्यः अर्थः भवति–असम्पुटस्य सम्पुटकरणम्–सम्पुटीकरणम्[१]। यद् वस्तु संपुटं न वर्तते तत् यदा सम्पुटं क्रियते तदा सम्पुटीकरणं भवति। शब्दकोषेषु सम्पुटशब्दस्य अर्थः विद्यते पेटिका इति[२]। यथा एकस्य करतलस्य अपरकरतलेन योगं विधाय प्रणामः विधीयते तदा एकेन करतलेन अपरकरतलस्य सम्पुटीकरण भवति। एवंभूतः अर्थः प्रतीकद्वारा व्याख्यानरूपार्थतः भिन्न एव प्रतीयते। उद्योत-कृतः सम्पुटीकरणमित्यस्य सम्पुष्टीकरणम् इति पाठान्तरमपि क्वापि नावलोक्यते येन इदं चिन्त्येत यत् मुद्रणजन्या अशुद्धिः। प्रतीकद्वारा कस्यापि तत्त्वस्य व्याख्यानं भाष्यकृतः शैली न तु कात्यायनस्य अतः वेदपतिमिश्रस्य कथनं संगतिविरहितमेव। सम्पुटीकरणस्य उद्योतकारमते यत् तात्पर्यं तन्न श्रीमिश्रेणावगतम्। वस्तुतः सम्पुटीकरणम् इति सम्पूरकमित्यर्थे तिष्ठति। कात्यायनस्य वार्तिकानि वस्तुतः पाणिनीयसूत्राणां सम्पूरकाणि एव वर्तन्ते। सूत्रकृता यददृष्टं तद् वार्तिककृत् वदति इति वार्तिकप्रयोजनतः अपि इदमेव विशदरूपेण ज्ञायते यत् कात्यायनवार्तिकानि पाणिनिनियमानां पूरकाणि सन्ति। 'एङि० पररूपम्' इति पाणिनिसूत्रं, तत्र पूरकवार्तिकं वर्तते–शकन्ध्वादिषु च। एङि० पररूपं शकन्ध्वादिषु च इति क्रमेण यदा पठ्यते तदा स्पष्टमेव ज्ञायते यत् उद्योतकारस्य इदमेव सम्पुटीकरणं विद्यते, यत् कात्यायनवार्तिकानां प्रत्याभिज्ञानाय सुकरं लक्षणं प्रस्तौति। 'एत्येधत्यूठ्सु-'[३] 'प्रादूहोढोढ्येषैष्येषु', धर्मं चरति[४]—अधर्माच्च, उपमानादाचारे[५]—अधिकरणाच्चे-त्यादि निदर्शनानि भाष्ये यत्र-तत्र उपलभ्यन्ते, एतेन ज्ञायते यत् कात्यायन वार्तिकानि सूत्रैः अनिर्दिष्टशब्दसाधुत्वविधानत्वेन तु सूत्राणां पूरकाणि वर्तन्त एव सहैव सूत्राणि सम्पुटीकुर्वन्त्यपि इमानि वार्तिकानि। कात्यायनस्येयं विशिष्टा-शैली भाष्ये तद्वार्तिकपरिज्ञानाय समुपयुक्ता ज्ञायते।

भाष्ये यदि वार्तिकस्य प्रत्याख्यानं क्वापि सूत्रस्य वा प्रत्याख्यानम् अभीष्टं तिष्ठति तदा अन्ते 'तर्हि वक्तव्यं न वक्तव्यम्' इति विशिष्टा शैली अवलोक्यते। अस्माकम्मते यत्र क्वापि वार्तिकानां प्रत्याख्यानाय तेषां विश्लेषणस्य परिसमाप्तौ इदं प्रतीकात्मकं वचनं पतञ्जलिना प्रयुक्तं तिष्ठति तत् सर्वं कात्यायनवार्तिकमेव किन्तु यत्र कस्याप्यपरस्य आचार्यस्य वार्तिकस्य विषये एवं विद्यते तत्र लक्षणमिदं न प्रवर्तते।

---

१. अष्टा०, ५।४।५०

२. A casket, covered Box. skt. Eng. Dict. p. 968

३. महा०, ६।१।८९

४. महा०, ४।४।४१

५. महा०, ३।१।१०

कात्यायनवार्तिकानां प्रत्यभिज्ञानस्य एकं सर्वाधिकं विशिष्टं साधनं वर्तते— वार्तिककारेण पाणिनीयसूत्राणामक्षरमादाय एव वार्तिकानि प्रणीतानि। क्वापि वार्तिककृत् सूत्रस्य आद्यक्षराणि आद्यमंशं वा गृह्णाति, क्वापि सूत्राणां मध्यतः किमपि पदं गृहीत्वा वार्तिकप्रणयनं करोति एवं च क्वापि सूत्राणाम् अन्तिमं पदमवलम्ब्य वार्तिकानि निर्माति। क्वचित्तु स्वल्पेषु वार्तिकेषु सम्पूर्णं सूत्रमेव कथयति। कृत्यैर्ऋणे[1] इति सूत्रं; तत्र सूत्रस्याद्यमंशं गृहीत्वा वार्तिकं प्रवृत्तम् — कृत्यैर्नियोगे यद्ग्रहणम्। तथैव णिश्रिद्रुस्रुभ्यः कर्तरि चङ्[2] णिश्रिद्रुस्रुषु कमेरुपसंख्यानम्, धातोः[3]—धात्वधिकारः प्राग्हलादेशात्, कृत्याः[4]—कृत्यसंज्ञायां प्राङ् ण्वुलवचनम्, तुन्दशोकयोः परिमृजापनुदोः[5]—तुन्दशोकयोः परिमृजापनुदोरालस्यसुखाहरणयोः, स्तम्बकर्णयोरमिजपोः[6]—स्तम्बकर्णयोर्हस्तिसूचकयोः ऊधसोऽनङ्[7]— ऊधसोऽनङि स्त्रीग्रहणं, बहुव्रीहौ विश्वसंज्ञायाम्[8]—बहुव्रीहौ विश्वस्यान्तोदात्तात् संज्ञायां मित्राजिनयोरन्तः इत्यादिषु बहुषु स्थलेषु सूत्राद्यंशमादाय प्रणीतानि वार्तिकानि कात्यायनीयान्येव। सूत्रस्य मध्याक्षरमुपादाय निर्मितानि ह्रस्वो नपुंसके प्रातिपदिकस्य[9] इत्यस्य प्रातिपदिकेति मध्याक्षरमादाय तत्र वार्तिकं तिष्ठति नपुंसकह्रस्वत्वे प्रातिपदिकग्रहणं तिङ्निवृत्त्यर्थम्, राष्ट्रावारपाराद्घखौ[10]— अवारपाराद्विगृहीतादपि, विभाषातिलमाषोमाभंगाणुभ्यः[11]—तिलादिभ्यः खञ् च इत्यादिवार्तिकानि कात्यायनप्रणीतत्वं सूचयन्ति एवमेव सूत्रस्यान्तिमपदमक्षरं वा गृहीत्वा निर्मितानि अनेकानि वार्तिकानि—सम्भवत्यवहरति पचति[12]—तत्पचतीति द्रोणादण् च, न दुहस्नुनमां यक् चिणौ[13]—यक् चिणोः प्रतिषेधे हेतुमण्णिश्रिब्रूञा-

---

१. महा०, २।१।४२
२. महा०, ३।१।४८
३. महा०, ३।१।९१
४. महा०, ३।१।६४
५. महा०, ३।२।५
६ महा०, ३।२।१३
७. महा०, ५।४।१३१
८. महा०, ६।२।१०६
९. महा०, १।२।४७
१०. महा०, ४।२।९३
११. महा०, ५।२।४
१२. महा०, ५।१।५२
१३. महा०, ३।१।८९

मुपसंख्यानम्, रूपादाहृतप्रशंसयोर्यप्[1]— यप् प्रकरणेऽन्येभ्योऽपि दृश्यते, इत्यादीनि कात्यायनप्रणीतान्येव। तथा च सम्पूर्णं सूत्रमेव बहुत्र वार्तिकेषु पुनरावृत्तं तिष्ठति— लवणाल्लुक्[2]–लवणाल्लुग् वचनानर्थक्यं रसवाचित्वात्, प्रयच्छति गर्ह्यम्[3]–प्रयच्छति गर्ह्याय, कृते ग्रन्थे[4]—कृते ग्रन्थे मक्षिकादिभ्योऽण्, दृष्टं साम'—'दृष्टं साम कलेढंक्, इत्यादीनि बहूनि उदाहरणानि भाष्ये तिष्ठन्ति। एवं भाष्ये कात्यायनवार्तिकानां परिज्ञानाय इयं शैली अधिकं सुस्पष्टा।

महाभाष्यार्णवतः कात्यायनवार्तिकरूपमुक्तायाः चयनमतीवदुष्करमित्यत्र न कापि संशीतिः। यः खलु विद्वान् भाष्यार्णवस्य अवगाहने अतीव निपुणः भवेत् स एव इदमित्थंरूपेण कात्यायनवार्तिकानां स्पष्टतया निर्णये क्षमः भवितुं शक्नुयात्। व्याकरणस्य या प्राचीन पठन-पाठन शैली आसीत् तत्र कात्यायनस्यवार्तिकानि कानि वर्तन्ते एतस्य विषये जिज्ञासायाः विशेषः अवसरः एव नासीत् अतः प्राचीनैः विद्वद्भिः विषयेऽस्मिन् क्वापि न किंचिदपि संकेतितम्। गवेषणायाः क्रमे मम कृते एतत् तथ्यस्य यत् भाष्ये कानि कात्यायन–वार्तिकानि वस्तुतः वर्तन्ते, उद्घाटनमतीव आवश्यकमासीत्, एतदर्थं बहवः वैयाकरणाः मया जिज्ञासाशान्त्यर्थं पृष्टाः किन्तु तैः एतस्य विषये कदाचिदपि सम्यगुत्तरं न प्रदत्तम्। वार्तिकानां विषये यैः पाश्चात्यैः अस्मद्देशीयैश्च विद्वद्भिः लिखितं तत् परस्परविरोधिविचार-कारणादस्वीकार्यमेव संजातम्। कोऽपि विद्वान् यदि वार्तिकमेकं कात्यायनीयं मनुते तदा अन्यः कोऽपि जनः तदेव कात्यायनप्रणीतं न स्वीकुरुते, अतः निर्णये अतीव काठिन्यं समागतम्। निरन्तरं महाभाष्यस्यानुशीलनेन काशिकासिद्धान्तकौमुदी-प्रभृतीनां प्राचीनग्रन्थानां च परिशीलनेन तथा विभिन्नैः विद्वद्भिः एतद्विषये आलोचितानां सिद्धान्तानां परीक्षणेन अस्माभिः एतस्य विषये महता काठिन्येन निर्णये साफल्यमुपलब्धं तथापि निःशेषतः एतत् कथयितुं न शक्नुमः यत् अस्माभिः सर्वथा समुचितमेव व्याख्यानं कृतमथवा एतदनन्तरं नावश्यकता वर्तते अध्ययन-स्यास्मिन् क्षेत्रे; किन्तु यथामति अयं प्रयासः अवश्यमेव पूर्वेभ्यः आलोचकेभ्यः सुष्ठुतरः भवेत्, एतदर्थं सपरिश्रमं प्रयतितमस्माभिः।

---

१. महा०, ५।२।१२०
२. महा०, ४।४।२४
३. महा०, ४।४।३०
४. महा०, ४।३।११६

संसारेऽस्मिन् सदाकाले सर्वे स्थावरजंगमाः ।
परिवर्तनमिच्छन्ति शब्दार्था इव नित्यशः[1] ॥

॥ तृतीयोन्मेषः ॥

कात्यायनवार्तिकव्युत्पन्नशब्दानां रूपपरिवर्तनदृष्ट्या अनुशीलनम्

इह जगतीतले सर्वमनित्यं, सर्वं चराचरं जगदनित्यम् । जंगमानामनित्यता तु सर्वसिद्धा स्थावराणामपि अनित्यता परिलक्ष्यते तथाचोक्तं महाकविभवभूतिना—

'पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां
विपर्यासंयातो घनविरलभावः क्षितिरुहाम् ।
बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं
निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति[2] ॥

प्रकृत्याः सर्वे पदार्थाः स्वजीवनस्य आदितः अवसानं यावत् एकस्मिन्नेव रूपे अवस्थिता तिष्ठन्ति । तत्र यत् स्वरूपपरिवर्तनं संजायते तत्कृते कतिपयसहस्र-वर्षाणामपेक्षा तिष्ठति । किन्तु एतद्विपरीतं कस्यामपि भाषायां समयगत्या एवंविधं महत् परिवर्तनं संजायते यत् एकसहस्रसंवत्सरानन्तरमेव तस्याः भाषायाः प्रत्यभिज्ञानेऽपि काठिन्यं समायाति । भाषायाः परिवर्तनस्य गतिः तीव्रतरा मन्दतरा वा भवितुं शक्येत किन्तु परिवर्तनं सार्वकालिकं सार्वत्रिकं च भवत्येव । परिवर्तनस्य गतिः एवं विकटा यदनेन वैदिकानाम् ऋषीणां समृद्धा शक्तिमती च वाणी विभिन्नविकाससरणिं प्राप्ता । सभ्यजातीनां भाषाः अपेक्षाकृतं स्थिराः भवन्ति तथा एवं प्रतीयते यत् तासां परिवर्तनशक्तिः विलुप्ता संजाता वर्तते । यासु भाषासु श्रेष्ठसाहित्यानि तिष्ठन्ति, याः भाषाः नगरेषु ग्रामेषु प्रविष्टाः तासां विषये एवमवबुध्यते यत् तासु परिवर्तनं भविष्यत्येव नहि । मैक्समूलरमहाशयविचारानुसारं ज्ञायते यत्[3] यद्यपि भाषा निरन्तरमेव परिवर्तनशीला वर्तते किन्तु भाषायाः

---

१. स्वनिर्मितं पद्यम् ।

२. भवभूतिः, उत्तररामचरितम्, २।२७

३. एफ० मैक्समूलर, अनुवादक—डॉ० उदयनारायण तिवारी—भाषा-विज्ञान, पृ० २५-३७ ।

उत्पत्तौ अथ च अस्य मार्गे अवरोधोपस्थापनस्य क्षमता मनुष्ये न तिष्ठति। भाषानियमेषु परिवर्तनोपपादनस्य योग्यता कस्मिन्नपि मनुष्ये तिष्ठति इति कथनं तथैव असंभाव्यं यथा कोऽपि स्वशरीरे स्वयं रक्तसंचारं कर्तुं क्षम भवेत् अथवा स्वकीयशरीरं किंचिदधिकदैर्घ्ययुक्तं कर्तुं क्षमः भवेत्। कवयः दार्शनिकाश्च तदैव भाषायाः स्वामिनः भवितुमर्हन्ति यदा ते तस्याः नियमानां सुष्ठुपरिज्ञानं प्राप्नुयुः तथा च तदनुसारमेव आचरणं च कुर्युः। यदा सम्राजा टाइबेरियस—(Tiberius) महोदयेन स्वभाषणे भाषासंबन्धिनी अशुद्धिः विहिता तथा एतदर्थं मार्सेलस (Marcellus) नामकः वैयाकरणः प्रतिवादमुपस्थापितवान् तदा तत्रोपस्थितः कैपिटो (Capito) नामकः अन्यः वैयाकरणः सम्राजः पक्षं समर्थयन् उक्तवान् यत् सम्राजा यत् किंचिदुक्तं तत् शुद्धा लैटिनभाषा वर्तते, यदि चेत् सा न शुद्धा तदा भविष्ये साशुद्धा मंस्यते। मार्सेलसमहोदयः अन्धसमर्थकः सभासदनासीत् प्रत्युत स श्रेष्ठः वैयाकरणः आसीत् अतः त्वरितमेव उत्तरितवान् यत्—'कैपिटो' मिथ्याभाषी वर्तते, सम्राट् कस्मै मनुष्याय रोमदेशस्य नागरिकतां प्रदातुं क्षमः किन्तु कस्यापि शब्दस्य नागरिकताप्रदानविषये न शक्तः मैक्समूलरमहाशयस्येदं सर्वं विवेचनम् अतीव उपयुक्तं प्रतिभाति। भाषायां यदा किमपि नवीनं तत्त्वं समायाति तत्तु कस्यापि पूर्वचिन्तनस्य परिणामस्वरूपं नायाति प्रत्युत तत् स्वयमेव समापद्यते। तद्विषये कोऽपि जानात्यपि नहि यत् परिवर्तनमिदं कदा समागतम्? एतेन स्पष्टरूपेण ज्ञायते यत् भाषासु नूतनतत्त्वानामुत्पादकः कोऽपि व्यक्तिविशेषःन भवितुमर्हति यतः येषां नियमानां पारवश्यं प्राप्तानि इमानि नवीनतत्त्वानि समायान्ति तानि कस्यापि जनस्य नियन्त्रणशक्तितः बहिर्भूतानि भवन्ति। तथ्यमिदं यत् भाषायां नवीनतत्त्वानामुत्पादकः कोऽपि व्यक्तिविशेषः, न भवति प्रत्युत समाज एव एतस्मिन कार्ये सहायकत्वेन तिष्ठति कार्येऽस्मिन् व्यष्टिसमष्टयोः भेद एव न वर्तते। तयोः सर्वथा एकात्मता तिष्ठति। यद्यपि सत्यमिदं यत् कस्यापि व्यक्ति-विशेषस्य अभिरुचिहेतोः भावनाविशेषानुरूपं वा भाषायां परिवर्तनं भाव्यं किन्तु तत्र इदमपि पूर्णरूपेण तथ्यं यत् मानवेनैव भाषापि परिवर्त्तिता भवति। यदि भाषा विकासमाप्नोति तदा तस्याः विकासभूमिस्तु मनुष्य एव। फ्रेडरिकश्लेगेलमतेन कस्याः अपि भाषायाः संज्ञापदेभ्यः क्रियापदेभ्यश्च प्रत्ययाः तथैव सहजतया निस्सरन्ति यथा कस्मादपि वृक्षात नवीनांकुराणां नवीनशाखापल्लवानां वा प्रस्फुटनं संजायते। एवमेव श्लाइखरमहाशयस्य मते एकं सजीववस्तुतुल्यमेव भाषायाः स्वीयं जीवनं भवति। यौवनमासाद्य सा भाषा सन्ततिमुत्पादयति तथा वृद्धत्वं प्राप्ता विनाशं याति[1]।

---

१. मैक्समूलर, अनुवादक— उदयनारायण तिवारी— भाषा विज्ञान, पृ० ३४

एवमिदं स्पष्टं यथा सर्वं चराचरं जगत् परिवर्तनात्मकं तथैव भाषापि परिवर्तनात्मिका, तत्र परिवर्तनं प्रकृतिसिद्धमेव। भाषायां परिवर्तनस्य विभिन्नानि कारणानि भाषाशास्त्रमर्मज्ञैः प्रतिपादितानि तद्यथा कस्यापि शब्दस्य, ध्वनेः वा अधिकं व्यवहारः प्रयोगो वा, बलाघातः, भावातिरेकः, प्रयत्नलाघवम्, मानसिकी-वृत्तिः, अपूर्ण—श्रवणं, जलवायुः संस्था, महापुरुषसम्पर्कः विभिन्नजातिसम्पर्कः, उच्चारणभेदः, इत्यादिबहुविधकारणेभ्यः भाषायां परिवर्तनानि जायन्ते। तात्त्विक-दृष्ट्या इदं परिवर्तनं द्विविधं भवति—आभ्यन्तरं, बाह्यंच। यत् परिवर्तनं कमपि बाह्यप्रभावं विनैव स्वयमेव वस्तुषु समयाति तत् आन्तरिकम् आभ्यन्तरं वा परिवर्तनं कथ्यते। इदं तु षड् कारणेभ्यः संजायते—प्रयत्नलाघवात्—उच्चारण-सौकर्यात्, मुखसुखात् वा, प्रयोगातिशयात्, बलाघातात् स्वराघाताद् वा, मानसिक-संस्कारात्—भावातिरेकात्, अनुकरणात्, श्रवणस्य अपूर्णताहेतोः वा। तत्र आभ्यन्तरविकासस्य प्रथमं कारणं प्रयत्नलाघवम् इति तिष्ठति। सुप्रसिद्धभाषा शास्त्रज्ञस्य लॉकमहोदयस्य इदमभिमतं तिष्ठति यत् परिश्रमाय परिश्रमः मानव स्वभावस्य विरुद्धं वस्तु तिष्ठति। मानवस्वभावस्य इयं विशेषता यत् स्वल्प एव शब्दे अधिकाधिकभावानां प्राकट्यं यथास्यात् तद् भवतु। सर्वः जनः वाञ्छति यत् स यद् किञ्चित् कथयेत् तत् श्रोता सौकर्येण अवगच्छेत् अर्थात स्वल्पशब्दप्रयोगे-णैव श्रोता तात्पर्यं ज्ञातुं शक्तः भवेत्। 'अर्धमात्रालाघवं पुत्रोत्सवं मन्यन्ते वैयाकरणाः' इति सिद्धान्तः, एतस्यैव विषयस्य संकेतकः। यद्यपि केचन इदमपि कथयन्ति यत् प्रयत्नलाघवम्, मुखसुखम् वा भाषापरिवर्त्तनस्य कारणत्वेन यद् स्वीकृतं विद्वद्भिः तन्न समीचीनम्। यतः तेषां मते केवलम् अशिक्षिता एव जनाः मुखसौकर्यम् अवलम्बन्ते किन्तु शिक्षिताः सर्वदैव इदमेव विजानन्ति यत् ते विशुद्धमेव उच्चारणं कुर्युः। अतः स्वेच्छापूर्वकं भाषाप्रयोगस्य अवकाश एव न तिष्ठति। मतमिदं सर्वथा अस्वीकार्यमेव, अशिक्षितास्तु मुखसौविध्याय यतन्त एव, शिक्षिताः अपि मुखसौविध्यमंगीकुर्वन्ति। तथा च भाषायाः यः विकासः यत् परिवर्तनं वा भवति तत्र नूनमेव अशिक्षितेभ्यः उच्चारितभाषायाः समूहविशेषस्यापि महत्त्वं तिष्ठत्येव।

यदा कस्यापि विशिष्टस्य शब्दस्य शब्दसमूहस्य वा अत्यधिकं प्रयोगः संजायते तदा स शब्दः शब्दसमूहो वा परिवर्तते। यतः बहुभिः जनैः प्रयोज्यत्वात तत्र स्वरूपे अनायासमेव परिवर्तनं समापद्यते। ध्वनिविशेषविषये अर्थविशेषे वा यदा विशेषं बलं प्रदीयते तदा स ध्वनिः अर्थो वा अन्यं ध्वनिमर्थं वा गौणं करोति, शनैः शनैः समाप्तिं च नयति। यदा-कदा शिक्षिताः जनाः शिक्षिता जातयश्च स्वमानसिक-संस्कारात् ज्ञानसंस्काराच्च एकमेव तथ्यम् अनेकप्रकारेण प्रस्तुवन्ति। तस्माद् हेतोः

भाषायां नवीनत्वं, सौन्दर्यम्, माधुर्यं मार्दवं च समायाति। अस्मादपि कारणात् भाषायां परिवर्त्तनं भवति किन्तु परिवर्त्तनमिदं न तथा व्यापकं भवति येन भाषा व्यापकरूपेण प्रभाविता स्यात्। स्नेहवात्सल्यक्रोधावेशादिभ्यश्च भाषायां विकाराः समायान्ति किन्तु शिष्टजनभाषायां स्थायिरूपेण न तिष्ठति। कस्याः अपि भाषायाः अनुकरणस्य अपूर्णताहेतोः—भाषासंस्कारस्यौचित्यविरहितज्ञानहेतोः; शब्दज्ञानस्याभावात्, अवगतेः काठिन्याद् वा अशुद्धरूपेण शब्दाः उच्चार्यन्ते, यस्मात् हेतोः भाषायां परिवर्त्तनं सम्भवति।

शरीरभेदात्, देशभेदात्, भूमिजलवायुप्रभावभेदात्, संस्थायाः प्रभावात् कस्यापि विदुषः महापुरुषस्य च प्रभावातिशयात्, विभिन्नजातीनां सम्पर्कात्, उच्चारणविभिन्नतायाः बहुशः विनिवेशात् च भाषायां यत् परिवर्त्तनं भवति तद् बाह्यं परिवर्तनं कथ्यते। भाषायाः बाह्यरूपपरिवर्त्तनस्य प्रधानं कारणं तिष्ठति—उच्चारणसम्बन्धिपरिवर्तनं वर्णविकारो वा। परिवर्त्तनमिदं प्रत्येकभाषाम् अनिवार्यरूपेण प्रभावयति। तथा च विकासविलासह्रासनाशविरामविकारसम्मिलनसंस्कारेभ्यः विभिन्नेभ्यः कारणेभ्यश्च भाषायां परिवर्त्तनं जायते। परिवर्त्तनमिदं भाषायाः शब्देषु, रूपेषु, पदेषु वा तस्याः ध्वनिषु, अर्थेषु, वाक्यनिर्माणपद्धतिषु च लक्षितं भवति। कतिपयविदुषां मते नूतनशब्दानां निर्मितिः भाषायाः बाह्यरूपस्य विकासे प्रथमकारणत्वेन तिष्ठति। एभिः नूतनशब्दैः भाषायाः विकासे पर्याप्तरूपेण सहयोगः उपलभ्यते। एभ्यः शब्देभ्यः व्यतिरिक्ताः एकान्ततः कल्पिताः अपि शब्दाः भाषायाः विकासे सहायकाः भवन्ति। महाभाष्ये शब्दप्रवृत्तिविषये विचिन्तयन् भगवान् पतञ्जलिः कल्पितयदृच्छाशब्दमपि स्वीकरोति[1]। तन्मते जातिशब्दाः, गुणशब्दाः, क्रियाशब्दाश्च नित्याः, सत्याः, अक्षयाश्च तिष्ठन्ति। अक्षररूपेण अविनाशिरूपेण वा एषां स्थितिः; यतः ते अव्यवहार्याः अवयवरहिताः तथा च सामान्यनिर्वचनप्रक्रियातः बहिर्भूताः किन्तु यदृच्छाशब्दाः मुख्यतः व्यवहारविषयाः, ज्ञानविषयाः, प्रत्यक्षस्य च विषयाः तिष्ठन्ति, पतञ्जलेरनुसारं समग्रं भाषाशास्त्रं समस्तं भौतिकज्ञानं च यदृच्छाशब्दपरिधौ तिष्ठति। यदृच्छाशब्दाः भौतिकशब्दाः, अतएव न नित्यरूपेण तिष्ठन्ति। ते प्रतिक्षणं परिवर्त्तनशीलाः भवन्ति।

---

१. चतुष्टयीशब्दानां प्रवृत्तिः जातिशब्दाः, गुणशब्दाः क्रियाशब्दाः यदृच्छाशब्दाश्चतुर्थाः। — ··· ··· ··· त्रयी च शब्दानां प्रवृत्तिः जातिशब्दाः गुणशब्दाः क्रियाशब्दा इति। न सन्ति यदृच्छाशब्दाः।

—महाभाष्यम्, द्वितीयाह्निकम्।

अत्र प्रदीपकारः अर्थगतं प्रवृत्तिनिमित्तमनपेक्ष्य यः शब्दः प्रयोक्तुरभिप्रायेणैव प्रवर्त्तते स यदृच्छाशब्दोडित्यादिः।

शब्दानां प्राचीनत्वात् तेषामप्रयोगकारणादपि भाषायां परिवर्त्तनं समायाति। सामाजिकधार्मिकादिविभिन्नपरिस्थितीनां परिवर्त्तनात् यत्र अनेके नवीनाः शब्दाः भाषायां प्रचलिताः भवन्ति तत्र अनेके एवंविधा अपि शब्दाः तिष्ठन्ति येषां प्रयोगः व्यवहारे लुप्तप्राय एव तिष्ठति। महाभाष्यकृतापि उक्तं यत् अप्रयुक्ताः अनेके शब्दाः ये नियतविषयाः वर्तन्ते तथा येषां प्रचलनं व्यवहारः वा समाप्तिं गतः। विभिन्नेषु स्थानेषु विभिन्नाः शब्दाः अपि प्रयुज्यन्ते। देशान्तरे ये प्रयुक्ताः शब्दाः ते अन्यदेशीयानां कृते नवीनाः एव भवन्ति। भगवता पतञ्जलिना विषयस्यास्य सुललितं सुस्पष्टं च विवेचनं महाभाष्यस्य पस्पशाह्निके कृतमस्ति।[1]

उपरितनविभिन्नैः विवेचनैः अस्माभिः इदमवलोकितं यत् भाषायां परिवर्तनमवश्यमेव भवति तथा परिवर्तनस्य विभिन्नानि कारणानि भवन्ति किन्त्विदं नावश्यकं यत् सर्वत्र इमानि कारणानि संगच्छन्त एव, एवं च एभ्यः कारणेभ्यः व्यतिरिक्तान्यपि विभिन्नानि कारणानि भवितुमर्हन्ति यानि भाषायाः स्वरूपस्य परिवर्तने नियामकत्वेन स्थातुमर्हन्ति।

भाषायाः परिवर्तनमिदं प्रत्येकभाषामपरिहार्यरूपेण प्रभावयति। एवमिदं सुनिश्चितं तथ्यं यत् भाषा निरन्तरं परिवर्तनशीला तिष्ठति। इयं धारणा तु सर्वथा भ्रान्तैवात्र वरीवर्ति यत् संस्कृतलैटिनप्रभृतिभाषाः शाश्वत्कालिकाः, अतः एव परिवर्तनरहितास्तिष्ठन्ति। वस्तुतः विश्वस्य सर्वासु भाषासु परिवर्तनस्य प्रवृत्तिः दरीदृश्यते। यत्तु संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः तथा च—

देवीं वाचमजनयन्तदेवास्तां विश्वरूपा पशवो वदन्ति।
सा नो मन्द्रेषमूर्जं दुहानाधेनुर्वागस्यानुपसुष्टुतैतत्[2]॥

इत्यादिभिः प्रतिपादितं यत् संस्कृतं दैवी वाक् वर्तते, तन्नित्यं वर्तते, तन्न परिवर्तनात्मकमतः संस्कृतमपरिवर्तनशीला भाषा, इति नौचित्यं सङ्गच्छते। उपरितनसन्दर्भाणामयमर्थः बोध्यः यत् विशिष्टेयं संस्कृतभाषादैवी वाक् तु वर्तते, अतएव कालखण्डस्य सुदीर्घान्तराले विभिन्नैः झंझावातैः प्रताडितापीयं भाषा

---

१. सन्ति वै शब्दाः अप्रयुक्ताः। तद्यथा—ऊष, तेर, चक्र, पेच इति। ते ते शब्दास्तत्र नियतविषया दृश्यन्ते। तद्यथा शवतिर्गतिकर्माकम्बोजेष्वेवभाषितो भवति विकारएनमार्या भाषन्ते-शव इति, सर्वे देशान्तरे, सर्वे खल्वेते शब्दाः देशान्तरेषु प्रयुज्यन्ते, न चैवोपलभ्यन्ते, उपलब्धौ यत्नः क्रियताम्, महान्शब्दस्य प्रयोगविषयः।

—महाभाष्यम्, पस्पशाह्निकम्।

२. ऋग्वेदः, ८।१००।१

स्वकीयमहत्त्वतः न किञ्चिदपि विचलिता, किन्तु एतस्य नेदं तात्पर्यं यत् तत्र शब्दार्थध्वनिप्रभृतिषु परिवर्तनानि न संजातानि। शब्दनित्यतायाः यः दार्शनिकः सिद्धान्तः वरीवर्ति, नासावत्र ग्राह्यः। ये खलु जातिशब्दाः, गुणशब्दाः, क्रियाशब्दाश्च वर्तन्ते त एव सर्वथा नित्याः अपरिवर्तनीया वा। किन्तु ये खलु यदृच्छाशब्दाः ते तु नूनं परिवर्तनशीलाः। तेषां दार्शनिकदृष्टया तत्त्वतः किमपि अस्तित्वं न तिष्ठति। एषामेव शब्दानां परिशीलनं भाषाशास्त्रस्य विवेच्यम्।

एवमिदं सिद्धं यत् जगतः सर्वाः भाषाः परिवर्तनशीलाः। विषयेऽस्मिन् संस्कृत-भाषापि नापवादरूपा। वैदिकसंस्कृततः लौकिकसंस्कृतं यावत् परिवर्तनस्य एका विशाला सरणिः दृश्यते। वैदिकशब्दानां भाषाशास्त्रीयमध्ययनं निरुक्तस्य प्रतिपाद्यम्। विभिन्नेषु प्रातिशाख्येषु विभिन्नासु शिक्षासु च एतस्य तत्त्वस्य प्रतिपादनं संदृश्यते। वेदमन्त्राणामुच्चारणस्य शुद्धतायाः उपस्थापनार्थं ध्वनीनां वैज्ञानिकमध्ययनं प्रातिशाख्येषूपलभ्यते। शिक्षाग्रन्थेषु वैदिकध्वनीनां सर्वांगपूर्णं विवेचनं विहितमस्ति। अर्थविचारदृष्ट्या यास्कप्रणीतं निरुक्तं प्रथमं ग्रन्थरत्नम्। अत्र शब्दानां विशालः इतिहासः भाषावैज्ञानिकविवेचनधिया प्रस्तुतः दरीदृश्यते[1]। यास्कानन्तरं संस्कृतभाषाशास्त्रस्येतिहासे विलक्षणशेमुषीसम्पन्नस्य पाणिनेः स्थानं समायाति। तस्य अष्टाध्यायी एवंविधा कृतिः या भाषायाः वैज्ञानिकविवेचनाय मेरुदण्डतुल्यैव विद्यते। स्वकीयविभिन्नविशिष्टताहेतोः ग्रन्थोऽयं भाषाशास्त्रक्षेत्रस्य अमूल्यं रत्नम्। ध्वनेः सर्वात्मना विवरणम् उपसर्गप्रत्ययादियोजनया अपरिमित-शब्दानां व्युत्पत्तिप्रदर्शनं, वाक्यस्य वैज्ञानिकप्रतिपादनम्, इत्यादिविभिन्नभाषाशास्त्रीयतत्त्वानां पाणिनीयेऽस्मिन् शास्त्रे बहुशः प्रतिपादनमवलोक्यते। पाणिनेः नियमैः संस्कृतभाषा एवं शासिता संजाता यत् तस्याः स्वाभाविकी विकासगतिः न चैव पूर्णतां प्राप्ता न नष्टा चैव[2]। पाणिनीयाः नियमाः एवमावश्यका संजाता यत्

1. We get in the Pratisakhyas the first treatises on Phonetics — —. The next great landmark in the history of Linguistic studies in India is the great Etymologist Yaska... — —. His investigation in the field of Vedic Etymology are of great interest and even now of some value.

— Irach Jehangir Sorabji Taraporewala,

Elements of the Science of Language, p. 424-425

2. ... — Since his days the process of death had begun, for sanskrit, although it took many generations, perhaps a few centuries before it ceased completely to be used as a vernacular.

Elem. of the Sce. of Lang., p. 429

तेषामुल्लंघनस्य साहसं न केनापि व्यधायि। पाणिनेः स्वीयाः काचन विशेषताः वर्तन्ते तद्यथासूत्रशैल्यां व्याकरणसदृशस्य दुरूहस्य विस्तृतस्य च शास्त्रस्य सरलरूपेण संक्षिप्तरूपेण चोपस्थापनं, भाषायाः चरमावयवत्वेन वाक्यानि तिष्ठन्ति[1] न तु शब्दाः इतिसिद्धान्तप्रस्तुतिः, शब्दाः सुबन्ततिङन्ताव्ययेतितिसृषु श्रेणीषु विभक्ताः इति प्रतिपादनम्, एकाक्षरधातुभिः सम्पूर्णशब्दानां रचना संजाता इति स्थिरीकरणम्, उपसर्गप्रत्ययादीनां योजनया अपरिमितशब्दानां रचना भवितुं शक्यते इत्यस्य संस्तुतिः, ध्वनिविज्ञानस्य किं प्रारम्भिकं रुपमासीत्, इत्येतस्य प्रदर्शनं, स्थानप्रयत्न-ध्वन्यादीनां सर्वांगपूर्णं वर्गीकरणं च इमाः सर्वाः मान्यताः अद्यपर्यन्तं सर्वैः स्वीकृताः तिष्ठन्ति। वैदिकलौकिकयोः संस्कृतयोः तुलनात्मकमध्ययनमपि पाणिनेः वैशिष्ट्यम्।

इदं तु सुनिश्चितं तथ्यं यत् पाणिनेः समये संस्कृतं जनसम्पर्कस्य भाषा जनभाषा वा आसीत्। किन्तु तस्य (पाणिनेः) नियमाः एवं सुश्लिष्टाः आसन् यस्मात् हेतोः शनैः शनैः भाषा व्याकरणनिगडेन एवं सुबद्धा संजाता, तस्याः एवंविधं संयमनं संजातं यत् तत्र परिवर्त्तनस्य सम्भावना अतिक्षीणा संजाता। अष्टाध्याय्याः अध्ययनं धार्मिकग्रन्थाध्ययनतुल्यत्वं प्राप्नोत्, तस्मादपि हेतोः जनमानसे इयं धारणा व्याप्ता यत् 'नैकेनापि वर्णेनानर्थकेन भवितव्यं किं पुनः इयता सूत्रेण'। धार्मिकावलोकनेन अनुदृष्टा इयं भाषा विकासस्य सरणितः बहिर्भूता तत्र किंचिदपि परिवर्तनं धार्मिक-मान्यताखण्डनवत् संजातम्।

पाणिनेरनन्तरं संस्कृतभाषाशास्त्रे कात्यायनस्य स्थानं समायाति। नूनमेव उभयोर्मध्ये कतिपयशताब्द्याः अन्तरालः आसीत्। अस्माभिः पूर्वमेव चिन्तितं यत पाणिनेः समये संस्कृतं सम्पर्कभाषा जनभाषा वासीत् तथा तदनन्तरमपि कतिपय-शताब्दीपर्यन्तं एतस्याः भाषायाः तदेव स्थानं महत्त्वं चासीत्[2]। पाणिनेः नियमानां शैथिल्ययुक्तः प्रभावः वस्तुतः कतिपयशत्यनन्तरमेव संलक्षितोऽभूत्। संस्कृतभाषा परिवर्तिता संजाता यथा कापि अन्या मानवभाषा परिवर्तिता भवति, अतः कात्यायनस्य समये अयमावश्यकः संजातः यत पाणिनिनियमानां पूरकनियमाः उपपादयितव्याः, तेषां विभिन्ननियमानां संशोधनम् अनिवार्यं भवेत् तथा सामान्यतः

---

1 He also shows by his three-fold division of parts of speach that he recognised the fundamental principle that the sentence is the unit of language.

Elem. of the Sce. of Lang., p. 427

2. Rapson.

परिवर्तितावस्थायाः अनुरूपमेव पाणिनिनियमानां पुनः सम्पादनं भवेत्[1]। तथ्यमिदं बहुशः स्वीकृतं विद्वद्भिः[2]। वस्तुतः कात्यायनवार्तिकैः निष्पन्ने संस्कृतभाषायाः विभिन्ने स्वरूपे परिवर्त्तनानां विशाला परिपाटी वर्तते। परिवर्त्तनानामियं प्रवृत्तिः चतुर्विधावलोक्यते। संस्कृतभाषायाः रूपं बहुशः परिवर्तितं-ध्वनौ विकाराः समायाताः, अर्थेषु परिवर्त्तनानि समायातानि तथा च वाक्यस्य विचारविषयेऽपि सिद्धान्तानां परिवर्तनात् तदंशभूतानि परिवर्त्तनानि विलोक्यन्ते। अत्र अस्माभिः कात्यायनवार्तिकैः लक्षितानि रूपपरिवर्तनानि प्रस्तूयन्ते किन्तु इतः पूर्वं संक्षेपतः इदं विश्लेष्यते यत् रूपपरिवर्तनतः भाषाशास्त्रविदां किं तात्पर्यम् ?

---

1. We must allow an interval of at least a few centuries between them. As we have already mentioned sanskrit was a living language when Panini analysed it and it continued to be so for a considerable period afterwards. Indeed the effect of his grammar began to be apparent only some generations later for the inherent vitality of the language has carried it forward with the growth of the people. The language has changed as every living language must change Hence by the time of Katyayana it was found necessary to supplement Panini, to correct him in places and in general, to re-edit the work to suit the changed conditions. He sets about amending Panini and he takes only those sutras whieh he thinks require such treatment. —*Elem. of the Sce. of Lang.*, p. 430-31

२. (क) भाषा विज्ञान के इतिहास में एक तो अष्टाध्यायी के वार्तिक का अध्ययन बड़ा महत्त्वपूर्ण है, अध्ययन क्रम में जिन कठिनाइयों का हमें सामना करना पड़ा था उनका समाधान इसमें मिलता है। दूसरे इसमें तत्कालीन भाषा के परिवर्तन हो जाने के कारण अष्टाध्यायी के सूत्रों में यथासंभव परिवर्तन करके उन्हें सरल बनाने का स्तुत्य प्रयास हुआ है।

डा० मनमोहन गौतम, सरल भाषा विज्ञान, पृ० ३२

(ख) वस्तुतः पाणिनि की अष्टाध्यायी की रचना के बाद लगभग दो शताब्दियों में भाषा में कुछ परिवर्तन हो गया था। वार्तिककारों के अनुसार पाणिनि में कहीं-कहीं गलतियाँ हैं, तथा कहीं-कहीं उन्होंने जो कहा है अपर्याप्त हैं, इन्हीं दृष्टियों से वार्तिककारों ने अपने वार्तिक कहे। इस प्रकार वार्तिक अष्टाध्यायी के संशोधक और पूरक हैं।

भोलानाथ तिवारी, भाषा-विज्ञान, पृ० ४६१

शब्दैः सह ये प्रत्ययाः सम्बद्धाः सन्तः शब्दान् वाक्ये प्रयोगयोग्यान् विदधति त एव रूपसंज्ञया अभिधीयन्ते । एषामेव रूपाणां वैज्ञानिकं विश्लेषणं भाषाशास्त्रस्य रूपविज्ञानरूपाङ्गविशेषस्य कार्यं तिष्ठति । शब्दानां पदानां वा रूपाणि सर्वदा एकसमानि न तिष्ठन्ति, तेषु परिवर्त्तनानि समायान्ति । इदमेव रूपपरिवर्त्तनमुच्यते तत्तु ध्वनिपरिवर्तनतः तात्विकरूपेण भिन्नं वस्तु । यद्यपि बहुधा उभयोः यदन्तरं तिष्ठति तस्य स्थिरीकरणमतीव कठिनमवलोक्यते । ध्वनिपरिवर्त्तनस्य सम्बन्धः कस्यापि भाषाविशेषस्य विशिटध्वनितः एवं च तस्य विशिष्टध्वनेः परिवर्तनमेवं-विधान् समग्रशब्दान् प्रभावयितुं क्षमं यत्र स विशिष्टः ध्वनिः तिष्ठति । ध्वनिपरि-वर्तनस्य ये नियमाः ,ते प्रायशः कस्यामपि भाषायां समागतविशिष्टध्वनितत्त्वान्यपि प्रभावयन्ति किन्तु रूपपरिवर्तनस्य क्षेत्रं तदपेक्षया अधिकं सीमितं भवति । तत्तु कस्यापि शब्दस्य पदस्य वा रूपमेव प्रभावितं करोति, भाषायाः पूर्णसंस्थानतः तस्य कोऽपि सम्बन्धः न तिष्ठति । ध्वन्यात्मकानि परिवर्तनानि शब्देषु न भवन्ति प्रत्युत ध्वनिग्रामेषु भवन्ति, किन्तु रूपात्मकपरिवर्तनानां सम्बन्धः शब्दैः सह तिष्ठति । सामान्यतः सम्बन्धतत्त्वैः सह न वरीवर्ति, एतस्य इदमेव न कारणं यत् सम्बन्धतत्त्वानि शब्दस्य अभिन्नानि अंगानि प्रत्युत एतदर्थं यत् पदरचनात्मकस्य परिवर्त्तनस्य कारणं, विचारधारायां नहि, अपितु भाषया तस्याः विचारधारायाः प्रयोगे अभिव्यक्तौ च निहितं तिष्ठति । पदरचनात्मकं परिवर्तनं कस्यापि पदस्य विशेषरूपेण प्रयोज्यत्वात् संजायते किन्तु तस्य व्यापकता सीमिता भवति । विभिन्नैः ध्वन्यात्मकपरिवर्तनैस्तु समग्रं ध्वनिचक्रमेव विकृतिमापद्यते । पदरचनात्मकैः परिवर्तनैस्तु सकलं पदरचनाचक्रं न वैकृतिमाप्नोति । तस्य केवल-मेकदेश एव विशिष्टप्रयोगकारणात् प्रभावितः सन् परिवर्तितः संजायते[1] । ध्वन्यात्मकं परिवर्तनं सामस्त्येन भवति । तत्सम्पर्केण प्रभावितः कोऽपि अवशेषः न तिष्ठति—प्राचीनरूपस्य स्थाने एकं नवीनं रूपं समुपस्थितं भवति परन्तु पदरचना-त्मकविकारस्य नियमाः स्वल्परूपेणैव संघटन्ते, फलतः नवीनैः रूपैः सह कानिचित् प्राचीनानि रूपाणि अपि प्रयुज्यन्ते, अतः विकारस्तरे अवशेषविशेषः तिष्ठत्येव ।

पारम्परिकभाषाशास्त्रविदां मते रूपपरिवर्तनस्य पञ्च मुख्यकारणानि विद्यन्ते —शब्दागमः, शब्दविपर्ययः, शब्दलोपः, शब्दपरिवर्तनं, शब्दविकारश्च । यदा केनापि शब्देन सह कोऽपि नवीनः शब्दः प्रयुज्यते अथवा एकस्मिन्नेव शब्दे बललाभाय तस्यैव शब्दस्य यदा द्विरावृत्तिः भवति तदा शब्दागमः संजायते, यथा—वारम्बारं, भूयोभूयः इत्यादिरूपाणि । कदाचित् समस्तपदेषु समागतशब्दानां विपर्ययः भवति,

1. Meillet, L'evolution des formes grammaticales XLIII, 1912, P. 381.

यथा दिवारात्रिः इत्यस्य स्थाने रात्रिन्दिवं, प्रातः सायम् इत्यस्य स्थाने सायंप्रातः। यदा द्वाभ्यां शब्दाभ्यां सम्मिलितस्य कस्यापि समस्तपदस्य पदमेकं विलुप्यते तदा शब्दलोपः भवति, यथा देवदत्तः इत्यस्य स्थाने दत्तः, सत्यभामा स्थाने भामा इति। क्वचित् भावसंस्कारकारणात् तत्तुल्यस्य कस्यापि प्रथितवस्तुनः कारणाद् वा तस्य वस्तुनः नाम पूर्वप्रख्यातवस्तुनः आख्यां गृह्णाति तदा शब्दपरिवर्तनं भवति, तद्यथा—वाल्मीकिरामायणकारणात् तुलसीकृतं रामचरितमानसमपि बहुत्र रामायणमेव कथ्यते। कदाचित्तु कोऽपि शब्दः वक्तुः अनभिज्ञताकारणात् अथवा श्रोत्रा उचितरूपेण अश्रवणाच्च मूलप्रकृतितः विकृतिमाप्नोति तदा शब्दविकारः भवति। रूपपरिवर्तनस्य एषु पञ्चसु कारणेषु शब्दविपर्ययशब्दलोपौ तु केवलं समस्तपदेष्वेव तिष्ठतः।

आधुनिकभाषाशास्त्रज्ञानां मते प्रयत्नलाघवम् यथा भाषायां परिवर्तनस्य मूलकारणत्वेन तिष्ठति तथैव रूपपरिवर्तनस्यापि तत् मूलकारणमेव। भाषायां द्विविधा प्रवृत्तिः निरन्तरं कार्यशीला तिष्ठति। तत्र प्रथमा विद्यते-एकरूपतायाः आवश्यकता। द्वितीया तु वर्तते वाचकतायाः आवश्यकता। प्रथमप्रवृत्तितः असाधारणसंबन्धतत्त्वानां बहिष्कारः भवति तथा द्वितीयप्रवृत्तिहेतोः नवीनसम्बन्ध-तत्त्वानां सृष्टिः भवति। वाचकतायाः एकरूपतायाश्च आवश्यकता सदैव तिष्ठति। तयोः आवश्यकतार्थं बुद्धिः जीर्णरूपाणां पुनः परिष्करणं करोति एवं च अस्माद्धेतोः पदरचनायां भाषायाः रूपे वा परिवर्तनं भवति।

मानवः स्वसुखार्थं निरन्तरमेव अल्पायासं कर्तुं प्रयत्नशीलः तिष्ठति। अस्मादेव प्रयत्नलाघवकारणात् पदानां रूपेषु एकरूपतायाः संभवार्थं स सततं प्रयतते। अस्याः प्रवृत्त्याः उदाहरणानि सर्वासु भाषासु दरीदृश्यन्ते। एकरूपतायाः इयं प्रवृत्तिः सादृश्य-मूला तिष्ठति[1]। सादृश्यं तस्याः पद्धत्याः नाम वर्तते यया ज्ञातरूपमाधृत्य मानव-मस्तिष्कम् एकस्मै नवीनरूपाय, नवीनपदाय, भावाभिव्यक्तये वा एकां नवीनां शैलीं कल्पयति। मस्तिष्के एकसदृशेषु अनेकशब्देषु तिष्ठत्सु सत्सु कतिपयासदृश-शब्दानां यथावस्थितौ व्यवहारकरणं कष्टसाधकं भवति, अतः मानवः अस्मात् कष्टसाध्यात् प्रयत्नात् विमोक्तुं सादृश्यस्य प्रयोगं विदधाति। संस्कृतस्य नपुंसक-लिंगस्य अधिकांशरूपाणि पुंल्लिंगसदृशानि एव वर्तन्ते। भाषायाः प्रत्येकस्मिन्नंगे सादृश्यस्य उपयोगः विधीयते-ध्वनौ, रूपे, अर्थे, वाक्ये च एतस्य क्षेत्रं वरीवर्ति। वाक्ये अस्य प्रभावः अन्यापेक्षया स्वल्परूपेण दृश्यते। अर्थेऽपि बाहुल्येन नावलोक्यते

1. V. Henry, LXXXII; Giles, CXXXII p. 58, H. OertaL CXXXVIII, p. 150, H, Paul, CLXXXVIII, p. 96., Meillet, IX. Vol. 8, p. 860.

किन्तु रूपपरिवर्तने, ध्वनिपरिवर्तने च एतस्य प्रामुख्यं तिष्ठति, तथा च भाषायाः विकासे सादृश्यस्य प्राधान्यं सुस्पष्टमेव[1]। संस्कृतभाषायां स्वसृशब्दस्य पंचम्यां 'स्वसुः' मातृशब्दस्य 'मातुः', पितृशब्दस्य 'पितुः'; इति रूपाण्यवलोक्य तत्सादृश्यात् पतिशब्दस्य पत्युः इति रूपं प्रचलितम्। नियमतस्तु पतेः इति संभाव्यमासीत् यथा च भूपतेः इत्यादिषु प्रयोगेषु अवलोक्यतेऽपि।

यदा-कदा अनेकरूपतायाः समाश्रयणस्य प्रवृत्तिरपि रूपपरिवर्तनस्य कारणत्वेन तिष्ठति, यतस्तु मस्तिष्के अनेके एकसदृशशब्दाः भ्रान्तिमुत्पादयन्ति। भ्रान्तिमिमां दूरीकर्त्तुमनेकरूपतायाः समाश्रयणं विधीयते।

श्रीभोलानाथतिवारी स्वीकरोति यद् भाषायां केचन एवंभूता नियमा भवन्ति ये अधिकांशरूपाणि प्रभावयन्ति, एतद्विपरीतत्वे केचन अपवादाः अपि भवन्ति ये एषां बहुप्रचलितनियमानामुल्लंघनं विदधति। नियमितरूपाणां सर्वदैवं हृदि निदिध्यानं तथा प्रयोगकाले तेषामनुस्मरणं सारल्ययुक्तं तिष्ठति। एतद्-विपरीतं नियमविरोधिरूपाणां सदैव स्मरणं यथावसरं तेषां प्रयोगविधानं कठिनं संजायते। काठिन्यमिदमपाकर्तुं सर्वः भाषाभाषीस्वान्तर्मनसा ज्ञातानामज्ञातानाञ्च अनियमितरूपाणां स्थाने नियमितरूपाणां प्रयोगं विधातुं वाञ्छति।

ध्वनिपरिवर्तनकारणाच्च रूपपरिवर्तनं भवति। संयोगात्मिकासु भाषासु ध्वनिपरिवर्तनाद्धेतोः यदा विभक्तयः परिवर्तिताः सत्यः विलुप्यन्ते तदा तासां स्थाने नवीनविभक्तीनां प्रयोगः विधीयते। यस्मात् कारणात् नवीनानि रूपाणि समा-यान्ति। सर्वः भाषाप्रयोक्ता इदमेवाभिलषति यत् तस्य अभिव्यक्तिः अधिकं यथा स्यात् तथा सुस्पष्टा भवेत्। क्वापि अस्पष्टता मा तिष्ठेत्, यतः तस्य यदुपस्था-पनानि तिष्ठन्ति तानि सुष्ठुरूपेण अवगन्तुं शक्येयुः। अतः यदैव कस्मिन्नपि रूपे स्पष्टतायाः अभावः तिष्ठति तदा नवीनरूपाणां प्रयोगः प्रारभ्यते। काचन अस्पष्ट-तास्तु अज्ञानात् भवन्ति। आसामपाकरणाय यानि नूतनरूपाणि समागच्छन्ति तत्र अज्ञानमपि एकं प्रमुखं कारणम्। शब्दस्य कस्मिन्नपि अंशविशेषं अधिकं बलाघातादपि नवीनरूपाणामाविष्कृतिः भवति। आवश्यकतानुरूपमपि यदा-कदा नवीनरूपाणां समागमनं भाषायां संजायते किन्तु एतत्तु स्वल्परूपेणैवावलोक्यते।

कात्यायनवार्तिकैश्च निष्पन्नासु पदरचनासु बहुशः रूपपरिवर्तनानि अवलोक्यन्ते, येषां विभिन्नवार्तिकविश्लेषणपुरस्सरमुन्मेषेऽस्मिन् परिचर्चा विधास्यते।

---

१. राजेन्द्र द्विवेदी, भाषाशास्त्र का पारिभाषिक शब्दकोष पृ० २७७ तथा भोलानाथ तिवारी, भाषा विज्ञानकोष, पृ० ६६५-६६७।

भाष्यम्—वा प्रकरणे तीयस्य ङित्सूपसंख्यानम् (१।१।३६)
काशिका—विभाषाप्रकरणे तीयस्य वा ङित्सु सर्वनामसंज्ञेत्युपसंख्यानम् ।
प्रक्रियाकौमुदी—तीयस्य ङित्सु वा सर्वनामता वाच्या (१।१।३३)
सिद्धान्तकौमुदी—विभाषाप्रकरणे तीयस्य ङित्सूपसंख्यानम् (१।१।३३)

तीयप्रत्ययान्तसर्वनामगणपठितशब्दानां ङकारेत्संज्ञकेषु सुप्सु परेषु विकल्पेन सर्वनामसंज्ञायाः प्रतिपादनं कर्तव्यमित्यर्थः। उदाहरणम्—द्वितीयस्मै-द्वितीयाय, तृतीयस्मै-तृतीयाय, द्वितीयात्-द्वितीयस्मात्, तृतीयात्-तृतीयस्मात्, द्वितीयस्मिन्-द्वितीये, तृतीयस्मिन्-तृतीये इतिरूपाणि। पाणिनेः समये 'सर्वादीनि सर्वनामानि[१]' इति सूत्रेण सर्वनामसंज्ञायाः भावेन सर्वनाम्नः स्मै 'ङसि ङ्योः स्मात्स्मिनौ[२]' इति सूत्रेण स्मै, स्मात्, स्मिन्-आदेशेषु कृतेषु एकैकम् एवं भवतिस्म, केवलं जसि विभक्तौ विकल्पेन अन्यानि रूपाणि अपि भवन्ति स्म। समसामयिकभाषायाम् अन्य-विभक्तिष्वपि द्वितीयाय तृतीयाय-प्रभृतिवैकल्पिकप्रयोगान् अवलोक्य कात्यायनेन, प्रकृतवार्तिकस्य रचना कृता। द्वितीयाय, तृतीयाय, द्वितीये, तृतीये इत्यादिरूपपरि-वर्तनस्य मुख्यं कारणं सादृश्यमेव तिष्ठति।

चतुर्थाय, पञ्चमाय, षष्ठाय, सप्तमाय इत्यादिप्रयोगमवलोक्य भाषायां द्वितीयाय, तृतीयायेत्यादि प्रयोगाः प्रचलिताः, तेषामेव सादृश्यात् परिवर्तित-रूपाणां साधुत्वप्रदर्शनाय कात्यायनेन वार्तिकस्यास्य उपसंख्यानं विहितम्। न्यासकारः जिनेन्द्रबुद्धिः भाष्यकारं तदनुयायिनश्चाक्षेपयन् कथयति 'ये तु वा प्रकरणे तीयस्य ङित्सूपसंख्यानमिति'[३] सर्वनामसंज्ञां तीयस्योपसंचक्षते तथा इदं सूत्रं (विभाषाद्वितीयातृतीयाभ्याम्) प्रत्याचक्षते, तेनैव (वार्तिकेनैव) सिद्धत्वात्। तच्चोपसंख्यानमवश्यं कर्त्तव्यम् स्मादयः ङिति विकल्पेन यथा स्युरितिद्वितीयस्मै-द्वितीयाय, तृतीयस्मिन् तृतीये इति। अन्ये तु अनेनैव (सूत्रेणैव) स्मायादयः सिद्धयन्तीत्युपसंख्यानमेव (वार्तिकस्य) प्रत्याचक्षते। कथम्? 'सर्वनाम्नः' इत्येतदिहानुवर्तते, स्याङिति निवृत्तम् तेनैवमभिसम्बन्धः क्रियते—सर्वनाम्नो ङिति यदुक्तं तद्विभाषा द्वितीयातृतीयाभ्यां भवतीति। तेन स्मायादयोऽप्यनेनैव भविष्यन्तीति नार्थः, उपसंख्यानेन। अत्र न्यासकारस्य विवेचनेन एवं ज्ञायते यत् सः वार्तिकोपसंख्यानपक्षपाती न वर्तते। अत्र हरदत्तोऽपि तस्यैव मतं समर्थयति तन्मते ननु च 'तीयस्य वा ङित्सूपसंख्यानम्' इत्यनेनैव सिद्धत्वान्नार्थः एतेन, तच्चावश्यं वक्तव्यं लिङ्गान्तरेऽपि स्मायादयो विकल्पेन यथा स्युरिति?

---

१. अष्टाध्यायी, १।१।२७
२. अष्टाध्यायी, ७।१।१४-१५
३. काशिका, न्यासः, ७।३।११५

नैतद्युक्तमुच्यते, यद्धि सूत्रेणासिद्धं तदुपसंख्यानेन साधनीयम्, न पुनरुपसंख्यानाश्रयणेन सूत्रस्य प्रत्याख्यानं युज्यते। यदि पुनरत्र ह्रस्वयोर्ग्रहणं कृत्वा (सर्वनाम्नः स्याड्ढ्रस्वश्च) स्याड्ग्रहणं च निवर्त्य 'सर्वनाम्नः' इत्येवानुवर्त्यातिदेश आश्रीयते—सर्वनाम्नो यदुक्तं तद्विभाषा भवति द्वितीयातृतीययोरिति, तदोपसंख्यानम् शक्यमकर्तुम्[१]।

अस्माकम्मते सूत्रापेक्षया वार्तिकपक्षमेवोचितम्। अत्र कुतोऽपि ह्रस्वस्य आनयनं, स्याडः निवर्तनं पुनश्च कुतोऽपि सर्वनाम्नः अनुवर्तनम् इत्यादिविभिन्नकष्टसाध्येनार्थेन सूत्रेण प्रयोगसिद्धिः भवति किन्तु वार्तिकेन अस्यायासस्य न काप्यावश्यकता तिष्ठति, अतएव च भगवता पतञ्जलिना उक्तम्—

'विभाषा द्वितीयातृतीयाभ्यामित्येतन्न वक्तव्यं भवति। किं पुनरत्र ज्यायः? उपसंख्यानमेवात्र ज्यायः। इदमपि सिद्धं भवति। द्वितीयाय। द्वितीयस्मै। तृतीयाय। तृतीयस्मै[२]'।

भा०, सि०—आङि नु प्रच्छ्योः (१।३।२१) (सि० ६ १।१४२)

आङि नु प्रच्छ्योरात्मनेपदस्योपसंख्यानं कर्त्तव्यम्। उदाहरणम्—आनुते शृगालः, आपृच्छते गुरुम्। आनुते इत्यस्य उत्कण्ठापूर्वकं शब्दं कुरुते इत्यर्थः आपृच्छते—प्रस्थानाय अनुमतिं याचते, (आपृच्छस्व प्रियसखममुं तुंगमालिङ्ग्य शैलम् इति मेघदूते) प्रच्छ ज्ञीप्सायाम् इति तुदादिः, 'ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति[३] च' इति सूत्रेण सम्प्रसारणम्। आनुते—'णु स्तुतौ' अदादिः, अयं चात्रोत्कण्ठापूर्वकशब्देन विद्यते।

नाथते, संक्रीडते, परिक्रीडते-इत्यादिशब्दानां सादृश्यादिहापि आत्मनेपदजन्यं रूपपरिवर्तनम्।

भा०—गवि च विन्देः संज्ञायामुपसंख्यानम् (३।१।१३८)

का०, प्र० सि०—'गवादिषु विन्देः संज्ञायामुपसंख्यानम्'

यस्य तात्पर्यं तिष्ठति—'गवि चोपपदे विन्देः संज्ञायामुपसंख्यानं कर्त्तव्यम्-गोविन्दः—कर्मण्यण्'[४] इत्यपवाद्य प्रकृतेन शप्रत्यये गोविन्दः इति रूपम् 'अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च[५]। इति सूत्रेण

१. काशिका, पदमञ्जरी, ७।३।११५
२. १।१।३६ सूत्रोपरि भाष्यम्।
३. अष्टाध्यायी, ६।१।१६
४. अष्टाध्यायी, ३।२।१
५. अष्टाध्यायी, ३।१।१३८

शप्रत्यये—विन्दतीति विन्दः भवति किन्तु सोपसर्गके गाः उपनिषद्वाचः प्रमाणतया विन्दतीत्यर्थे गोशब्दपूर्वके गोविन्द इति प्रयोगे सूत्रस्याप्रवृत्तिमभिलक्ष्य प्रकृतस्योपसंख्यानं कृतम् ।

अत्र भाष्यकारेणोक्तम्—'अत्यल्पमिदमुच्यते गवीति, 'गवादिष्विति वक्तव्यम्'[1] यतः अरविन्दः इत्यस्यापि सिद्धिर्भविष्यति, भाष्यस्येदमेव वचनमाश्रित्य काशिकादिषु 'गवादिषु विन्देः इत्यादिवार्तिकमुपस्थापितम् । अत्र बालमनोरमायां यल्लिखितं—गवादिष्विति वार्तिकमिदं[2] तन्नोपयुक्तम् चक्रे नाभिनेभ्योन्तरालप्रोतानि काष्ठानि अराणि, तत्सदृशानि दलानि विन्दतीत्यर्थे अरविन्दः ।

गोविन्दारविन्दशब्दयोः पाणिनिना सिद्धिः न प्रदर्शिता तयोः भाषायां बहुशः प्रचारं प्रसारञ्चावलोक्य प्रकृतस्योपसंख्यानं कात्यायनकृतं पतञ्जलिकृतं च ।

भा०, प्र०, सि०	अभ्यर्हितं च (२।२।३४)
का०	अभ्यर्हितं च पूर्वं निपततीति वक्तव्यम् (२।२।३४)

द्वन्द्वसमासस्य विषये अभ्यर्हितस्य—अत्यन्तादरणीयस्य पूर्वप्रयोगः विधातव्यः, इति वार्तिकाभिप्रेतम् । उदाहरणम्—माता च पिता च—मातापितरौ, श्रद्धा च मेधा च—श्रद्धामेधे, सीता च रामश्च—सीतारामौ, गौरी च शंकरश्च-गौरीशंकरौ, राधा च कृष्णश्च—राधाकृष्णौ । वार्तिकस्याभावे पूर्वप्रयोगस्य निश्चितव्यवस्थायाः अभावात्, एषु प्रयोगेषु पूर्वापरक्रमे व्यतिक्रमः भवेत् ।

कात्ययनकालिके समाजे स्त्रीणां स्थानमतीवादरणीयमासीदतः वार्तिककृता अस्यैव ऐतिहासिकस्य सामाजिकस्य वा तथ्यस्य अभिव्यंजनार्थं प्रकृतस्य विधानं कृतम् । माता पितुरपि अधिका पूज्या विद्यते स्म, अतएव मातापितरौ इति, प्रयोगप्रचलनम् मनुनापि प्रोक्तं—'पितुदर्शगुणा माता' । इह शब्दविपर्ययात्मकं रूपपरिवर्तनं तिष्ठति ।

भा०	ऋतुनक्षत्राणामानुपूर्व्येण समानाक्षराणाम्	(२।२।३४)
का०	ऋतुनक्षत्राणामनुपूर्व्येण समानाक्षराणां पूर्वनिपातो वक्तव्यः	(२।२।३४)
प्र०	ऋतुभानां समा (समाना) क्षराणामानुपूर्व्येण पूर्वं निपातः	(२।२।३४)
सि०	ऋतुनक्षत्राणां समानाक्षराणामानुपूर्व्येण	(२।२।३४)

---

१. महा०, ३।१।१३८

२. सि० कौ० बाल०, ३।१।१३८

ऋतुनामानुपूर्व्यं प्रादुर्भावकृतं, नक्षत्राणामुदयकृतम्। समानाक्षरणाम् ऋतुवाचक-शब्दानां समाक्षराणां नक्षत्रवाचकशब्दानां च क्रमशः पूर्वप्रयोगः भवति, यथा हेमन्तशिशिरवसन्ताः, शिशिरवसन्तावुदगयनस्थौ, कृत्तिकारोहिण्यौ।

वार्तिकविधानाभावे हेमन्तशिशिरवसन्ताः, वसन्तहेमन्तशिशिराः, इत्यादिरूपाणि अपि भवितुं शक्नुवन्ति। कात्यायनसमये ऋतूनां पूर्वापरक्रमः हेमन्तशिशिर-वसन्ताः इत्येवासीत्, अतश्च भाषायां तेषामानुपूर्व्यार्थं प्रकृतस्य प्रणयनं कृतम्। इदन्तु शब्दविपर्ययमूलकं रूपपरिवर्तनं द्योतयति।

भा० खलादिभ्यः इनिः (४।२।५१)
का० + सि० खलादिभ्यः इनिर्वक्तव्यः (४।२।५१)

खलादयः शब्दाः प्रयोगतोगम्याः खलादिभ्यः शब्देभ्यः इनिप्रत्ययः कर्त्तव्यः। अयमपि प्रत्ययः स्वभावतः स्त्रियामेव। उदाहरणम्—डाकिनी, कुण्डलिनी, कुटुम्बिनी। डस्—त्रासार्थम् अकतिअक वक्रगतौ, इनिः, ङीपि डाकिनी—देव्याः अनुचरीभेदे, 'सार्द्धं च डाकिनीनाञ्च विकटानां त्रिकोटिभिः' इति ब्रह्मपुराणे। कुण्डलानां समूहः कुण्डलिनी—

'एषा कुण्डलिनी नाम्ना पुष्टिकान्तिबलप्रदा।
धातुवृद्धिकरीवृषा रुच्याचेन्द्रियतर्पणी॥'

इति भावप्रकाशे। कुटुम्बः अस्ति अस्याः इति इनिः, ङीपि च कुटुम्बिनी भार्या पुत्रवती स्त्री वा।

उपद्रवकारिणी स्त्रीजनभेदे डाकिनी, शाकिनी, पिशाचिनी, कपालिनी प्रभृतिशब्दानाम् समाजे बहुशः प्रयोगमवलोक्य तदर्थं वार्तिकस्यास्य विधानं कृतमस्ति। एषामेव शब्दानां सादृश्यात् कुण्डलिनीकुटुम्बिनी-प्रभृतयः शब्दाः भाषायां समागताः येषामपि रूपसिद्धये वार्तिकमिदमुपन्यस्तम्।

'इनि त्रकट्यचश्च'[1] इति सूत्रेण निष्पन्नेन खजिनीशब्दसादृश्येन भाषायां पूर्वोक्तानि डाकिनीप्रभृतीनि रूपाणि समवलोक्य वार्तिकमिदम् समुपस्थापितम्।

भा०—काशिका-पूर्वादिष्ववरस्योपसंख्यानम् (२।१।३०)
प्र०—

सि०—अवरस्योपसंख्यानम् (२।१।३०)

पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः[2] इत्यत्र पूर्वादिषु समासकारणत्वे-नोगत्तेषु सत्सु अवरशब्दस्यापि उपसंख्यानं कार्यमिति वार्तिकाभिप्रायः। तृतीयान्तम्

१. अष्टाध्यायी, ४।२।५१
२. अष्टा०, २।१।३०

अवरप्रकृतिसमर्थसुबन्तेन सह समस्यते इति तात्पर्यम् । अत्रोद्योतकार:—"न च कैयटरीत्योनार्थत्वादेव सिद्धिरिति वाच्यम् । चैत्रादवर फाल्गुन इत्यादौ पूर्वशब्द-समानार्थताया अपि अवरशब्दस्य दर्शनात्[१]" इत्यनेन वार्तिकोपसंख्यानस्यावश्यकता प्रतिपादिता । उदाहरणम्—मासेन अवरः मासावरः । अत्र 'पूर्वसदृशेति' सूत्रेण समासस्य न प्राप्तिः किन्तु मासपूर्वः इत्यादिप्रयोगसादृश्यात् मासावरोऽयं संवत्सरा-वरोऽयम्—इत्यादिप्रयोगप्रचलनेन एषामौचित्यसिध्यर्थं कात्यायनेन प्रकृतस्य प्रतिपादनं कृतम् ।

भा० का० —अनेकप्राप्तावेकस्य नियमोऽनियमः शेषेषु (२।२।३४)

यदि जातिपदार्थपक्षः आश्रीयते तदा लक्षणावृत्त्यभावादेकस्यैव नियमे सति शेषाणामनियमेन भाव्यम्, अथ व्यक्तिपक्षस्तदा पुनः पुनर्लक्षणप्रवर्तनात् सर्वेषां नियमेन भाव्यमिति मत्वा शंकेयं समुदेति यद् 'अथ यत्र बहूनां पूर्वनिपातप्रसंगः किं तत्रैकस्य नियमो भवति, आहोस्विदविशेषेण'[२] । इदमेव समाहितं भवति वार्तिकेनानेन तथा च द्वन्द्वे अनेकस्य प्राप्तौ एकस्य नियमो भवति शेषेषु अनिय-मस्तिष्ठति । उदाहरणम्—पटुश्च, मृदुश्च, शुक्लश्च—पटुमृदुशुक्लाः, अत्र एकस्य पटोः पूर्वप्रयोगस्य नियमः किन्तु पटुव्यतिरिक्तेषु शेषेषु पूर्वप्रयोगानियमः, यथा च—पटुशुक्लमृदवः इति । एवं चेदं वार्तिकं भाषायां रूपपरिवर्तनस्य सूचकम् ।

भा०—संख्यायाः अल्पीयसः (२।२।३४)
का०—संख्यायाः अल्पीयस्याः पूर्वनिपातो वक्तव्यः (२।२।३४)
प्र०—अल्पीयसी पूर्वम् (वार्तिकचिह्नरहितम्) (५।४।१५७)
सि०—संख्याया अल्पीयस्याः (२।२।३५)

अल्पीयसः—अल्पीयसोऽर्थस्य वाचिकायाः इत्यर्थः । वार्तिकमिदं द्वन्द्वे अद्वन्द्वे च प्रवर्तते । अतएव तत्पुरुषेऽपि एकादशेत्येव बहुव्रीहौ द्वित्रा इत्यादिसिद्धिः । संख्यावाचकानामेव शब्दानां परस्परं समस्ते सति अल्पसंख्याकस्य संख्यावाचकस्य शब्दस्य पूर्वप्रयोगः भवति । 'अल्पाच्तरम्[३]' इति सूत्रेण द्वौ वा त्रयो वा इति विग्रहे त्रिद्विः एवं प्रयोगापत्तिः किन्तु भाषायां द्वित्राः इति प्रयोगमवलोक्य कात्या-यनेन प्रकृतस्य विधानं कृतम् । एतमेव एकादश द्वादश इत्यपि सिध्यति ।

द्वित्राः, एकादशेत्यादिप्रयोगाणां पूर्वप्रयोगनिर्देशः मुखसौविध्यार्थं कृतः । प्रयोगाणामेषां रूपसिद्धिः यद् वार्तिकेन प्रदर्शिता तत्तु प्रयत्नलाघवजन्यं पदरचनायां सम्भूतं रूपपरिवर्तनम् संसूचयति । एवञ्च शब्दविपर्ययमूलकं रूपपरिवर्तनमिदम् ।

---

१. महा०, उद्यो० २।१।३०
२. महा०, २।२।३४
३. अष्टाध्यायी, २।२।३४

भा०—लघ्वक्षरम् (२।४।३४)

का०—लघ्वक्षरं पूर्वं निपततीति वक्तव्यम् ,,

प्र० सि०—लघ्वक्षरं पूर्वम् ,,

समासे सति लघ्वक्षरस्य पूर्वप्रयोगः भवतीति वक्तव्यम्। यथा—कुशाश्च काशाश्च–कुशकाशम्, शराश्च चापाश्च-शरचापम्। एषु स्थलेषु वार्तिकाभावे काशकुशं, चापशरमित्यपि रूपं भवेत्। अत्र कुशस्य शरस्य च पूर्वप्रयोगः शब्दविपर्ययरूपं रूपपरिवर्तनं संसूचयति।

भा० प्र० सि०—वर्णानामानुपूर्व्येण (२।२।३४)

का०— वर्णानामानुपूर्व्येण पूर्वनिपातः ,,

ब्राह्मणादिषु वर्णेषु सृष्टेः क्रमबद्धक्रमानुसारमेव परस्परं तेषां समासे पूर्वप्रयोगः भवति। अत्र केचन शंकन्ते यत् ऋतुनक्षत्राणामानुपूर्व्येण समानाक्षराणाम् इत्यत्रैव वर्णग्रहणं कस्मान्न कृतमिति पर्यनुयोगदोषापत्तिः अत एवोक्तम् समानाक्षराणामिति, असमानाक्षराणामपि वर्णानामानुपूर्व्येण पूर्वनिपात इष्यत इति पृथग्वचनम्। आनुपूर्व्यञ्च वर्णानां जन्मकृतमिति लोकव्यवहारे प्रसिद्धम्। प्रसिद्धिश्च श्रुतिकृता[१]। श्रुतौ हिं श्रूयते—'मुखतो ब्राह्मणमसृजद्बाहुभ्यां राजन्यमूरूभ्यां वैश्यं पद्भ्यां शूद्रम्' इति वार्तिकस्य उदाहरणम्—ब्राह्मणश्च, क्षत्रियश्च, विट्च, शूद्रश्च—ब्राह्मणक्षत्रियविट्शूद्राः।

वार्तिकाभावे पूर्वप्रयोगे अव्यवस्था स्यात्। वर्णाश्रमव्यवस्थायाः पूर्णकठोरतया अनुपालनं समाजे आसीत्, इति सामाजिकी पृष्ठभूमि. वार्तिकस्यास्य प्रणयने सहायिका। समाजे येन क्रमेण वर्णानाम् आदरः महत्वं वासीत् तेनैव क्रमेण तेषां भाषायामपि प्रयोगः आसीत्। श्रीवासुदेवशरणाग्रवालमहोदयोऽपि एवमेव अनुमनुते यत्—'प्रकृतवार्तिकेन ज्ञायते यत्–आनुपूर्वीतः चतुर्णां वर्णानां कृते ब्राह्मणक्षत्रियविट्शूद्रा इति समस्तं पदं प्रयुज्यते स्म[२]।

भा०, सि० हरिद्रामहारजनाभ्यामञ् (४।२।२)

का० हरिद्रामहारजनाभ्यामञ् वक्तव्यः ,,

प्र० प्र० हरिद्रामहारजनाभ्यामञ् वाच्यः ,,

हरिद्रामहारजन शब्दाभ्यां रक्तेऽर्थे अञ् प्रत्ययः वाच्यः। उदाहरणम्–हरिद्रम्, महारजनम् विभिन्नेषु रंगेषु हरिद्र महारजनरंगयोरपि प्रचलनं तात्कालिकसमाजे आसीत् आभ्यां रंगाभ्यां रक्तानि वस्त्राणि हरिद्रामहारजनाख्याभ्यामभिधीयन्ते

२. वेददर्शनाश्रयणोत्पत्तिकमेव वर्णानामानुपूर्व्यम्। महा०, प्र० २।२।३४

१. पा० का० भा० पृ० ९०

स्म। एवं सामाजिकावश्यकतानुसारं भाषायामागतमिदं रूपपरिवर्तनं वार्तिकेनानेन सूच्यते।

अत्र भाष्यकारेणेदं व्याख्यानं कृतं यत् वार्तिके रागादित्युच्यते चेत्तदा तत्रेदं न सिद्ध्यति—हारिद्रौकुक्कुटस्य पादौ, काषायौ गर्दभस्य कर्णाविति। वस्तुतः उपमानात् रूपसादृश्यनिमित्ताद् सिद्धम्हारिद्राविवहारिद्रौ, काषायाविव काषायौ गर्दभस्य कर्णौ।

लाक्षया रक्तं वस्त्रं लाक्षिकम्[२], एवमेव रोचनेन रक्तं वस्त्रं रौचनिकम् इत्यादि-प्रयोगे सादृश्यवशाद् रूपपरिवर्तनमिदम्।

भा०, वि० का०, सि०	केलिमर उपसंख्यानम्	(३।१।९६)
प्र०	कर्मकर्तरि केलिमरवाच्यः	,,

कर्मकर्तरि चायं कैश्चिदिष्यते, भाष्यकारेण तु पचेलिमा माषाः पक्तव्याः, भिदेलिमास्सरलाः भेत्तव्याः इति शुद्धे कर्मणि प्रदर्शितः प्रत्ययोऽयम्। तथा सकर्मक-धातोः कर्मणि अकर्मकधातोः भावे तव्यत्–तव्य–अनीयर, इत्यर्थेषु एव केलिमर् प्रत्ययस्य उपसंख्यानं विधीयते। 'कृत्यल्युटो बहुलम्' इति बहुलवचनात् केलिमर-प्रत्ययोऽपि कृत्यो भविष्यति, ककारः कित्कार्यार्थः, रेफः स्वरार्थः स्वयमेव पच्यन्ते पचेलिमा माषाः। शब्दशक्तिस्वाभाव्यादत एव बहुलवचनाच्च कर्मकर्तर्येव भवति नान्यत्र इति न्यासकारः अचकथत्।

उदाहरणम्—पचेलिमा माषाः भिदेलिमाः सरलाः भिदेलिमानि काष्ठानि पक्तव्याः, भेत्तव्याः भेत्तव्यानीत्यर्थः।

तव्यतव्यदनीयर्प्रत्ययैः, निष्पन्नानां पक्तव्यभेत्तव्यपचनीयभेदनीयादिरूपाणाम् यः अर्थः भवति वा स एव अर्थः धातोः केलिमर् प्रत्ययकरणेनापिसम्भवति। एवं भाषायाम् नवीनरूपाणां प्रचलनम् उक्तेऽर्थे अवलोक्य कात्यायनेन प्रकृतस्य उपदेशः कृतः तथा चायमर्थादिशः।

भा०	बहुव्रीहौ सर्वनामसंख्ययोरुपसंख्यानम्	(२।२।३५)
का० सि०	सर्वनामसंख्योरुपसंख्यानम्	,,
प्र०	सर्वनामसंख्ययोः प्राङ्निपातो बहुव्रीहौ वाच्यः	,,

बहुव्रीहिसमासे सर्वनामसंख्यावाचकयोश्च पूर्वनिपातः भवतीति वार्तिकार्थः। उदाहरणम्—सर्वं श्वेतः यस्य स सर्वश्वेतः, द्विशुक्ल, द्विकृष्णः। द्विपुत्रः, द्विभार्यः, विश्वयशाः, सर्वकृष्णाः, विश्वदेवः। वार्तिकाभावे सर्वविश्वद्विप्रभृतीनां पूर्वप्रयोग

२. लाक्षारोचनाट्ठक। अष्टा०, ४।२।२

एव न स्यात् तथा श्वेतसर्वः, कृष्णसर्वः, कृष्णद्विः, शुक्लद्विः इत्यादिरूपापत्तिः स्यात् । एषु प्रयोगेषु सर्व इत्यस्य श्वेततः पूर्वं, शुक्लकृष्णपुत्रभार्याप्रभृतितः द्वि इत्यस्य पूर्वं, यशाः, देवः इत्यतः विश्वस्य पूर्वं विपर्ययात् सर्वश्वेतः, द्विकृष्णः इत्यादिरूपाणि परिवर्त्तितानि भूत्वा भाषायां समागतानि । एवं प्रतीयते यत् अतिमालः द्व्यहः इत्यादिप्रयोगाणां सादृश्यहेतोः भाषायामिमे प्रयोगाः प्रचलिताः येषां रूपसिद्धये वार्तिकमिदम् ।

अत्र विश्वेदेवः इति भाष्ये उदाहृतप्रयोगविषये कैयटस्य सम्मतिः वर्तते यत् 'यदा विश्वस्य विशेष्यत्वं तदेदमुदाहरणम्, विशेषणत्वे तु सूत्रेणैव[1] सिद्धः पूर्वनिपातः[2]' द्विपुत्रः द्विभार्यः इत्यत्र उद्योतकारस्य अभिमतं वर्तते यत् 'अत्र हि द्वयोर्गुणवाचित्वात् (द्वयोः शुक्लगुणौ यस्य) अनियमो विशेषणत्वस्य । पुत्रभार्याशब्दावपि गुणवचनादिति भाष्याशयः । जन्यपुंस्त्वधर्मभोग्यस्त्रीत्वयोर्गुणत्वादित्यन्ये'[3] ।

भाष्यमते यत्र संख्यासर्वनाम्नोरेव बहुव्रीहिः तदा परत्वात्संख्यायाः एव पूर्वनिपातः द्व्यन्याय त्र्यन्यायेति[4] ।

भा०	क्लृपि सम्पद्यमाने	(२।३।१३)
का०	क्लृपि सम्पद्यमाने चतुर्थी वक्तव्या	"
प्र०	क्लृप्यर्थे सम्पद्यमाने च	(१।४।४४)
सि०	क्लृपि सम्पद्यमाने च	"

अभूतप्रादुर्भावः सम्पत्तिः—उत्पत्तिः । तथा च क्लृप्यर्थकधातुप्रयोगे यः उत्पद्यते तस्मात्—उत्पद्यमानेऽर्थे वा चतुर्थी भवति—विकार—वाचकाच्चतुर्थी भवतीति तात्पर्यम्[5] । उदाहरणं—भक्तिः ज्ञानाय कल्पते । अत्र पाणिनिनियमेन भक्तिः ज्ञानं कल्पते, एवं प्रयोगापत्तिः किन्तु स्वकालिकभाषायामेकस्मिन्नेवार्थे ज्ञानाय

---

१. अष्टा०, २।१।५६ 'विशेषणं विशेष्येण बहुलम्'

२. महा०, प्र० २।२।३५

३. महा०, उद्यो० २।२।३५

४. महा०, २।२।३५

५. सम्पत्तिरभूतप्रादुर्भाव उत्पत्तिरिह गृह्यत इति विकाराच्चतुर्थी । विकारस्य च प्रकृतिरूपारोपात्सामानाधिकरण्यं यच्च रूपमुपजायते ततश्चतुर्थीति प्रकृतेर्न भवति । यदा तु प्रकृतेरपादानविवक्षा तदाविकाराच्चतुर्थी न भवतीति केचिदाहुः । अन्ये तु विरोधाभावात्तत्रापि चतुर्थीमिच्छन्ति ।
महा०, प्र० २।३।१३

भा० रविधाने बहुव्रीहेरूपसंख्यानं प्रतिषिद्धत्वात् (४।१।७)
का० ,,
प्र० सि० बहुव्रीहौ वा ,,

'वनो रच'[1] इति सूत्रे पठित्वा वार्तिकमिदम् 'अनो बहुव्रीहेः'[2] प्रतिषेधस्यापवादः। बहुव्रीहिसमासस्य विवक्षायां वन्नन्तात् वन्नन्तान्ताच्च प्रातिपदिकात् स्त्रीत्वविवक्षायां ङीप् रान्तादेशश्च विकल्पेन भवतः। पाणिनेः नियमेन केवलं बहुधीवरी एवं भवेत् किन्तु प्रकृतनियमेन डाप्पक्षेबहुधीवा, बहुधीवे, बहुधीवाः इति रूपं भवति, डापः विकल्पपक्षे–बहुधीवा, बहुधीवानौ, बहुधीवानः एवं रूपं भवति। स्पष्टतः रूपद्वयमेतत् पाणिनेरनन्तरं संजातरूपपरिवर्तनस्य सूचकत्वेन तिष्ठति। बहुधीवर् इत्यस्य अन्त्यव्यंजनस्य रस्य लोपः संजातः।

पाणिनेः काले भाषायां केवलं बहुधीवरी इत्येव रूपमासीत् किन्तु तदनन्तरं बहुधीवेति वैकल्पिकमपि रूपं समागतं यस्य व्याख्यानाय वार्तिकमिदम्।

भा० अधर्माच्च (४।४।४१)
का० सि० अधर्माच्चेति वक्तव्यम् ,,

तदन्तविधेः ग्रहणवता प्रातिपदिकेन निषेधाद्वचनं येन विधिः तदन्तस्येत्यत्र[3] धर्मान्नित्रः इति वार्तिकमनुप्रेक्ष्य एतदुक्तम्। अधर्मशब्दात् चरतीति एतस्मिन्नर्थे ठक् भवति। उदाहरणम्–अधर्मं चरतीति–आधर्मिकः–अधर्मशब्दात् चरतीत्यर्थे ठक् प्रत्यये कृते आद्यचः वृद्धौ आधर्मिकः इति रूपम्। यथा लोके धर्मंचरतीति धार्मिकः इति प्रयोगप्रचलनमासीत् तद्दृष्ट्वा लोकाः अधर्मं चरतीत्याकांक्षायाम् आधर्मिकः इति प्रयोगं व्यवहर्तुं प्रारभन्त। एवं च सादृश्यात् समागतमिदं रूपपरिवर्तनं लक्षयितुं कात्यायनेन प्रकृतस्योपस्थापनं कृतम्।

भा० असितपलितयोः प्रतिषेधः (४।१।३९)
का० ,, ,,
प्र० सि० असितपलितयोर्न ,,

असितशब्दात् पलितशब्दाच्च ङीप् तथा तकारस्थाने नकारादेशस्य प्रतिषेधम् वार्तिकमिदं करोति। असिता[4]— अवदातः सितो गौरः इत्यमरात् सितः श्वेतस्त-

१. अष्टा०, ४।१।७
२. ,, ४।१।१२
३. ,, १।१।७२
४. The Indigo plant or a girl attending upon the harem (Whose hair are not whitened by age), or the river Yamuna.
Apte, *Skt. Eng. Dict.*, P. 191

द्विरुद्धः कृष्णः' असितशब्देन उच्यते। 'पलितो जरया शौक्ल्यम्' इत्यमरात् पलितशब्दो जराकृतं यत्केशादीनां शौक्ल्यं तद्वाची, तद्विशिष्टा वृद्धापि पलितशब्देनोच्यते। 'वर्णादनुदात्तात्तोपधात्तो नः'[1] इति सूत्रेण असितपलितशब्दाभ्यां ङीपि सति असिनी-पलिनी-इत्येवंविधरूपाणामापत्तिः स्यात् किन्तु भाषायामपरप्रयोगमवलोक्य कात्यायनेनेदं वार्तिकमुपन्यस्तम्।

भा०	नासिकादीनां विभाषायां पुच्छाच्च	(४।१।५२)
का०	पुच्छाच्चेति वक्तव्यम्	,,
प्र० सि०	पुच्छाच्च	,,

भाष्ये यद् वार्तिकस्वरूपमवलोक्यते तद् परवर्तिभिः वैयाकरणैः लाघवात् संक्षिप्य पठितं, तथा चायमर्थः लभ्यते—नासिकादीनां विभाषायाम् उपसर्जनीभूतपुच्छशब्दान्तात् प्रातिपदिकात् स्त्रियां वा ङीषिति वक्तव्यम्। न्यासकारमते पुच्छान्ताच्च प्रातिपदिकात् ङीष् भवतीत्येतदर्थरूपं व्याख्येयम्। किमर्थम्? संयोगोपधादपि पुच्छान्ताद् यथा वैकल्पिकः ङीष् भवेत्। व्याख्यानन्तु वार्तिके चकारस्यानुक्तसमुच्चयार्थत्वमाश्रित्य कर्तव्यम्। सुपुच्छीशोभनं पुच्छं यस्याः सा, विकल्पे—सुपुच्छा। एवमेव कल्याणपुच्छी, कल्याणपुच्छा।

तात्कालिकभाषायां सुपुच्छी-सुपुच्छेति नवीनप्रयोगद्वयस्य प्रचलनमवलोक्य तदौचित्यसिद्धये वार्तिकमिदमुपस्थापितम्।

भा० का०	गोपालिकादीनां प्रतिषेधः	(४।१।४८)
प्र०	गोपालिकादीनां च	,,
सि०	पालकान्तान्न	,,

पालकान्तशब्दात् 'पुंयोगादाख्याम्'[2] इति सूत्रेण प्राप्तस्य ङीषः प्रतिषेधो वाच्यः इति वार्तिकार्थः। गाः पालयति इति गोपालः गोपाल एव गोपालकः स्वार्थे कः, तस्य स्त्री गोपालिका एवमेव अश्वपालकस्य स्त्री अश्वपालिका।

एवं प्रतीयते यत् 'पुंयोगादाख्यायाम्' इति ङीषि गोपालकी अश्वपालकीति रूपं कात्यायनपूर्वं भाषायामासीत्, किन्तु तस्य समकालिकभाषायां गोपालिकाश्वपालिकेति रूपं परिवर्तितं संजातं, एतस्य सिद्धये वार्तिकमिदं प्रणीतम्।

भा०	भयभीतभीतिभीभिः	(२।१।३६)
का०	भयभीतभीतिभीभिरिति वक्तव्यम्	,,
प्र०, सि०	भयभीतभीतिभीभिरिति वाच्यम्	,,

१. अष्टा०, ४।१।३९
२. अष्टा०, ४।१।४८

पंचमी भयेन[1] इति सूत्रेण पंचम्यन्तं सुबन्तं भयप्रकृतिकेन सुबन्तेन विभाषया समस्यते तथा च वृकात् भयम्—वृकभयम्, चोरात् भयं—चोरभयम्, दस्योः भयं-दस्युभयम् इत्यादीनि रूपाणि सिध्यन्ति। किन्तु भाषायां भीतभीतिभीभिरपि समाससिद्धिमवलोक्य कात्यायनेन 'भयभीतभीतिभीभि'रिति वार्तिकमुपसंख्यातं तथा अत्यल्पमिदमुच्यते 'भयेन'[2] इति 'भयभीतभीतिभीभिः—भयभीतभीतिभी-भिरिति वक्तव्यम्' इति कथयता भाष्यकृता वार्तिकमेतत् समर्थितम्। तथा च पंचम्यन्तं सुबन्तं भयभीतभीतिभीप्रकृतिकैः समर्थसुबन्तैः सह समस्यते, इति वार्तिकतात्पर्यम्। उदाहरणानि—वृकाद्भीतः—वृकभीतः, वृकाद्भीतिः-वृकभीतिः, वृकाद्भीः—वृकभीः, चोराद्भीतः—चोरभीतः; चोरभीतिः, चोरभीः। चोरभयं, दस्युभयं, वृकभयमित्यादीनां सादृश्यात् इमानि नवीनरूपाणि अपि भाषायां समागतानि येषां समाधानं 'पंचमी भयेने'ति पाणिनीयशास्त्रेण नावलोक्य कात्यायनेन प्रकृतद्वारा निष्पत्तिः प्रदर्शिता।

भा०, का०	(१)	उपाध्यायमातुलाभ्यां वा	(४।१।४६)
प्र०		मातुलोपाध्यायाभ्यां वा	"
सि०		मातुलोपाध्याययोरानुग् वा	"

आचार्यस्य सम्बन्धे तु 'इन्द्रवरुणेति'[3] सूत्रे निर्देशः वर्तते किन्तु उपाध्यायस्य सम्बन्धे न तिष्ठति एतदर्थं वार्तिकस्यास्य निवेशः। वार्तिके 'वा' इत्यस्य आनुगिति अर्थः। उपाध्यायमातुलाभ्यां प्रयोगे यो ङीष् तत्सन्नियोगेन अनयोः आनुगागमः विकल्पेन भवतीति वक्तव्यमिति वार्तिकार्थः। एवंच उपाध्यायस्य अप्राप्तः मातुलस्य तु नित्यं प्राप्तः आनुगत्र विकल्प्यते, अतएव च महाभाष्ये प्राप्ताप्राप्त-विकल्पवार्तिकत्वेन प्रकृतस्य परिगणनं कृतम्। उपेत्य समीपे गत्वा पठ्यते अस्मादित्यर्थे, 'इङश्च'[4] इत्यपादाने 'इङ अध्ययने' इति धातोः घञि उपाध्याय इति तस्यस्त्री उपाध्यायनी, आनुगागमस्य वैकल्पिकत्वे पुंयोगे ङीषि उपाध्यायी। एवमेव 'मानमत्याद्रियते इति माता, (मा धातोस्तृनि माता) मातुर्भ्राता, मातुलः, पितृव्य—मातुलमातामहपितामहाः'[5] इत्यनेन मातुर्डुलच् प्रत्यये निपातिते, मातुलशब्दात् पुंयोगे ङीषि अनुगागमे मातुलानी, आनुगः विकल्पपक्षे मातुली इति

१. अष्टा०, २।१।३६
२. महा०, २।१।३६
३. अष्टा०, ४।१।४९
४. अष्टा०, ३।३।२१
५. अष्टा०, ४।२।३६

रूपम् । अत्र पाणिन्यनुसारं केवलं मातुलानी इति प्रयोगः भवेत्, किन्तु कालान्तरे-भाषायां मातामहीपितामहीप्रभृतिशब्दानां सादृश्यात् मातुली इति प्रयोगोऽपि प्रचलितः यस्य सिद्धये कात्यायनेन अत्र वैकल्पिकविधानं स्वीकृतम् ।

उपाध्यायस्य स्त्री उपाध्यायानी उपाध्यायी वा इति तु पाणिनिना प्रोक्तम् किन्तु या स्त्री स्वयमेव अध्यापिका वर्तते अथवा उपेत्य अधीयते अस्याः इति आकांक्षायां किं भवति इति तेन न स्पष्टीकृतम् । तात्कालिकसमाजे न केवलं स्वयं व्याख्यात्र्यः आचार्याः एव आसन् एवं च न केवलम्—'एकदेशं तु वेदस्य वेदांगान्यपि वा पुनः । योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते[1]—उपाध्यायस्य पत्नी उपाध्यायी-उपाध्यायानी एव आसीत् प्रत्युत स्वयं जीविकार्थम् अध्यापनकार्यं सम्पादयन्त्यः उपाध्यायाः उपाध्याय्यश्चासन् । वृत्यर्थमध्यापनकार्ये निरताः बह्व्यः अध्यापिकाः कात्यायनकाले स्थिताः आसन् याः अवलोक्य कात्यायनेन एकस्य वार्तिकस्य विधानं कृतम्—

(२) 'इङश्चेत्यपादाने स्त्रियामुपसंख्यानं तदन्ताच्च वा ङीष् (इङश्च ३।३।२१ सूत्रस्थं वार्तिकम्) व्याख्यातं च भाष्यकारेण इङश्चेत्यत्रापादाने स्त्रियामुपसंख्यानं कर्तव्यं, तदन्ताच्च वा ङीष् वक्तव्यः उपेत्याधीयतेऽस्याः उपाध्यायी उपाध्याया[2] । वार्तिकस्यास्याभावे 'इङश्च' इति विहितो घञ् पुरस्तादपवादन्यायेन 'एरच्' इति विहितस्याचो एवापवादः भवेत् । स्त्रियां तु क्तिन् स्यादिति क्तिनो बाधनायेदं वार्तिकम् । तथा च या स्वयमेवाध्यापयति तत्र विकल्पेन ङीष् पक्षे टाप् अनुगागमस्तु न, इत्येव ज्ञापयितुं वार्तिकमिदम्, एतदर्थमेव सिद्धान्तकौमुद्यामुक्तं[3], या तु स्वयमेवाध्यापिका तत्र वा ङीष् वाच्यः । काशिकायां प्रोक्तम्–'अपादाने स्त्रियामुपसंख्यानं तदन्ताच्च वा ङीष्' इत्यपि वार्तिकममुमेवार्थं विशिनष्टि[4] ।

भा०	भ्रातुश्च ज्यायसः	(२।२।३४)
का०	भ्रातुश्च ज्यायसः पूर्वनिपातो वक्तव्यः	"
प्र०+सि०	भ्रातुर्ज्यायसः	"

भ्रातृवाचकशब्दानां द्वन्द्वे कृते सति ज्येष्ठभ्रातृवाचकस्य शब्दस्य पूर्वप्रयोगः वाच्यः । यथा–युधिष्ठिरश्च अर्जुनश्च युधिष्ठिरार्जुनौ । यदि एवं कथ्यते यत् अभ्यर्हितंचेत्यनेनैव वार्तिकेन इदमपि कार्यं कथं न भवेत् तत्रोपयुक्तं यतः इन्द्रपुत्र-

१. मनुस्मृतिः, द्वितीयोऽध्यायः
२. महा०, ३।३।२१
३. सि०, स्त्रीप्रत्ययप्रकरणम्
४. का०, ३।३।२१

त्वमहावीरत्वविष्णोरंशत्वहेतोश्च अभ्यर्हितत्वम् अर्जुनेऽपि स्यात्। अतः वार्तिकस्यास्यौचित्यं तिष्ठत्येव।

वार्तिकाभावे एषु प्रयोगेषु अपि पूर्वापरक्रमव्यवस्थाभावे अनौचित्यं स्यात् यतः समाजे ज्येष्ठभ्रातुः सम्मानः कनिष्ठभ्रातुरपेक्षया अधिकः आसीत्, अत एव 'भ्रातुश्च ज्यायसः' इत्यनेन ज्येष्ठस्य भ्रातुः पूर्वप्रयोगेण भाषायाः रूपपरिवर्तनसंकेतः केवलं ज्येष्ठस्य एव पूर्वप्रयोगः नानुजस्य, इति समीचीन एव।

भा० + सि०	योपधप्रतिषेधे हयगवयमुकयमनुष्यमत्स्यानामप्रतिषेधः	(४।१।६३)
का०	'योपधप्रतिषेधे हयगवयमुकयमत्स्यमनुष्याणामप्रतिषेधः'।	,,
प्र०	गवयहयमुकयमत्स्यमनुष्याणां न निषेधः	,,

योपधप्रतिषेधे इति सप्तमी, हयगवयेति पंचम्यर्थे षष्ठी। तथा चायमर्थः फलति —हयगवयमुकयमनुष्यमत्स्येभ्यो ङीष् भवतीति वक्तव्यम्। इदं च 'अयोपधादित्यस्य' बाधकम्। उदाहरणम् हयी 'हि गतिवृद्धयोः, इत्यतो हिनोति शीघ्रतया गच्छतीत्यर्थे 'नन्दिग्रहिपचादिभ्यो'[1] इत्यचि वार्तिकेनानेन स्त्रियां ङीषि हयी[2] इति। गवयी- 'गुङ् गतौ' इत्यतः औणादिकेऽयच् प्रत्यये 'गवय' इति गोसदृशो गलकम्बलसहितो वन्यः पशुविशेषः[3], ततः प्रकृतेन स्त्रीत्वे ङीषि गवयी इति। चतुष्पाज्जातिविशेषः मुकयः ततः स्त्रियां ङीषि मुकयी। मनुष्यत्वजातिविशिष्टेऽर्थे मनुषीमनुः कश्यपस्य पत्नी तस्या अपत्यार्थे 'मनोर्जातावञ्यतौषुक्[4]च' प्रकृतिप्रत्ययसमुदायेन जातौ गम्यमानायामित्यर्थकेन सूत्रेणानेन मनुशब्दात् यत्प्रत्ययेषुगागमे च मनुष्य इति ततः स्त्रीत्वविवक्षायां 'हयगवय०' इति ङीषि 'यस्येति[5]च' इति अलोपे 'हलस्तद्धितस्य'[6] इति यलोपे मनुषीति सिद्धम्। मत्सीमाद्यति-हृष्यति जलेनेत्यर्थे 'ऋतन्यंचि'[7] इति

१. अष्टा०, ३।१।३४
२. घोटके वीतितुरगतुरंगाश्वतुरंगमाः।
वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः॥ अमर, २ का० ८ व० ४३ श्लो० ९
३ गन्धर्वं शरभो रामः समरो गवयः शशः। अम० २ का० ५ व० ११ श्लो०
४ अष्टा०, ४।१।१६१
५. अष्टा०, ६।४।१४८
६. अष्टा०, ६।४।१५०
७. उणादि०, ४।२

मदी हर्षे इत्यतो निपातनात्स्यन् प्रत्यये मत्स्यशब्दान्ङीषि यकारस्य सूर्यतिष्यागस्त्यमत्स्यानामिति[1] यलोपे मत्सी इति। सिद्धान्तकौमुद्यां मत्स्यस्य ङ्यांच एव यलोपो नान्यत्रेत्यनेन ज्ञायते यत् मत्सी इत्यत्र तु ङीप् परत्वेन यलोपः किन्तु-मत्स्यस्यायं मात्स्यः इत्यत्र न यलोपः।

वार्तिकाभावे सूत्राप्राप्त्या हया, गवया, मुकया, मनुष्या, मत्स्येति रूपसिद्धिः। यथा क्षत्त्रियेति भवति तथैव एतादृशरूपाणां पाणिनिकाले प्रचलनमासीत् इति कथयितुं शक्यते, कालान्तरे औदमेयी, वृषलीत्यादिरूपसादृश्यात् हयी, गवयी, मनुषीत्यादिरूपाणां प्रचलनं जातं रूपपरिवर्तनमिदं विलोक्य प्रकृतस्योपस्थापनं कृतम्।

भा०	सम्भस्त्राजिनशणपिण्डेभ्यः फलात् प्रतिषेधः	(४।१।६४)
का०	सम्भस्त्राजिनशणपिण्डेभ्यः फलात्	(४।१।४)
प्र०	,,	,,
सि०	,,	,,

पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्चेति[2] सूत्रस्य सम्फलेत्यादिप्रयोगेष्वतिव्याप्तिवारणाय वार्तिकमिदमुपन्यस्तम्, यस्यायमर्थः सम्पूर्वकात्, भस्त्रापूर्वकात्, अजिनपूर्वकात्, शणपूर्वकात्, पिण्डपूर्वकात् च फलशब्दात् टाप् भवति स्त्रीत्वविवक्षायाम्। उदाहरणम्–सम्यक् फलानि यस्यां वाटिकायां सा सम्फला, अत्र 'पाककर्णेति' सूत्रेण ङीषि सति सम्फली इति रूपं पाणिन्यनुसारं सम्भवति किन्तु समसामयिकभाषायां सम्फलेति परिवर्तितं रूपमवलोक्य आचार्येण प्रकृतस्योपसंख्यानं कृतम्। तदनुसारम् अजादिगणे अपठितत्वादपि सम्फलेत्यत्र टाप् भवति। इदं रूपपरिवर्तनस्योदाहरणम्। भस्त्रफला[3] भस्त्रेव फलानि यस्याः वाटिकायाः साभस्त्रफला, तथैव अजिनफला, शणफला, पिण्डफला।

वार्तिकेऽस्मिन् 'श्वेतफला' इति शब्दस्य सिद्धिः न प्रदर्शिता, एतदर्थं 'श्वेताच्चेति वक्तव्यम्' इति भाष्यवचनम्।

भा० त्रेश्च— (४।१।६४)

केवलं भाष्ये 'त्रेश्च' इति अतिव्याप्तिवारकवार्तिकम्, अन्यत्र न क्वापि दृश्यते। 'पाककर्णेति' सूत्रेण प्राप्तङीषः बाधनाय वार्तिकमिदम्, यस्यार्थः–त्रिपूर्वकात्

---

१. अष्टा०, ६।४।१४९

२. अष्टा०, ५।१।६४

३. भस्त्राकारफले वृक्षभेदे भस्त्राफला इति वाचस्पत्यम्।

फलशब्दाच्च ङीषः प्रतिषेधः वक्तव्यः—त्रिफला[१], अत्र द्विगुसमासे त्रिफला इति किन्तु 'बहुव्रीहौ त्रिफली संहृतिः' इति काशिकायामुल्लिखितम् । त्रिफली इत्यस्यार्थः भवति—त्रयाणां फलानां हरीतक्यादीनां समाहारः । काशिकायां सम्भस्त्रेति वार्तिके त्रिफला इति प्रयोगस्य गतार्थता सर्वथा नोपयुक्ता ।

भा०	आमनुडुहः स्त्रियां वा	(७।१।९७)
का०	अनडुहः स्त्रियां वेति वक्तव्यम्	,,
प्र०	वसुस्रसुध्वंस्वनडुहां दः	(८।२।७२)
सि०	आम् अनुडुहः स्त्रियां वा	(४।१।४१)

अनडुहशब्दात् विकल्पेन आम् भवति तथा स्त्रीत्वविवक्षायां ङीष् भवति । अनडुहः स्त्री इत्यस्मिन्नर्थे षिद्गौरादिभ्यश्च[२] 'पुंयोगादाख्यायाम्बे'ति[३] सूत्राभ्याम् अदन्तत्वाभावात् ङीषः प्राप्तिः न भवति, भाषायांच अनड्वाही इति रूपमवलोक्य कात्यायनेन अत्र आमः ङीषश्च विधानमनेन वार्तिकेन कृतम् । आमः विकल्पपक्षे अनडुही इतिरूपं सम्पद्यते ।

एवं भाषायां रूपपरिवर्तनस्योदाहरणं प्रस्तौति वार्तिकमिदम् ।

भा०	वर्णान्ङीब्विधाने पिशंगादुपसंख्यानम्	(४।१।४६)
का० सि०	पिशंगादुपसंख्यानम्	,,
प्र०	पिशंगाच्च	,,

वर्णवाची यः अनुदात्तान्तः तोपधः तदन्तं यदुपसर्जनम् अदन्तं प्रातिपादिकं तस्मात् ङीप् भवति तथा च तकारस्य स्थाने नकारादेशः भवति इत्यर्थकेन 'वर्णादनुदात्तात्तोपधात्तो नः'[४] इति सूत्रेण वर्णवाचित्वेनापि तोपधभिन्नात् पिशंग-शब्दात् स्त्रीत्वविवक्षायां ङीप् न भविष्यति अतः वार्तिककारेण भाषायां पिशंगी-पिशंगेति रूपमवलोक्य तत्सिद्धये वैकल्पिकङीपः विधानं कृतम्, पाणिनिनियमानुसारं केवलं पिशंगेति भवति किन्तु कात्यायनसमये पिशंगीपिशंगेति रूपद्वयं भवति ।

अत्र विभिन्नान् टाप्ध्वनिविशिष्टान् (आध्वनिविशिष्टान्) प्रयोगानवलोक्य सादृश्यात् 'पिशंगा' इत्यस्यापि प्रचलनं संजातम् । तथा च स्वरविविमयरूपकं ध्वनिपरिवर्तनजन्यं रूपपरिवर्तनं संलक्ष्य वार्तिकमिदं प्रणीतम् ।

---

१. The three myrobalans taken collectively.
Skt. Eng. Dict., p. 485

२. अष्टा०, ४।१।४१

३. ,, ४।१।३९

४. ,, ४।१।३९

पद्मधूलितुल्या पिंगलवर्णा वा इति पिशंगी पिशंगाचेत्युभयरूपस्यार्थः, ङीप् पित्वादनुदात्त इति स्वरे भेदः ।

भा०	ठक् प्रकरणे शकलकर्दमाभ्यामुपसंख्यानम्	(४।२।२)
का०	शकलकर्दमाभ्यामणपीष्यते	,,

हरदत्तानुसारं सूत्रस्वरूपं वर्तते लाक्षारोचनाट्ठक् इति, किन्तु न्यासानुसारं तत्तिष्ठति—लाक्षारोचनाशकलकर्दमाड्ठक् इति । प्रक्रियायां सूत्रं वर्तते—'लाक्षारोचनाशकलकर्दमाड्ढक्' इति तत्र सूत्रेणानेन ढक्प्रत्ययः भवति, सूत्रे शकलकर्दमशब्दयोः पाठात् तत्र वार्तिकमिदं नास्ति । महाभाष्ये 'लाक्षारोचनाट्ठक्' इति सूत्रस्वरूपं तथा च ठक्प्रकरणे शकलकर्दमाभ्यामुपसंख्यानमिति वार्तिकं तत्र तिष्ठति, किन्तु काशिकायां 'लाक्षारोचनाशकलकर्दमाट्ठक्' इति सूत्राभिधानं तथा च शकलकर्दमाभ्याम् अण् प्रत्ययस्यापि विधानं सूचयितुं 'शकलकर्दमाभ्यामणपीष्यते' इति वार्तिकंच तत्र विद्यते । न्यासकारेणापि इदमेव समर्थितम्, किन्तु पदमंजर्यां, प्रदीपे, शब्दकौस्तुभे च महाभाष्यसम्मतः पाठ एव स्वीकृतः । प्रदीपकारेणोक्तं—'शकलकर्दमयोः सूत्रे पाठोऽनार्षः' । हरदत्तस्तु कथयति—'शकलकर्दमयोर्वार्तिके दर्शनात् सूत्रे प्रक्षेपः' । अस्माकम्मतेऽपि सर्वप्राचीनत्वात् कात्यायनमतसमर्थनाच्च महाभाष्योक्तः पाठ एव न्याय्यः ।

तृतीयान्ताभ्यां शकलकर्दमशब्दाभ्यां रक्ते अर्थे ठक् प्रत्ययः भवति, काशिकायामणः अपि अत्र विधानम् ठकि शकलेन रक्तः शाकलिकः, कर्दमेन रक्तः कार्दमिकः । अणि—शाकलः कार्दमः । लाक्षिकः, रोचनिकः, इत्यादिप्रयोगसादृश्येनसमागतं रूपपरिवर्तनं वार्तिकमिदं प्रस्तौति ।

भा०	गणिकायाश्च	(४।२।४०)
का०	गणिकायां च यञ् वक्तव्यः	,,
सि०	गणिकाया यञिति वक्तव्यम्	,,
प्र०	गणिकाया यञ् वाच्यः	(७।१।१)

गणिकाशब्दात् समूहेऽर्थे यञ् प्रत्ययः भवति यथा—गणिकायाः समूहः गाणिक्यम् । अत्र 'केदाराद्यञ्च'[1] इति सूत्रेण यञः चकारात् वुञश्च प्राप्तिः नासीत् किन्तु केदाराणां समूहः कैदार्यम् इति प्रयोगसादृश्येन गाणिक्यमिति प्रयोगः पाणिनेरनन्तरम् भाषायां समागतः । यस्य सिद्धये कात्यायनेन प्रकृतस्य विधानं कृतमस्ति ।

---

१. अष्टा०, ४।२।४०

कात्यायनकाले अनेकाः स्त्रियः गणिकायाः कार्यं कुर्वन्ति स्म। तासाम् संख्या एवमधिका संजाता यत् गणिकानाम् एकः संघः संजातः। वैशाल्याम् गणिकानां समूहः इतिहासप्रसिद्ध एवास्ति। एवं च सामाजिकपरिस्थितीनां कारणात् नवीनरूपस्य भाषायां समागमनमभूत् यस्य निष्पत्यर्थं पूरकवार्तिकमेतत्।

भा० प्रादिभ्यो धातुजस्य वा (२।२।२४)

का० प्रादिभ्यो धातुजस्योत्तरपदस्य लोपश्च वा बहुव्रीहिर्वक्तव्यः ।

प्र० प्रादिभ्यो धातुजस्य वाच्यो वोत्तरपदलोपश्च (२।२।२५)

सि० प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपश्च (२।२।२४)

उत्तरपदलोपश्चेत्यनुवर्तते, धातोर्जातं निष्पन्नं धातुजम्। प्रादिभ्यः पूर्वपदेभ्यः परं यद्धातुजमुत्तरपदं पतितशब्दादि तदन्तस्य बहुव्रीहिर्भवति तस्य चोत्तरपदस्य वा लोपः इति वार्तिकार्थः। उदाहरणम्—प्रपतितपलाशः-प्रपलाशः, प्रपतितपर्णम्—प्रपर्णम्, अत्र उत्तरपदस्य पतितेत्यस्य लोपे पलाशेन पर्णेन च समासे रूपं सिद्ध्यति।

अत्र 'अनेकमन्यपदार्थे'[1] इति सूत्रेण उत्तरपदस्य लोपः न भवति तथा प्रपतितपर्णः एवं रूपं भवेत्। भाषायां प्राचार्यः, प्रपितामहः इत्यादिप्रयोगप्रचलनमवलोक्य सादृश्यात् रूपपरिवर्तनमिदं संकेतयितुं तदौचित्यनिष्पत्यर्थं च प्रकृतव्यवस्थापनम्।

अपरमपि तत्त्वमत्र ध्येयम्—'प्रपतित' इत्यस्य अर्थः केवलं 'प्र' इत्यनेनैव गम्यः भवति एवं 'प्रपतित' इति सम्पूर्णस्य अर्थे केवलं प्र इत्यस्य आदेशः अर्थादेशस्य निदर्शकः।

भा० आदिखादिनीवहानां प्रतिषेधः (१।४।५२)

का० (क) आदिखाद्योः प्रतिषेधः वक्तव्यः ,,

(ख) गत्यर्थेषु नीवह्योः प्रतिषेधः वक्तव्यः ,,

प्र० सि० (क) आदिखाद्योर्न ,,

(ख) नीवह्योर्न ,,

आदिखादिनीवहीनां 'गतिबुद्धिप्रत्ययवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ'[2] इति सूत्रेण प्राप्तकर्मसंज्ञायाः प्रतिषेधो वाच्यः। तथा च ण्यन्ताद् अद्धातोः खाद् धातोः नीधातोः, योगे वह् धातोश्च अण्यन्तावस्थायां स्थितं कर्तृकारकं ण्यन्ता-

१. अष्टा०, २।२।२४

२. अष्टा० १।४।५२

वस्थायां कर्मसंज्ञा न प्राप्नोति, इति वार्तिकार्थः। अत्ति देवदत्तः आद्यते देवदत्तेन; खादति देवदत्तः खादयति देवदत्तेन, नयति देवदत्तः नाययति देवदत्तेन, भृत्यः भारं वहति तं प्रभुः प्रेरयति वाहयति भारं भृत्येन। एषु स्थलेषु गतिबुद्धीति सूत्रेण कर्मसंज्ञया द्वितीयान्तं रूपं भवेत् किन्तु भाषायां कर्मकारकस्य स्थाने करणकारकस्य प्रयोगं समागतमवलोक्य वार्तिकेन कर्मसंज्ञायाः प्रतिषेधः कृतः इति नवीनरूप-परिवर्तनमत्र लक्ष्यते। कारयति कार्यं देवदत्तेन यज्ञदत्तः इत्यादिरूपसादृश्यात् नाययति ग्रामं, खादयति अन्नमित्यादिरूपाणि परिवर्तितानि।

भा०	गजसहायाभ्यां च	(४।२।४३)
सि०	(भाष्यवचनमाश्रित्य) गजसहायाभ्यां चेति वक्तव्यम्	,,

काशिकायां प्रक्रियाकौमुद्यां च सूत्रपाठः एव वर्तते—'ग्रामजनबन्धुसहायेभ्यस्तल्' अतः तत्र केवलं 'गजाच्चेति' वक्तव्यम् (का०) 'गजाच्चेष्टः' (प्र०) इति वार्तिकं तिष्ठति। सिद्धान्तकौमुद्याम् महाभाष्यानुरूपमेव 'ग्रामजनबन्धुभ्यस्तल्' इति सूत्रपाठः वर्तते अस्मादेव हेतोः प्रकृतमिदं वार्तिकमस्ति। वस्तुतः अयमेव पाठः समीचीनः। महाभाष्ये एव वार्तिकानां प्रथमस्वरूपम् उपलभ्यते। एवं च तदेव प्रामाणिकम्। तत्र 'गजसहायाभ्यां च' इति वार्तिकम् पठितम्। अतः वार्तिकस्य अपि मूलपाठः अयमेव। तत्त्वबोधिनीकारेणापि इदमेव समर्थितम्।

गजसहायशब्दाभ्यां 'तस्य समूहः' इत्यर्थे तल्प्रत्ययस्य विधानं प्रतिपादनीयम्। गजानां समूहः 'गजता'। सहायानां समूहः सहायता (सह अयते इति सहायता) 'ग्रामजनबन्धुभ्यस्तल्' इति सूत्रेण ग्रामता, जनता, बन्धुता इत्येते प्रयोगाः निष्पन्ना भवन्ति। तेषां सादृश्यात् गजता, सहायता इति उभौ शब्दौ भाषायामागतौ अतः सादृश्यात् रूपपरिवर्तनमिदमभिलक्ष्य कात्यायनेन प्रकृतस्य विधानं कृतम्।

भा०	प्राये संज्ञायां वटकेभ्यः इति	(५।२।८२)
का०	वटकेभ्यः इनिर्वक्तव्यः	,,
प्र० प्र० सि०	वटकेभ्यः इनिर्वाच्यः	,,

वटकशब्दात् सप्तम्येऽर्थे इनिप्रत्ययः भवति। वार्तिकेऽस्मिन् संज्ञाग्रहणस्य प्रत्ययान्तोपाधिकत्वाद् यत्र प्रत्ययान्तं संज्ञा भवति तत्र प्रत्ययेन भवितव्यम्। न्यासकारमते न च वटकशब्दः कन्प्रत्ययान्तः कस्यचित् संज्ञा, तेन ततः कन् न भविष्यति, तस्मिंश्चासति मत्वर्थीयः इनिर्भविष्यतीति[1]। पदमंजरीकारेण तु कनि प्राप्ते वचनम्। ननु संज्ञाग्रहणात्कन्न भविष्यति, तस्मिंश्चासति मत्वर्थीयः

१. का० न्यास; ५।२।८२

इनिर्भविष्यति ? न सिद्ध्यति 'सप्तम्यां च न तौ स्मृतौ' इति वचनादिति[1] विश्लेषितम् ।

उदाहरणम्—बटकिनी-बटकाः प्रायेण भुज्यन्ते अस्यामिति बटकिनी पूर्णमासी, ऋन्नेभ्यो ङीप् इति ङीपि वटकिनीति ।

पाणिनेः समये यस्यां पूर्णिमायां गुडापूपाः तिलापूपाः खाद्यन्ते स्म सा गुडापूपिका-गुडापूपाः प्रायेणान्नमस्यां पौर्णमास्यामिति – गुडापूपिका, तिलपूपा.–प्रायेणान्नमस्यां पौर्णमास्यामिति तिलापूपिका पौर्णमासी ।[2] एवमेव कुल्माषाः प्रायेणान्नमस्यां कौल्माषी पौर्णमासी[3] इति प्रचलनमासीत् किन्तु कात्यायनकाले एवमपि पौर्णमासी आसीत् यस्यां बटकाः खाद्यन्ते स्म, सैव पौर्णमासी वटकिनी पौर्णमासीति अभिधीयते स्म । एवं सामाजिकप्रथानां धार्मिकरीतीनां वा कारणात् भाषायामागतमिदं रूपपरिवर्तनमभिलक्ष्य कात्यायनेन प्रकृतस्य विधानं कृतम् । श्रीवासुदेवशरणाग्रवालमहाशयेनापि लिखितं यत् यस्मिन् दिने यदन्नं खाद्यं तदन्नमाश्रित्य तद्दिनस्य नामकरणंस्वाभाविकमेव यथा तिलसंक्रान्तिः[4] ।

भा॰, का॰, प्र॰ प्र॰, सि॰ मातरि षिच्च (४।२।४६)

मातरि षिच्च उपसंख्येयमित्यर्थः । मातामहशब्दात् 'मातरिषिच्चे'ति वार्तिकेन षित्कृते 'षिद्गौरादिभ्यश्चेति[5] ङीषि मातामही-इतिप्रयोगः किन्तु गौरादिगणे मातामहशब्दस्य पाठात् इदं स्पष्टं यत् षित्कारणात् ङीष् नित्यमेव न भवति, यथा षित्सत्त्वेऽपि दंश्यते अनया इत्यर्थे दंशधातोः 'दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे'[6] इत्यनेन ष्ट्रन् प्रत्यये, अनुबन्धलोपे, षित्वात् ङीषः अप्राप्तौ टाप् इति भवति मातामहा इति । पदमञ्जरीकारमते 'मातामहा' इति मन्त्रे दृश्यते[7] ।

'पितृव्यमातुलमातामहपितामहाः'[8] इति सूत्रे मातृपितृशब्दाभ्याम् मातुः पिता, पितुः पिता इत्यर्थे मातृपितृशब्दाभ्यां डामहच्प्रत्यये मातामहपितामहशब्दौ

---

१ का॰ पद॰, ५।२।८२
२. तदस्मिन्नन्नं प्राये संज्ञायाम् । अष्टा॰ ५।२।८२
३. कुल्माषादञ्, अष्टा॰ ५।२।८३
४. पा॰ का॰ भा॰ पृ॰ १२३
५. अष्टा॰ ४।१।४१
६. ,, ३।२।१८२
७. का॰ पद॰ ४।२।३६
८. अष्टा॰ ४।२।३६

निपातितौ। तत्र मातुर्माता, पितुर्माता इत्यर्थे डामहच्प्रत्ययस्य 'मातरिषिच्च' इति वार्तिकेन डामहचः षित्वमतिदिश्यते। तथा च मातामहीत्यत्र मातामहशब्दात् षित्त्वादेव ङीषि सिद्धे गौरादिषु मातामहशब्दपाठो निष्प्रयोजनः[1]। न च 'मातरि षिच्च' इति वार्तिकं व्यर्थं, गौरादौ पाठ एव तिष्ठतु इति स्वीकरणीयम्, पितामही-शब्दसिद्धये वार्तिकस्यास्यावश्यकत्वात्। वार्तिकसामर्थ्यादेव गौरादिषु पितामहशब्दस्य पाठोऽनार्षः प्रक्षिप्त इति गम्यते। एतदर्थमेवाह सिद्धान्तकौमुदीकारः—'मातरि षिच्च' इति षित्वादेव सिद्धे गौरादिषु मातामहीशब्दपाठादनित्यः षितां ङीष्[2]।

कात्यायनात्पूर्वं मातामहा-इत्यपि प्रयोगः भाषायां सम्भवतः आसीत् किन्तु कालान्तरे केवलं मातामही शब्द एव मातुः पिता इत्यर्थे प्रयुक्तः। मातामही इति सादृश्यात् पितामही-इत्यपि रूपं प्रचलितमतः तत्सिद्धये वार्तिकमिदमुप-संख्यातम्।

भा०		कार्षापणाद्वा प्रतिश्च	(५।१।२५)
का०	(क)	कार्षापणाट्टिठन्वक्तव्यः	"
	(ख)	प्रतिशब्दश्चास्यादेशो वा वक्तव्यः	"
सि-	(क)	कार्षापणाट्टिठन् वक्तव्यः	"
	(ख)	प्रतिरादेशश्च वा	"

कार्षापणशब्दस्य टिठन् प्रत्ययेन सहैव विकल्पतः 'प्रति' आदेशस्य विधानं भवति। उदाहरणम् प्रतिकः प्रतिकी। 'प्रति' इति कार्षापणस्य स्थाने ऐच्छिकं रूपं संजातम्। यः कार्षापणिकः इत्यस्य अर्थः, स एवार्थः 'प्रतिक' इत्यस्यापि। इदम् सादृश्यमूलकरूपपरिवर्तनेन सहैव अर्थपरिवर्तनस्य अर्थादेशस्यापि उदाहरणमस्ति। यस्मिन्नर्थे कार्षापणिकस्य प्रयोगः जायतेस्म तस्मिन्नेवार्थे प्रतिकस्यापि प्रयोगः सम्भूतोऽस्ति।

कार्षापणशब्दात् प्रकृतवार्तिकेन टिठन् प्रत्यये कार्षापणिकः, कार्षापणिकी तथा कार्षापणस्य स्थाने 'प्रति' इत्यादेशे विकल्पेन प्रतिकः प्रतिकी इत्यपि भवति। कंसिकः इति रूपसादृश्यात्, कार्षापणिकः, प्रतिकः इति रूपपरिवर्तनजन्य प्रयोगः भाषायां समागतः।

पाणिनिकाले क्रयविक्रयस्य व्यवहारः पणनं कथ्यते स्म, क्रय-विक्रयस्य वस्तु पण्यमासीत् तथा च क्रय-विक्रयस्य व्यवहारमाध्यमः पणः आसीत् पूर्वं स्वर्णस्य, पश्चात् रजतस्य, तदनन्तरं ताम्रादिधातोः निर्मिताः मुद्राः पणस्य कार्यं कुर्वन्ति

---

१. महा० उद्योतः, ४।२।३६

२. सि० कौ०, ६।४।१४९ सूत्रस्य व्याख्यानावसरे।

स्म, या मुद्रा सर्वाधिकं प्रचलिता स्थिता सैव पणसंज्ञां कालान्तरे प्राप्नोत् शेषैः स्वर्णराजतादिमुद्राभिः विशिष्टनामानि प्राप्तानि । कार्षापणस्य[1] पणः अस्यैव मुद्राविकारस्य संकेतं प्रस्तौति ।

कात्यायनस्य समये कार्षापणं सर्वथा व्यवहृता मुद्रासीत् तत्तु सौवर्णं, राजतं, ताम्रमपि आसीत् किन्तु सर्वाधिकं प्रसारः राजतकार्षापणस्यासीत्, तस्य व्यापकः व्यवहारः भवति स्म, कार्षापणेन क्रीतं वस्तु कार्षापणिकम्, कार्षापणिकीति कथ्यते स्म । प्रतीत्यस्य प्रयोगः कार्षापणस्यार्थे आसीत् प्रतिना क्रीतं वस्तु प्रतिकं, प्रतिकीति अभिधीयते स्म ।

एवं व्यवहारे समागतानां पणमुद्रादीनां अभिधानमवलोक्य तेषां सिद्धये प्रकृतस्योपसंख्यानं कृतमस्ति ।

भा०	यकपूर्वे धात्वन्तप्रतिषेधः	(७।३।४६)
का०	यकपूर्वाया धात्वन्तप्रतिषेधः	,,
सि० प्र०	धात्वन्तयकोस्तु नित्यम्	,,

धात्वन्ताभ्यां यकारककाराभ्यां परस्यातः स्थाने कात्पूर्वस्य अकारस्य नित्यमित्वं भवति आपि परे । सुनयिका, अशोकिका, अपाकिका, सुशोकिका, सुपाकिके-त्याद्युदाहरणम् । सुष्ठु नयः यस्याः इति बहुव्रीहिसमासे सुनयाशब्दात् अज्ञातार्थे कप्रत्यये 'केऽणः'[2] इति ह्रस्वे टापि, सुनयका इत्यवस्थायाम् 'उदीचामातः स्थाने यकपूर्वायाः'[3] इत्यनेन प्राप्तस्य वैकल्पिकस्य इत्वस्य प्रतिषेधं विहाय वार्तिकेनानेन नित्यमित्वविधाने सुनयिका । एवमेव अन्येऽपि प्रयोगाः ।

एवं प्रतीयते यत् भगवतः पाणिनैः समसामयिकभाषायाम् सुनयिका सुनयके-त्याद्युभयविधरूपस्य प्रचलनमासीत् किन्तु तदनन्तरं केवलमित्वघटितमेव रूपं भाषायामवस्थितम् । तदेव लक्ष्यीकृत्य तेषां कृते नित्येत्वविधानाय प्रकृतवार्तिकं प्रस्तौति आचार्यः ।

भा० का० सि०	आहृतप्रकरणे वारिजंगलस्थलकान्तार पूर्वपदादुपसंख्यानम्	(५।१।७७)
प्र० प्र०	सूत्रस्य स्वरूपमपि परिवर्तितम्–'उत्तरपथेनाहृतं च' वचनं च पठ्यते–वारिजंगलस्थलकान्ताराजशंकु-पूर्वपदात् पथष्ठञ् वाच्यः	(५।१।७७)

१. विभाषा कार्षापणसहस्राभ्याम्, अष्टा०, ५।१।२६
२. अष्टाध्यायी ७।४।१३
३. ,, ७।३।४६

भा० अजपथशंकुपथाभ्यां च (५।१।७७)
का० अजपथशंकुपथाभ्यां चोपसंख्यानम् ,,

तृतीयासमर्थेभ्यः वारिपथ – जंगलपथस्थलपथकान्तारपथाजपथशंकुपथेभ्यश्च आहृतम्–आनीतम् तथा गच्छति इत्यर्थे ठञ् प्रत्ययस्य विधानं भवतीति वार्तिकद्वयस्यार्थः। उदाहरणानि–

वारिपथेन आहृतमिति—वारिपथिकम्।
वारिपथेन गच्छतीति—वारिपथिकः।
जंगलपथेन गच्छतीति—जांगलपथिकः।
स्थलपथेन आहृतमिति—स्थालपथिकः।
कान्तारपथेनाहृतमिति—कान्तारपथिकम्।
कान्तारपथेन गच्छतीति—कान्तारपथिकः।
अजपथेनाहृतम् इति—आजपथिकम्।
अजपथेन गच्छतीति—आजपथिकः।
शंकुपथेन गच्छतीति—शांकुपथिकः।
शंकुपथेनाहृतम् इति—शांकुपथिकम्।

'उत्तरपथेनाहृतंच'[1] इति सूत्रेण व्युत्पन्नयोः औत्तरपथिकम् औत्तरपथिकः इत्यनयोः प्रयोगयोः सादृश्यात् वारिपथिकम् इत्यादयः प्रयोगाः भाषायां समागताः येषां रूपसिद्धये वार्तिकस्यास्य उपसंख्यानम्। एषां नवीनानां रूपाणां सिद्ध्यर्थं प्रस्तुतस्य वार्तिकस्यास्योपन्यासस्य अपरोऽपि हेतुः। कात्यायनकाले जलमार्गेण, जंगलमार्गेण, दुर्गमेण कान्तारमार्गेण, स्थलमार्गेण च वस्तूनाम् व्यापारस्य प्रथा आसीत्। एतदर्थं वार्तिकस्य प्रस्तुतिः तथा च सर्वे मार्गाः एकसदृशाः नासन्। केचन अतीव विस्तीर्णाः, केचन अतीवसंकीर्णाः, केचन सरलाः, केचन उच्चावचाः, केचन प्रकृत्या वक्राः आसन्। अत्यन्तसंकीर्णमार्गाय अजपथशब्दस्य व्यवहारः आसीत्। यतः तत्र अजाः एव येन केनोपायेन गन्तुं शक्याः आसन्। शंकुपथाः क्रमशः निम्नगामिनः आसन्। एभिः मार्गैः प्रयाणकर्त्तुः जनस्य तथा आहृतस्य वस्तुनः च नाम मार्गमाधृत्यैव कथ्यते स्म।

एवमेव 'मधुकमरिचयोरण्स्थलात्'[2] (अण्स्थलपथाद्वाच्यो मधुकमरिचयोरर्थयोः–प्र०, कौ०) इति वार्तिकेन ज्ञायते यत् तृतीया समर्थात् स्थलपथशब्दात् आहृतमित्यर्थे ठञ्प्रत्ययः भवति यदि प्रत्ययान्तस्य वाच्यौ मधुकमरिचशब्दौ तिष्ठेताम्। उदाहरणम्—

---

१. अष्टा० ५।१।७७
२. ,, वा० ५।१।७७

स्थलपथेनाहृतम्—स्थलपथमधुकम् ।

स्थलपथेनाहृतम्—स्थालपथमरिचम् ।

स्थलस्य मध्ये स्वरागमात् स्थालपथमिति ध्वनिपरिवर्तनजन्यं रूपपरिवर्तनम् । कात्यायनकाले मधुकमरिचयोः आयातम् स्थलपथात् कस्मादपि देशविशेषात् भवतिस्म यत् कारणात् इदं नवीनं रूपं भाषायां समागतम् ।

पूर्ववार्तिकाभ्यां निष्पन्नाः शब्दाः गच्छति इत्यर्थमपि सूचयन्ति किन्तु अत्रेदम् न सूचनम् । तद्विषये प्रदीपकार आह—'अत्र मुख्यगमनासम्भवाद्धृत एव च प्रत्ययमिच्छन्ति । अन्ये तु गौणगमनाश्रयेण गच्छतीत्यत्राप्यर्थे प्रत्ययमाहुः । प्रत्ययार्थोपाधित्वाच्च द्वयोरसन्देहार्थोऽन्यतरप्रयोगः[1] ।

भा०	तृतीयाया अञ्जस उपसंख्यानम्	(६।३।३)
का०+प्र०+सि०	अञ्जस उपसंख्यानम्	,,

अञ्जस्शब्दादुत्तरस्याः तृतीयायाः अलुक् उपसंख्यानम् प्रतिपादनं वा कर्तव्यमित्यर्थः । यथा—अञ्जसाकृतम्—अत्र 'कर्तृकरणे कृता बहुलम्[2]' इत्यनेन समासे, समासत्वात् प्रातिपदिकसंज्ञायां, विभक्तेर्लुकि प्राप्ते प्रकृतेन तस्य निषेधे अञ्जसा कृतम् । 'ओजः सहोऽम्भस्तमस्तृतीयायाः[3]' इति सूत्रे अञ्जस् इत्यस्य निर्देशः न तिष्ठति अतः अञ्जः कृतमिति वार्तिकाभावे भवति किन्तु भाषायाम् ओजसाकृतम्, सहसाकृतम्, अम्भसाकृतम्, तमसाकृतम् इत्यादिरूपसादृश्यात् अञ्जसाकृतमिति रूपं प्रचलितम् यस्य सिद्धये वार्तिकमिदमुपसंख्यातम् ।

भा०	पुंसानुजो जनुषान्धो विकृताक्ष इति	(६।३।३)
का०	पुंसानुजो जनुषान्ध इति वक्तव्यम्	,,
प्र० प्र०	पुंसानुजः जनुषान्ध इत्युपसंख्यातम्	,,
सि०	पुंसानुजो जनुषान्ध इति च	,,

पुंसानुजो जनुषान्ध इत्यत्रापि तृतीयाया अलुक् प्रतिपादनं कर्त्तव्यं समासविवक्षायामिति वार्तिकार्थः । यथा—यस्य अग्रजः पुमान् स पुंसानुजः, जनुषा जन्मना अन्धः इति जनुषान्धः जात्यन्ध इत्यर्थः । अत्र सूत्रेण[4] लुक्निषेधे अप्राप्ते सति विभक्तेर्लुकि पुमनुजः, जनुरन्धः एवं प्रयोगापत्तिः किन्तु स्वकालिक-

१. महा०, प्र० ५।१।७७

२. अष्टा०, १।१।३२

३. ,, ६।३।३

४. ओजः सहोऽम्भस्तमसः तृतीयायाः, अष्टा०, ६।३।३

भाषायां पुंसानुजः, जनुषान्धः इति रूपान्तरं विलोक्य आचार्येण प्रकृतस्य उपस्थापनं विहितम् ।

भा० + सि०	गिलेऽगिलस्य	(६।३।७०)
का०	गिलेऽगिलस्य मुम्बक्तव्य	,,

गिलशब्दे उत्तरपदे तिष्ठति अगिलशब्दस्य मुमागमः भवति—तिमिंगिलः-गॄ निगरणे तिमिं गिलतीति 'मूलविभुजादिषु' इति कप्रत्यये[१], 'ॠत इद्धातोः[२]' इतीत्वे, रपरत्वे, 'अचि विभाषा[३]' इति लत्वे गिल इति । तिमिम् गिलतीति तिमिंगिलः मत्स्यविशेषः । वार्तिकाभावे तिमिंगिलः इति आपद्येत । वार्तिके अगिलस्येति कथनं यदि न स्यात् तदा गिलगिलः इत्यत्रापि मुमापद्येत । भाषायां तिमिंगिल-नामकस्य मत्स्यविशेषस्य कृते मुम्घटितरूपपरिवर्तनमवलोक्य आचार्येण प्रकृत-स्योपसंख्यानं कृतम् । अस्ति मत्स्यस्तिमिर्नाम शतयोजनविस्तरः । तिमिंगिल-गिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघवः ॥

भा०	अस्तुसत्यागदस्य कार उपसंख्यानम्	(६।३।७०)
का०	अस्तुसत्यागदस्य कार इति वक्तव्यम्	,,
प्र० प्र०	अस्तुंकार इत्यपि वाच्यम्	,,
सि०	अस्तोश्चेति वक्तव्यम्	,,

कारशब्दे परे तिष्ठति सति अस्तोः मुमागमः भवति । अस्तु करोतीति अस्तुङ्कारः-अभ्युपगमकारणम् । अत्र 'कारे सत्यागदस्य'[४] इति सूत्र-प्रवृत्तिः न भवति किन्तु भाषायां सत्यङ्कारः शपथकरणम्, अगदङ्कारः-विप्रतिपक्षः-द्रव्यकरणम्, इति प्रयोगादिकमवलोक्य तत्सादृश्येन अस्तुङ्कारः इत्यपि प्रचलितं यस्य सिद्धये वार्तिकमिदम् । एवं च सादृश्यात् भाषायां रूपपरिवर्तनमनेन संसूच्यते ।

भा०, का०	'पदादिषु मांस्पृत्स्नूनामुपसंख्यानम्'	(६।१।६३)
सि०	'मांसपृतनासानूनां मांसपृतस्नवो वाच्याः शसादौ वा"	(८।२।४१)

मांस-पृतना-सानुशब्दानां स्थाने क्रमशः मांस, पृत्, स्नुइत्येते आदेशाः विकल्पेन भवन्ति शसादौ विभक्तिषु परेषुतिष्ठत्सु । पाणिनिनिर्देशेन[५] मांसि 'मांसानि'

१. अष्टा, वा०-कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम्, ३।२।५
२. अष्टा, ७।१।१००
३. अष्टा, ८।२।२१
४ अष्टा०, ६।३।७०
५. ,, ६।१।६३

प्रभृतिरूपाणि एव भवन्ति किन्तु वार्तिककारानुसारम् अदन्तमासस्य स्थाने हलन्तमांस् इति कृते मांसि, मांसा, मान्भ्याम्, मान्भिः, मांसेः, मांसः, मांस, मांसोः, मांसाम्, मांसि, मांसोः, मांसु इति रूपाणि भवन्ति, विकल्पेन पाणिनीयप्रयोगाः अपि वार्तिककारस्य समये प्रचलिताः आसन्। एवमेव पच्यते अस्यामिति पचनी, 'करणाधिकरणयोश्च'[1] इति ल्युट्प्रत्यये, अनुबन्धलोपे, टित्वान् ङीपि, मांसस्य पचनी मांस्पचनी। मांसपचनी इत्यत्र सकारोत्तराकारध्वनेः लोपः मध्यस्वरलोपदिशा; तेनेदं ध्वनिपरिवर्तनमूलकं भाषायां रूपपरिवर्तनम्।

भाष्यकाशिकयोरनुसारं वार्तिकमिदं न वैकल्पिकं किन्तु कौमुद्यामिदं वैकल्पिक विधानम् तिष्ठति।

मांसस्य पचनी मांस्पचनी, अत्र 'सुपोधातुप्रातिपदिकयोः' इति ङस्विभक्तेर्लुकि, प्रत्ययलक्षणस्य नावाप्तिः यतः 'न लुमतांगस्य'[2] इत्यस्य निर्देशः वर्तते यद् लुक् श्लु, लुपः विहितप्रत्ययस्य अदर्शने सति तन्निमित्तकम् अंगकार्यं न भवति, अतः सूत्रे प्रभृतिग्रहणं प्रकारार्थत्वं, भेदसादृश्यरूपकं वा स्वीकृत्य 'सादृश्यंच क्वचिदुत्तर-पदत्वेन' इति नियमेन मांसस्थाने मांस् आदेशः सम्पन्नः। मांस्पचनम् इति तु 'पृषोदरादित्वादपि' सिद्धिं प्राप्तुं शक्नोति किन्तु सूत्रेऽस्मिन् उत्तरपदाधिकारे समागते ल्युडन्तं यदुत्तरपदं मांस्पचनम्, तत्रैव अन्त्यस्य लोपः भवितुं शक्नोति किन्तु मांसपचनीत्यत्र उत्तरपदं ङीबन्तं न तु ल्युडन्तम् अतः अन्त्यलोपः न भविष्यति। एतदर्थमेव भाष्यकारेण प्रभृतिग्रहणं प्रकारार्थकमनुमन्य उक्तप्रयोगाणां साधुत्वं निर्दिष्टम्।

पृत्सु मर्त्यम्, पृतनासु मर्त्यमिति प्राप्ते भवति। पृङ् व्यायामे इत्यतः तनन् प्रत्यये, प्रियते व्यायामं करोति युद्धार्थं या सा पृतना-सेना-सेनाविशेषोऽपि, शब्दस्तोम-महानिधिमते–२४३ रथैः, २४३ गणैः, ७२६ अश्वैः, १३१५ पदातिभिः अन्विता सेना पृतना इति ज्ञायते। पृतः पृता, पृद्भ्याम् इत्यादिप्रयोगाः सूत्रानुसारं, विकल्पपक्षे सुट्पर्यन्तं रमाशब्दवत् प्रचलिष्यन्ति, कात्यायनमते पृतना इत्यस्य स्थाने शशादिविभक्तिपरे पृत् आदेशे पृतः प्रभृतिरूपाणि भवन्ति। स्नूनि-सानूनि-पाणिनिनियमेन केवलं सानूनिप्रभृतिरूपाणि भवन्ति किन्तु वार्तिकेन ज्ञायते यद् स्नूनिप्रभृतिरूपाणि अपि भवन्ति।

प्रायः कात्यायनकाले मांस्पचनी-मांसपचनी पृत्सु-पृतनासु, अधिस्नुषु-अधिसानुषु इत्यादिवैकल्पिकरूपाणि भाषायां प्रचलितानि आसन् येषां निष्पत्तये प्रकृतस्य विधानं कृतम्।

---

१. अष्टाध्यायी, ३।३।१७

२. अष्टाध्यायी, १।१।६३

भा० दृगदृशवस्तुषु दृक्ष उपसंख्यानम् (६।३।८९)
का० + सि० दृक्षे चेति वक्तव्यम् ,,

दृक्षशब्दे उत्तरपदे समानस्य सभावो भवतीति वक्तव्यम्। उदाहरणम्—सदृक्षः-अत्र दृक्षे परेसति समानस्य 'स' इत्यादेशे सदृक्षः; वार्तिकाभावे समानदृक्षः इति रूपम्। अत्र वार्तिकेन सादेशे कृतेऽपि अर्थे न परिवर्तनम्। सदृशः, सदृक् इति सादृश्येन भाषायां सदृक्षः इत्यस्यापि व्यवहारः समागतः, यत्सिद्धये वार्तिकमिदं विहितम्।

रूपमिदं 'छान्दसमिति' पदमंजरीकारमते केचित् मन्यन्ते।[1] भाष्येऽपि सदृक्षासः, प्रतिसदृक्षासः इति वैदिकरूपमेवोदाहृतम्। दृशेः क्सो वक्तव्ये, जसः 'आज्जसेरसुक्'[2] इत्यसुगागमे सदृक्षासः इति सिद्ध्यति।

एवमेव 'आ सर्वनाम्नः'[3] इति सूत्रेण सिद्धस्य तादृक्-तादृशः, यादृक्—यादृशः इतिरूपसादृश्येन तादृक्षः, यादृक्षः इत्यपिरूपं भाषायां समागतं यच्च सादृश्येन रूप-परिवर्तनस्योदाहरणम्। अत्र काशिकायां सिद्धान्तकौमुद्यां च 'दृक्षे चेति वक्तव्यम्' दृक्षे च इति वार्तिकम् 'आ सार्वनाम्नः' इति सूत्रे उपन्यस्तम् किन्तु भाष्ये एतस्य चर्चा न वर्तते, अत्र सूत्रस्यैव व्याख्या न तिष्ठति यतः दृग्दृशवस्तुषुदृक्ष उपसंख्यान-मिति वार्तिकेनैव अस्य रूपस्यापि गतार्थता भविष्यति।

भा० का० मासाद्भृतिप्रत्ययपूर्वपदाठ्ठञ् विधिः (५।४।११६)

भृत्यर्थकप्रत्ययविशिष्टशब्दपूर्वकात् मासशब्दोत्तरपदकाच्च बहुव्रीहेः समासान्तः डच् प्रत्ययः विधीयते। भृत्यर्थे यो विहितः प्रत्ययः स भृतिसाहचर्यात् भृतिरि-त्युच्यते। भृतिः प्रत्ययो यस्य तत् भृतिप्रत्ययं पूर्वपदम् यस्य बहुव्रीहेः स भृतिपूर्वपदः तस्मात् मासशब्दात् डचोविधिः पंचभृतिरस्य मासस्य पंचकोमासः 'सोऽस्यांशवस्न-भृतयः'[4] इति 'संख्याया अतिशदन्तायाः कन्'[5] इति कनि पंचकः, पंचको मासो अस्य इति बहुव्रीहो कृते प्रकृतेन स्वार्थे 'डच्' प्रत्यये पंचकमासिकः। एवमेव षट्कमासिकः दशकमासिकः कर्मकरः अर्थात् पंच, षट्, दश वा कार्षापणं मासिक-वेतनत्वेन प्राप्तकर्ता कर्मकरः।

---

१. का० पद०, ६।३।९१
२. अष्टाध्यायी, ७।१।५०
३. ,, ६।३।९१
४. ,, ५।१।५६
५. ,, ५।१।२२

अनेन ज्ञायते यत् कात्यायनकाले भृतिः प्रतिदिनम् एव न दीयतेस्म, प्रत्युत मासानुसारं दीयतेस्म। अतः भाषायां पूर्वोक्तानि रूपाणि समायातानि येषां सूचनं प्रकृतेन विहितमस्ति।

भा०, का०	खच् प्रकरणे गमेः सुपि उपसंख्यानम्	(३।२।३८)
प्र० सि०	गमेः सुपि वाच्यः	"

सुबन्ते उपपदे तिष्ठति सति गम् धातोः खश्प्रत्ययस्योपसख्यानं विधातव्यम्। यथा —मितंगमः हस्ती, मितगंमा हस्तिनी।

'प्रियवशे वदः खच्'[१] इति सूत्रेण प्रिय, वश-इत्येतयोः कर्मणोरूपपदयोर्वदेर्धातोः खच् प्रत्ययो भवति नान्यत्र किन्तु वार्तिकेनानेन इदं स्थिरीकृतं यत् कस्मिन्नपि सुबन्ते उपपदे सति गम्धातोरपि खश् प्रत्ययः विधीयते।

प्रियम्बदः इत्यस्य सादृश्यात् मितंगमः इति रूपपरिवर्तनं संसूचयति वार्तिकमिदम्।

हरदत्तमते मितंगमः इत्यत्र खशः उपसंख्यानम् असंज्ञार्थं; संज्ञायान्तु 'गमश्च' इति वक्ष्यमाणेनैव सिद्धम्[२]।

भा०	तिष्यपुष्ययोर्नक्षत्राणि	(६।४।१४९)
का०	"	"
सि०+प्र०	तिष्यपुष्ययोर्नक्षत्राणि यलोप इति वाच्यम्	"

नक्षत्रेण युक्तः कालः इति 'सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्'[३] इति विहितः यो अण् तत्परे सति तिष्यपुष्यसम्बन्धिनः यकारस्य लोपः, इत्यर्थः। 'सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः[४]' इत्यत्र तिष्य इत्यस्य पाठस्तु वर्तत एव कथं वार्तिके एतस्य प्रयोजनम्? अत्र 'नक्षत्राणि' इति कथनेन यलोपः नक्षत्रसम्बन्धे एव नियम्यते। पुष्यस्य त्वप्राप्तो यलोपो विधीयते। अश्विन्यादयः शब्दाः केवलं नक्षत्रवाचकाः स्वयुक्तचन्द्रवाचकाश्च विद्यन्ते। तत्र नक्षत्रेण युक्तः कालः इत्यत्र नक्षत्रशब्दोऽपि केवलं नक्षत्रपरः, तद्युक्तश्चन्द्रपरश्च। नक्षत्रपरकेण चन्द्रेण अन्वितः इत्यभिधेये नक्षत्रवाचकात् तृतीयान्तात् अण् प्रत्ययो भवति यो युक्तः स कालश्चेत्[५]। तिष्य-

१. अष्टाध्यायी, ३।२।३८
२. का०, पद, ३।२।३८
३. अष्टाध्यायी, ४।३।१६
४. अष्टाध्यायी, ६।४।१४९
५. 'नक्षत्रवाचकाद्योऽण् स सर्वोऽपि गृह्यते। अतएव तिष्ये पुष्ये च भवस्तैषः पौष इत्यत्रापि लोपः। इदमेव ध्वनयता भगवता तैषं पौष इति लिंगभेदेनोदाहृतम्

पुष्यशब्दो एकार्थकावेव वर्तेते। तिष्यनक्षत्रेण युक्तेन चन्द्रमसा युक्तः कालः इत्यर्थे, पुष्यनक्षत्रेण समन्वितेन चन्द्रेण युक्तः कालः, तत्र भवो वा इत्यर्थे च, तस्य अपत्यम् इत्यर्थे वा तैषः पौषः इति प्रकृतेन यलोपे सति सम्पद्यते। तिष्यस्य पुष्यस्य वा तैष्यः, पौष्यः इत्यत्र न यलोपः, नक्षत्रशब्दमुच्चार्य नक्षत्रवाचकाद्विहितत्वाभावात्।

सूत्रेण तैषः इति सिध्येत किन्तु पौषः इति तु न निष्पद्यते, तैषः इत्यस्य सादृश्यात् पौषः[1] इत्यपि प्रयोगः भाषायां समागतः आसीत् एतदर्थमेव कात्यायनेन वार्तिकेनानेन समाधानमुपस्थापितम्। कात्यायनकाले नक्षत्राणां नामानि आश्रित्य बालकानां नामकरणस्य व्यवहारः आसीत्, तथा च तैषः, पौषः, इत्यादिप्रयोगाः भाषायां समागताः।

भा० + का०	सर्वाण्णस्य वा वचनम्	(५।१।१०)
प्र० प्र०	सर्वशब्दात् णो वा वाच्यः	,,
सि०	सर्वाण्णो वेति वक्तव्यम्	,,

'अभिधाने अभिधेयोपचारात् वार्तिके वा' इति विकल्पम् आचार्यः उक्तवान्। अधिकरणस्य शेषत्वविवक्षायां षष्ठी। सर्वशब्दात् णप्रत्ययः भवति विकल्पेन। उदाहरणम्—सार्वम्, सार्वः, सर्वीयम्, सर्वीयः। सर्वस्मै हितम् इत्यर्थे 'सर्वपुरुषाभ्यां णढञौ'[2] इति सूत्रेण णप्रत्यये आद्यचो वृद्धौ सार्वमिति रूपं सिद्ध्यति, किन्तु सार्वम् इत्यनेन सहैव भाषायां सार्वीयम् इत्यपि प्रयोगः पाणिन्यनन्तरं समायातः। अतः प्रकृतवार्तिकेन णप्रत्ययस्य वैकल्पिकनिषेधे कृते सति छप्रत्यये कृते सर्वीयम् इति निष्पद्यते।

त्वदीयम्, मदीयम्-इत्यादिप्रयोगाणाम् सादृश्येन सर्वीयम् इति प्रयोगोऽपि भाषायां प्रचलितः यत्सिद्धये कात्यायनेन प्रकृतस्य प्रणयनं कृतम्।

आद्यस्य तिष्येण युक्तमहरित्यर्थः। अन्त्यस्य पुष्ये भव इत्यर्थः। व्यावर्त्यं तु तिष्यसंज्ञकपुरुषस्येदं तैष्यमित्याहुः। तत्र तिष्यस्य प्राप्ते नियमार्थं, पुष्यस्य त्वप्राप्ते विधिः'। महा० उद्योतः, ६।४।१४९

1. The days of full moon in the month of Pausha.

रघु०; 18-32 (पौषा)

पौषः—Lunar month in which the moon is in the Pushya asterism (corresponding to December-January).

पौषम्—A festival or a bright combat.

Sans. Eng. Dict. p. 636

२. अष्टाध्यायी, ५।१।१०

भा०	गुणवृद्ध्यौत्वतृज्वद्भावेभ्यो नुम्पूर्वविप्रतिषिद्धम्	(७।१।९६)
का०	× ×	
प्र०	वृद्ध्यौत्वगुणेभ्योनुम् पूर्वविप्रतिषेधेन	(७।१।६१)
सि०	वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम्पूर्वविप्रतिषेधेन	(७।१।७३)

वृद्धिः, औत्वं, तृज्वद्भावः, गुणः, इत्येभ्यः पूर्वविप्रतिषेधेन नुमागमः भवति। 'इकोऽचि विभक्तौ'[1] इत्यतः वृद्धिः, औत्वं, तृज्वद्भावः, गुणः इति परकार्याणि, किन्तु वार्तिकेनानेन पूर्वकार्यं नुम् एव तत्तत्प्रयोगेषु भवति। वृद्धेः उदाहरणम्—अतिसखीनि ब्राह्मणकुलानि—सखायम् अतिक्रान्तं कुलम्—अतिसखि कुलम् तानि अतिसखीनि, अत्र अतिसखिशब्दात् जसि शसि वा विभक्तौ 'जश्शसोः शिः'[2] इत्यनेन 'शि' इत्यादेशे 'इकोऽचि विभक्ता' विति नुमः प्राप्तिः किन्तु परकार्यत्वात् वृद्धिकार्ये 'अतिसखायि' इति पाणिनिसूत्रैः रूपं सम्पद्यते। अतिसखि+इ, 'सख्युरसम्बुद्धौ'[3] 'शि' इत्यस्य णिद्वद्भावे, 'अचोञ्णितीति'[4] वृद्धौ 'एचोऽयवायावः'[5] इति आयादेशे अतिसखायि किन्तु वार्तिकमिदं, परकार्ये स्थितेऽपि वृद्ध्यादिस्थाने नुम् इत्येव भवतीति, नियमयति तेन अतिसखीनि इति। औत्वस्थाने नुम्–वारिणि–'वारि ङि' इति स्थितौ 'शेषोघ्यसखीति'[6] सूत्रेण घिसंज्ञायाम् 'अच्च घेः'[7] इत्यनेन औत्वे वार+औ, इति स्थितौ 'वृद्धिरेची'ति[8] वृद्धौ हरौ इतिवत् 'वारौ' इति रूपापत्तिः किन्तु प्रकृतनियमेन पूर्वविप्रतिषेधेन नुमागमे वारिणि इति सम्पद्यते। एवं प्रतीयते यत् 'हरौ' इत्यस्य सादृश्यात् 'वारौ' इति प्रयोगः प्रायः पाणिनिकाले प्रचलितः आसीत् किन्तु कालान्तरे धातृणि इतिवत् वारिणि इति नवीनप्रयोगः भाषायां समागतः यस्य निष्पत्त्यर्थं कात्यायनेन प्रकृतस्य विधानं कृतम्।

तृज्वद्भावोदाहरणम्—प्रियक्रोष्टूनि प्रियाः क्रोष्टारः यस्य कुलस्य इति विग्रहे जशि शशि वा विभक्तौ 'जश्शसोः शिः' इति 'शि' इत्यादेशे, अनुबन्धलोपे, 'तृज्वद्क्रोष्टुः'[9] इत्यनेन तृज्वद्भावस्य प्राप्तिः 'इकोऽचि विभक्ता' वित्यतः परत्वात्

---

१. अष्टा०, ७।१।७३
२. अष्टा०, ७।१।२०
३. अष्टा०, ७।१।९२
४. अष्टा०, ७।२।११५
५. अष्टा०, ६।१।७८
६. अष्टा०, १।४।७
७. अष्टा०, ७।३।११९
८. अष्टा०, ६।१।८८
९. अष्टा०, ७।१।९४

संजाता किन्तु प्रकृतबलेन 'इकोऽचीति' नुम्कार्ये प्रियक्रोष्टूनि इति । अत्र पाणिनीयनियमेन 'प्रियक्रोष्टृणि' इति भवेत् किन्तु भाषायामुक्तरूपमवलोक्य प्रकृतस्य विधानं कात्यायनेन कृतम् । अत्र मुखसौविध्यानुरूपम् ऋध्वनेः लोपे अध्वनिः समागतः तथा णध्वनेः स्थाने नध्वनिः । एवं ध्वनिपरिवर्तनानुसारं भाषायाः रूपे परिवर्तनम् ।

गुणोदाहरणम्—वारिणे–वारि+ङे–घिसंज्ञया, 'घेर्ङिति'[1] इति गुणकार्ये वारये इति मुनये, हरये इतिवत् पाणिनिनियमानुरूपं भवेत्, तदेव च सम्भवतः पाणिनेः भाषायां प्रचलितं भवेत् किन्तु वार्तिककारस्यकाले धातृणे इत्यस्य सादृश्यात् उभयत्र स्वरजन्यसादृश्यहेतोः वारिणे इति रूपं प्रचलितं संजातं यस्य सिद्धये वार्तिकस्यास्य प्रणयनं विहितम् ।

यद्यपि 'विप्रतिषेधे परम्' इति सूत्रे परशब्दस्य इष्टवाचित्वमवलम्ब्य वार्तिकमिदं भाष्ये प्रत्याख्यातम्[2] । तथापि लक्ष्यैकचक्षुष्कस्यैव इष्टत्वज्ञानसम्भवेन लक्षणैकचक्षुष्काणां कृते प्रक्रियायां सिद्धान्तकौमुद्यांच उपन्यस्तम् ।

भा०	त्यक्त्यापोश्च प्रतिषिद्धत्वात्	(७।३।४४)
का०	प्रत्ययनिषेधे त्यक्त्यपोश्चोपसंख्यानम्	,,
प्र० सि०	त्यक्त्यपोश्च	,,

त्यक्प्रत्ययान्तस्य त्यप्प्रत्ययान्तस्य च ककारस्य पूर्वस्य आकारस्थानिकस्य अकारस्य इत्वं भवति आपि परे । 'उदीचामातः स्थाने यकपूर्वायाः'[3] इति सूत्रेण वैकल्पिकेत्वविधानस्य प्रतिषेधाय वार्तिकमेतत् । दक्षिणस्यामदूरे भवा इति विग्रहे 'दक्षिणादाच्'[4] इति सूत्रेण आच् प्रत्यये प्रत्ययान्तस्य अव्ययत्वात् दक्षिणा भवा इति विग्रहे 'दक्षिणापश्चात्पुरसस्त्यक्'[5] इति सूत्रेण त्यक्प्रत्यये, किति चेति आद्यचः वृद्धौ, ततः टापि, दाक्षिणात्याशब्देन अज्ञातार्थे कप्रत्यये, 'केऽणः'[6] इति ह्रस्वे, पुनः टापि "त्यक्त्यपोश्च" इत्यनेन नित्येत्वे दाक्षिणत्यिका । अत्र

१. अष्टा०, ७।३।१११
२. नुम्भवति पूर्वविप्रतिषेधेन । स तर्हि पूर्वविप्रतिषेधो वक्तव्यः । न वक्तव्यः । इष्टवाची परशब्दः । विप्रतिषेधे परं यदिष्टं तद्भवतीति ।
७।१।९६ सूत्रे 'गुणवृद्ध्यौत्वेति वार्तिके भाष्यम्' ।
३. अष्टा०, ७।३।४६
४. ,, ५।३।३६
५. ,, ४।२।९८
६. ,, ७।४।१३

'उदीचामातः०' इत्यादिसूत्रेण इत्वस्य प्राप्तिः वैकल्पिकी आसीत्, तन्निषिध्यते। अनेनेदं स्पष्टं यत् कात्यायनसमये केवलं दाक्षिणात्यिका इत्येव रूपमासीत्। एवमेव इहभवा इति विग्रहे 'अव्ययात्त्यप्'[1] इति त्यपि, इहत्यशब्दाट्टापि, इहत्याशब्दतः अज्ञाते अर्थे कप्रत्यये, 'केऽणः' इत्यनेन ह्रस्वत्वे पुनः टापि वार्तिकेनानेन नित्येत्वे इहत्यिका इति रूपं निष्पद्यते।

भाषायां सर्विकाकारिकेति रूपसादृश्यात् इत्वघटितदाक्षिणात्यिकेहत्यिकेति रूपपरिवर्तनं संजातम्।

भा०, का, प्र०, सि०–सुदूरोरधिकरणे (३।२।४८)

सु, दुर्, इत्यनयोः उपपदयोर्गमेर्धातोः डप्रत्ययः भवेत्। ल्युडपवादोऽत्र डो विधीयते। यथा—सुखेन गच्छत्यस्मिन्निति सुगः, दुःखेन गच्छत्यस्मिन्निति दुर्गः। दूरगः, पारगः, अन्तगः, इत्यादिप्रयोगसादृश्यात् परिवर्तितं रूपमिदं वार्तिकं प्रस्तौति।

भा०	मामकनरकयोरूपसंख्यानमप्रत्ययस्थत्वात्	(७।३।४६)
का०	मामकनरकयोरूपसंख्यानं कर्तव्यमप्रत्ययस्थत्वात्	,,
प्र० सि०	मामकनरकयोरूपसंख्यानम्	,,

मामकनरकसम्बधिनः ककारात् पूर्वस्य अकारस्य इत्वप्रतिपादनं कर्तव्यम् आपि परेचेत्। अत्र ककारस्य प्रत्ययस्थत्वाभावात् वार्तिकप्रणयनं कृतम्। उदाहरणम्—मामिका—मम इयम् इति विग्रहे 'युष्मदस्मदोरन्यतरस्यां खञ्[2] च' इति सूत्रेण अण्प्रत्यये 'तवकममकावेकवचने'[3] इत्यनेन अस्मदः स्थाने ममकादेशे, आदिवृद्धौ मामकशब्दात् 'केवलमामकभागधेयपापापरसमानार्यकृतसुमंगलभेषजाच्च'[4] इति सूत्रेण 'संज्ञाछन्दसोरेव ङीष् भवति इति नियमात् अत्र संज्ञाछन्दसोरभावे ङीष् न प्राप्तः, प्रकृतप्रयोगे ककारे प्रत्ययस्थत्वस्याभावात् 'प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः'[5] इति सूत्रेणाप्राप्तस्येत्वस्य विधानं प्रस्तुतवार्तिकेन सम्पद्यते; एवं प्रतीयते यत् पाणिनेः समये 'मामका' मामकी इति एवंभूतः प्रयोगः प्रचलितः आसीत् किन्तु कालान्तरे एकस्य 'इध्वनेः मध्ये समागमनेन मामिका इति परि-

१. अष्टा०, ४।२।१०४
२. ,, ४।३।१
३. ,, ४।३।३
४. ,, ४।१।३०
५. ,, ७।३।४४

र्तितरूपसिद्धये कात्यायनेन प्रकृतस्योपसंख्यानं विहितम्। एवमेव नरान् कायतीति विग्रहे 'आतोऽनुपसर्गे कः'[१] इत्यनेन् कप्रत्यये 'आतो लोप इटि च'[२] इत्याकारलोपे, टापि प्रस्तुतवार्तिकेन इत्वे नरिकेति सम्पद्यते। वार्तिकाभावे नरका इति प्रयोगः पूर्वं प्रचलितः भवेत्।

कारिकासर्विकाप्रभृतिप्रयोगाणां सादृश्यात् मामिकानरिकादयः रूपान्तरे परिवर्तिताः प्रयोगाः भाषायां प्रचलिताः येषां समाधानाय प्रकृतस्योपसंख्यानम्। वार्तिकेनानेन इदमपि संकेतितं भवति यत् व्याकरणज्ञानविहीनाः जनाः सादृश्यमाधृत्य विभिन्ननवीन प्रयोगमपि कुर्वन्तः आगच्छन्ति। परिवर्तिनां वैयाकरणानामिदं कर्त्तव्यं भवति यत् ते तेषां प्रयोगाणां समाधानाय नवीनं नियमं रचयेयुः येन लोकभाषायां व्यवहारप्रवाहे वा समागतानां शब्दानां साधुत्वं निष्पादितं भवेत्। मामिकानरिकेतिप्रयोगसिद्धये निर्दिष्टप्रकृतवार्तिकस्येदमेव तात्पर्यम्।

	उत्तरपदलोपे च	(७।३।४५)
का०	उत्तरपदलोपे चोपसंख्यानम्	,,
प्र०	उत्तरपदलोपे न	,,
सि०	उत्तरपदलोपे च	,,

उत्तरपदस्य लोपे सति प्रत्ययस्थककारात्पूर्वस्य अकारस्य स्थाने इत्वप्रतिपादनं न कर्तव्यम् आपि परे। यथा—देवदत्तिका–देवका—देवदत्त—शब्दात् कप्रत्यये, 'अनजादौ च'[३] इति पूर्वाचार्यकृतकारिकाव्याख्यान-भाष्यबलेन द्वितीयाचः उत्तरस्य दत्तशब्दस्य लोपः संजातः इदानीं देवकशब्दाट्टापि देवका इति। अत्र 'प्रत्ययस्थादिति' इत्वस्य प्राप्त्या देविका इति रूपं भवति स्म किन्तु उक्तवार्तिकेन इत्वस्य निषेधः कृतः। देवका इत्यस्यार्थः तदेव यत् लोपविकल्पपक्षे सम्पन्नस्य देवदत्तिकाशब्दस्य तिष्ठति। नामानि लघूकृत्य आह्वानस्य समकालिकीं प्रवृत्तिमवलोक्य भाषायामागतस्य शब्दलोपदिशा संजातस्य नवीनरूपप्रचलनस्य व्याकरणसम्मतौचित्यप्रदर्शनाय कात्यायनेन प्रकृतवार्तिकोपस्थापनं कृतम्।

दीव्यतीति देविकाशब्दः दिव्धातोः ण्वुलि कृते टापि, 'प्रत्ययस्थे'ति इत्वे सिध्यति, यस्यार्थः–दीप्तिमती देवतासम्बन्धिनी वा कापि दिव्या स्त्री भवति। यदि पाणिनिनियमेन देवदत्तिकासम्बद्धः देवकाशब्दः व्युत्पन्नः भवेत्तदा इहापि

१. अष्टा०, ३।२।३
२. ,, ६।४।६४
३. चतुर्थादनजादौ च लोपः पूर्वपदस्य च।
अप्रत्यये तथैवेष्टः उवर्णाल्ल इलस्य च॥ महा० ५।३।८३

देविका इति भवेत्। एवं प्रतीयते यत् पाणिनिकाले देविकाशब्दः उभयोरर्थयोः प्रचलितः आसीत् किन्तु कात्यायनकाले देवका इति देवदत्तका इत्यस्य लघुसंस्करणत्वेन प्रसिद्धिं प्राप्तः भाषाप्रयोगः, तदर्थमेव इत्वनिषेधस्य कृते वार्तिकमिदं प्रणीतमाचार्यवर्येण।

पाणिनिपूर्वम् देविकाशब्दस्य प्रयोगः शतपथब्राह्मणादिषु[1] अवलोक्यते किन्तु देवका इत्यस्य प्रयोगः न दरीदृश्यते अनेनापि उपर्युक्तं व्याख्यानं समर्थितं भवति।

भा०	वा सूतकापुत्रकावृन्दारकाणाम्	(७।३।४५)
का०	वा सूतकापुत्रकावृन्दारकाणामुपसंख्यानम्	,,
प्र०	सूतकादीनां वा	,,
सि०	सूतकापुत्रिकावृन्दारकाणां वेति वक्तव्यम्	,,

वार्तिके 'वा सूतका' इत्यत्र वा अ इति छेदः तेनायमर्थः फलति–प्रत्ययस्थात् ककारात् पूर्वस्य अकारादेशः विकल्पेन भवति। सूतका षुङ् प्राणिगर्भविमोचने धातोः 'गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च'[2] इति सूत्रेण कर्तरि क्तप्रत्यये टापि तदन्तात् स्वार्थिके कप्रत्यये आपो ह्रस्वे, पुनः टापि प्रत्ययस्थककारात्पूर्वस्य अकारस्य वार्तिकेन अकारविधाने सूतका, तदभावे प्रत्ययस्थादिति इत्वे सूतिका। पुत्रिकापुत्रशब्दात् 'शाङ्गरवाद्यञो ङीन्'[3] इत्यनेन स्त्रीत्वविवक्षायां ङीन्-प्रत्यये तदन्तात् कप्रत्यये 'केऽणः'[4] इति ह्रस्वे, टापि, प्रत्ययस्थककारात्पूर्वस्य इकारस्य अकारादेशे पुत्रका, विकल्पे इत्वे सति पुत्रिका इति। एवमेव शृङ्गवृन्दाभ्यामारकन्[5] इत्यनेन वृन्दशब्दात् आरकन्प्रत्यये टापि कात्पूर्वस्य अकारस्य अकारादेशे वृन्दारका (रूपिणी, मुख्या वा), अकारत्व विकल्पे इत्वे वृन्दारिका।

भाषायाम् अष्टका, क्षिपका, ध्रुवका, कन्यका, चटकका, यका, तकेत्यादिरूपाणि अवलोक्य तत्सादृश्येन सूतका, पुत्रका, वृन्दारकेति रूपमपि प्रचलितम्। इत्वघटितमपि रूपं प्रचलितमेवासीत्। सादृश्यात् रूपपरिवर्तनजन्यं सूतकादिरूपं, यस्य सिद्धये वार्तिकमिदं प्रणीतम्।

भा०	क्षिपकादीनाञ्च	(७।३।४५)
का०	क्षिपकादीनाञ्चोपसंख्यानम्	,,

१. इति नु देविकानाम् हवींष्युक्तानि, शतपथब्राह्मण ६।५।१।३४
२. अष्टा० ३।४।७२
३. ,, ४।१।७३
४. ,, अष्टा०, ७।४।१३
५. ,, वा०, ५।२।१२२

प्र०	क्षिपकादीनां न	,,
सि०	क्षिपकादीनाञ्च	,,

क्षिपकादिगणपठितशब्दानां प्रत्ययस्थककारात् पूर्वस्य अकारस्य स्थाने इत्वं न भवति। यथा क्षिपका–क्षिप् धातोः 'इगुपधज्ञाप्रीकिरः[1] कः' इत्यनेन कप्रत्यये, कित्वात् गुणनिषेधे क्षिपशब्दात् स्वार्थे कप्रत्यये टापि, प्रत्ययस्थादिति प्राप्तमित्वं वार्तिकेनानेन निषिध्य क्षिपका इति रूपं निष्पद्यते। एवमेव ध्रुवस्थैर्ये–धातोः इगुपधलक्षणे के, गुणनिषेधे, स्वार्थे कप्रत्यये टापि इत्वनिषेधे ध्रुवकेति। तथैव कनति दीप्यते वा इति विग्रहे औणादिके यक् प्रत्यये टापि कन्या, ततः अज्ञातादौ स्वार्थे वा कप्रत्यये, पूर्वस्यापः ह्रस्वे, टापि, इत्वनिषेधे कन्यका इति।

वार्तिककारकाले नियमतः अकारघटिताः–इत्वरहिताः–प्रयोगाः एव व्यवहारे समागताः आसन्, एतदर्थमेव नियमस्यास्य उपस्थापनमस्ति। एतेनेदं ज्ञायते यत् पाणिनिसमये ततः पूर्वं वा इत्वघटितानि रूपाणि व्यवहारे समागतानि यानि कालान्तरे इत्वविरहितानि संजातानि।

शब्दकोषतः अपि ज्ञायते यत् कन्यिका, क्षिपिका, ध्रुविकादयः पूर्वं प्रयुज्यन्ते स्म, पाणिनेः 'उदीचामातः, इत्यादिना अपि उभयरूपसिद्धिः भवति किन्तु कात्यायनकाले केवलमेकमेव इत्वविरहितं रूपं प्रचलितमासीत्–अतएव प्रकृतस्य उपसंख्यानं कृतम्।

क्षिपका इत्यस्यार्थः बलवती स्त्री या कमपि जनम् अथवा किमपि गुरुतरमपि वस्तु उत्थाप्य क्षिपति, वस्तुतः योद्ध्री इत्यर्थे अयं शब्दः। ध्रुवकाशब्देन ज्ञायते यत् स्थैर्यवती स्त्री ध्रुवका कथ्यते।

भा०	ण्यप्रतिषेधे त्यजेरुपसंख्यानम्	(७।३।६९)
का०	ण्यति प्रतिषेधे त्यजेरुपसंख्यानम्	,,
प्र०	त्यजिपूज्योश्च	,,
सि०	त्यजेश्च	,,

वार्तिकस्यास्य विषये एकं नवीनं वस्तु विचिन्त्यम्। अस्य विश्लेषणक्रमे श्रीमान् भट्टोजिदीक्षितः कथयति–'त्यजिपूज्योश्च' इति काशिका तत्र पूजेर्ग्रहणं चिन्त्यम्, भाष्यानुक्तत्वात् 'ण्यत्प्रकरणे त्यजेरुपसंख्यानम् इति हि भाष्यम्'। अत्रायं निवेशः– काशिकायाः न्यासपदमंजर्योः व्याख्यानयोः तथा अन्येषु व्याख्यानेषु क्वापि 'त्यजिपूज्योश्च' इति वार्तिकस्वरूपं न लक्ष्यते। केवलं प्रक्रियाकौमुद्याम् एवं पाठः परिलक्ष्यते। अतः भट्टोजिदीक्षितस्य उपर्युक्तं कथनम्, असंगतं प्रतिभाति। यद्यपि

---

[1] अष्टाध्यायी, ३।१।१३५

एतस्यापि सम्भावना भवेत् यत् तेन महाशयेन काशिकायाः तथाविधः पाठः एव अवलोकितः, यत्र वार्तिकस्य तत्स्वरूपं तिष्ठति, किन्तु इयमपि सम्भावना विचार्या यत् प्रक्रियाकौमुद्याः पाठ एव भ्रमेण काशिकापाठः उक्तः अथवा मुद्रणकाले 'त्यजिपूज्योश्च' इति प्रक्रिया एतस्य स्थाने काशिका इति पाठः मुद्रितः।

'यजयाचरुचप्रवचर्चश्च'[१] इत्यनेन ण्यति प्रतिषेधे क्रियमाणे 'त्यजहानौ' इत्यस्य उपसंख्यानम् विधेयम्। तथा च त्यज् धातोः ण्यति प्रत्यये परे तिष्ठति सति कुत्वम् न भवति। उदाहरणम्—त्याज्यम्। अत्र प्रकृतवार्तिकाभावे 'त्याग्यम्' इति रूपापत्तिः। एवं प्रतिभाति यत् यथा 'मृजेर्मार्ग्यम्' इति कुत्वविशिष्टं रूपं भवति तथा भवेन्नाम पाणिनिकाले, त्याग्यम् इति रूपस्यापि प्रचलनम्, अथवा मार्ग्यमिति अवलोक्य तत्सादृश्ये जनाः त्याग्यमिति रूपं सूत्रनियमाभावे न कुर्वन्तु, इत्येतदर्थम् कात्यायनेन वार्तिकमिदमुसंख्यातम्।

भा०	प्रतिषेधेत्यकन-उपसंख्यानम्	(७।३।४५)
का०	यत्तदोः प्रतिषेधेत्यकन उपसंख्यानम्[२]	"
प्र० सि०	त्यकनश्च निषेधः	"

त्यकन्प्रत्ययसम्बन्धिनः ककारात्पूर्वस्य अकारस्य स्थाने इत्वं न भवति—अधित्यका, उपत्यका। अधिशब्दात् उपशब्दात् 'उपाधिभ्यां त्यकन्नासन्नारूढयोः'[३] इति सूत्रेणत्यक्नप्रत्यये अधित्यक-उपत्यकशब्दाट्टापि 'प्रत्ययस्थात्'[४] इत्यादिना इत्वस्य प्राप्तिः वार्तिकेनानेन प्रतिषिद्धा।

पाणिनिनियमेन अधित्यिकोपत्यिकेति प्रयोगापत्तिः सम्भवति, भवेन्नाम यत् एवमेव प्रयोगः पूर्वमासीत्। कात्यायनकाले इत्वरहितः अधित्यका उपत्यकेति प्रयोगः समागतः तदर्थं वार्तिकमिदम् उपन्यस्तम्। उच्चारणसुखार्थं मुखसुखार्थं वा एवंभूतं रूपपरिवर्तनं सञ्जातम्।

कालिदासेन बहुशः अनयोः शब्दयोः प्रयोगः कात्यायनसम्मतः एव कृतः। 'हिमवतो गिरेरुपत्यकारण्यवासिनः'[५] 'मलयाद्रेरुपत्यकाः'[६] 'अधित्यकायामिवधातु-

---

१. यासयोरित्वप्रतिषेधे इति पाठान्तरम् काशिकायाम्।
२. अष्टा०, ५।२।३४
३. अष्टा०, ७।३।४४
४. अभिज्ञानशाकुन्तलम्, पंचमः अंकः।
५. अभिज्ञानशाकुन्तलम्, पंचमः अंकः।
६. विक्रमोर्वशीयम् तथा च रघुवंशम्, ४।४६

मध्याम्'[१] 'स्थाणुं तपस्यन्तमधित्यकायाम्'[२] कालिदासात्पूर्वकालिकमनयोः रूपं बौटलिङ्क-रौथमहाशयाभ्यां न निर्दिष्टमस्ति । अमरकोशे एतस्यार्थविषये लिखितमस्ति

'उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका'[३]

डॉ० अग्निहोत्रिमहोदयानाम्मते हिमालयस्य अधित्यका वहिर्गिरिरित्यर्थस्य बोधिका तथा चोपत्यका, हस्तीनाम् आधिक्यार्थं प्रसिद्धासीत् । इयं नेपालदेशस्य 'तराई' इति क्षेत्रं तथा च पूर्वस्य भागः वर्तते । भाष्यकारेण 'हस्तिमती उपत्यका'[४] इति उक्तमस्ति,

भा०	अवेर्दुग्धे सोढदूसमरीसचः	(४।२।३६)
का० सि०	अवेर्दुग्धे सोढदूसमरीसचोवक्तव्याः	,,
प्र० प्र०	अवेर्दुग्धे सोढदूसमरीसचः प्रत्यया वाच्याः	,,

दुग्धं क्षीरम्, दुग्धेऽर्थे अविशब्दात्, सोढ, दुस्, मरीसच् —प्रत्ययाः भवन्ति । अत्र उदाहरणम्—अविसोढम्, अविदूसम्, अविमरीसचम्, अत्र आदेशप्रत्यययोः इति षत्वम् सकारोच्चारणसामर्थ्यात् न भवति अन्यथा 'षोढप्रत्ययं प्रक्रियालाघवार्थं विदध्यात्, एवं दूसमरीसचयोरपि षत्वाभावः सकारस्य ।

अनेन वार्तिकेन ज्ञायते यत् कात्यायनकाले संस्कृतम् नूनमेव लोकभाषा आसीत् । अवेः दुग्धेऽर्थे उपरिचर्चितानां प्रयोगाणाम् प्रकृतेन या सिद्धिः आचार्येण प्रदर्शिता सा भाषाशास्त्रीयदृष्ट्या सर्वथा विचारणीया । कतिपयविद्वांसः सोढदूसमरीसच-इत्येतान् शब्दान् संस्कृतेतरभाषात्वेन मन्यन्ते किन्तु तच्चिन्त्यम् । मर्षणार्थकात् सह् धातोः निष्ठायाम् क्तप्रत्यये सति सोढ-इति निष्पद्यते । किन्तु अयं 'सोढशब्दः' ऊधशब्दस्य रूपान्तरत्वेन तिष्ठति—ऊधस्-उढस्-सूढ-सोढ । ऋग्वेदे ऊधशब्दः जलस्य वाचकः । अतः सर्वथा शब्दोऽयं भारतीय एव ।

वाकरनागलमहाशयः एतान् शब्दान् पालिमूलकान प्राकृतमूलकान वा स्वीकरोति[५] । अन्ये विद्वांसः अत्र मौनावलम्बिनः । स्कौटिश-भाषायां दुश्धातुः मिषादिकृते अभ्याहनने प्रयुक्तः भवति । सिन्धीभाषायां दोसोशब्दः पिण्डखर्जूरस्य रसः इत्यर्थे व्यवहृयते । जिप्सीभाषायां दोश् धातोः दुग्धदोहनार्थः वर्तते । ऊधस् शब्दात् ऊधस->धूस->दूस इत्यस्य विकासकल्पना कर्त्तुं शक्यते । मरीस्शब्दः

१. रघुवंशम्, २।२९
२. कुमारसम्भवम्, ३।१७
३. अमरकोषः, २।३।७
४. पत० का० भा०, पृ० ७८
५. संस्कृत शास्त्रों का इतिहास, पृ० ४४६

आर्यभाषास्रोतस्कः, तमिलभाषायां मेषी-दुग्धार्थकः मरि-शैक्कु-शब्दः विद्यते । आचार्यप्रवर श्रीबलदेवोपाध्यायमहाशयानां मते इमे त्रयः प्रत्ययाः कात्यायननिर्दिष्टाः न वर्तन्ते प्रत्युत स्वतन्त्रशब्दाः सन्ति । एषां प्रत्ययरूपे वार्तिके उल्लेखः भाषाविज्ञान-दृष्ट्या एका महनीयोपलब्धिः[1] ।

भा०, का०	हनो वा वध च	(३।१।९७)
प्र०	हनो वा यद्वधश्च	(६।४।६४)
सि०	हनो वा यद्वधश्च वक्तव्यः	(३।१।९७)

हन् धातोः विकल्पेन यत् प्रत्ययः भवति तथा हन् इत्यस्य स्थाने वध इत्ययं चादेशः । अत्र न्यासकारः[2] हन्तेर्धातोर्यत्प्रत्ययो भवति, ण्यतोऽपवादः । 'वा'वचनाद् पक्षे ण्यद् भवेत्येव । यत्प्रत्ययस्तु तत एव बहुलवचनाल्लभ्यते । यदा यत् भवति तदा हन्तेर्वधादेशः । सोऽपि 'हनोवध लिङि'[3] इत्यत्र 'बहुलं छन्दसि' इत्यतो बहुलग्रहणानुवृत्तेर्लभ्यते । वध्यम्, घात्यम्, हनधातोः यति हनः वधादेशे च वध्यम्, 'ऋहलोर्ण्यत्'[4] इति ण्यति, 'अत उपधायाः' इति वृद्धौ हनस्तोऽचिण्णलोः[5] इत्यनेन नस्य स्थाने तत्वे 'हो हन्तेर्ञ्णिन्नेषु'[6] इति हस्य स्थाने कुत्वे-घादेशे-घात्यम् इति ।

भाषायाम् 'घात्यम्' इत्यस्यस्थाने वध्यम् इति रूपान्तरव्यवहारमप्यवलोक्य प्रकृतस्य विधानं कृतं विद्यते । रूपपरिवर्तनमिदं प्रयत्नलाघवजन्यम्, जन् इत्यतः जन्यम्, तक् इत्यतः तक्यम्, इत्यादिप्रयोगमवलोक्य तेषां सादृश्यात्—वध् इत्यतः साक्षात् वध्यम् इति रूपं व्यवहारे समागतं यस्य निष्पत्तिप्रदर्शनाय कात्यायनेन प्रकृतस्य उपदेशः कृतः ।

---

१. संस्कृत शास्त्रों का इतिहास, पृ० ४४६
२. का०, न्या०, ३।१।९७
३. अष्टा०, २।४।४२
४. ,, ३।१।१२४
५. ,, ७।३।३२
६. ,, ७।३।५४

वाचं देवा उपजीवन्ति विश्वे,
वाचं गन्धर्वा पशवो मनुष्याः ॥

॥ चतुर्थोन्मेषः ॥

ध्वनिपरिवर्तनाधिया प्रकृतस्य परिशीलनम्

आत्मनः, बुद्धेः, मनसः, शरीराग्नेः, वायोश्चवाग्ध्वनीनां प्रादुर्भूतिः भवति। पाणिनीयशिक्षायां वाग्ध्वनेरुत्पत्तिक्रमः सुष्ठु प्रदर्शितः। तदनुसारं यदा वयं किमपि कार्यं चिकीर्षामः तदा पूर्वं तस्य कार्यस्य ज्ञानं प्राप्नुमः। पुनश्च तदर्थम् इच्छोत्पद्यते तदा च वयं तत्सिद्धये तदवाप्तये वा प्रयतामहे। एवमेव यदा वयं किंचिद् ब्रूमहे तदा अस्माकं संभाषणात् पूर्वमेव विभिन्नाः आभ्यन्तरिकक्रियाः संपद्यन्ते। इमा एव क्रियाः ध्वन्युत्पादिकाः[1]। तथा च यः कश्चित् जनः यदा वक्तुमभिलषति तदा आत्मना बुद्ध्या च प्रेरितं मनः-शरीराग्निमाहत्य तद्द्वारा वायुमुत्थापयति, उत्थितश्च स वायुः अतिर्यक् शीघ्रमुद्धारकं मूर्धानं याति, तत्र च आस्फालनात् नादरूपता प्रयुज्यते, तत्पश्चात् स एव नादः कण्ठताल्वादिस्थातृप्रदेशमवाप्य अकचटतपादिवर्णरूपेण विवर्तमाप्नोति। तथा चात्मनः, बुद्धेः, मनसः, शरीराग्नेः, वायोश्च समवेतः व्यापारः ध्वनिः तिष्ठति। तत्र स्थूलावलोकनेन वायोः सर्वतोभावेन वृत्तिः संदृश्यते। प्रातिशाख्येष्वपि एतत् तत्त्वस्य बहुशः विवेचनमुपलभ्यते। ऋक्तन्त्रप्रथमपाठके ध्वन्युत्पत्याः वैज्ञानिकप्रक्रिया दरीदृश्यते तद्यथा वायुं प्रकृतिमाचार्याः, वायुमूर्ध्वं श्वासीभवति, श्वासो नाद इति शाकटायनः। वायुरयमस्मिन् काये मूर्च्छंत्यटतीत्येषोऽर्थः। स खलु खविशेषं प्रतिपन्नः कण्ठं प्रतिपन्नः श्वसितिर्भवति। स श्वसितिः शिरः प्रतिपन्नः, आकाशमद्धारकं नदतिर्भवति। तस्येदानीं नदतेर्जिह्वाग्रेणेर्यमाणस्य व्यक्तव्यः प्रादुर्भवन्ति, वर्णानामोष्ठ्याः, कण्ठ्या-

---

१. आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया।
मनः कायाग्निमाहत्य स प्रेरयति मारुतम् ॥
मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम्।
सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य-मारुतः ॥
वर्णान् जनयते तेषां विभागः पंचधा स्मृतः।
स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः ॥

पाणिनीयशिक्षा।

स्तालव्याः मूर्धन्या दन्त्या नासिक्या जिह्वामूलीया इति। तद्यथा त्रपुकारः त्रपु विलाप्य बिम्बे निषिचेद्, यं यं बिम्बदेशं तत् त्रपु निषिच्यते, ततस्ततो द्रव्याणां व्यक्तिर्भवति, कांचिमणिके रुचकः स्वस्तिक इत्येवं यंयमयं स्थातृविशेषं जिह्वाग्रेण स्पृशति ततस्ततो वर्णानां व्यक्तिर्भवति ओष्ठ्यानां कण्ठ्यानां तालव्यानां मूर्द्धन्यानां दन्त्यानां नासिक्यानां जिह्वामूलीयानाम्। एतेनेदं विस्पष्टं यत् एकस्मात् नादब्रह्मणः एव वर्णाः उत्पद्यन्ते, यतः प्रतिकायं वायुः मूर्च्छति, या खलु विवक्षा तत्र च त्वरितमेव ऊर्ध्वमधिगच्छन् कण्ठे यद्यपि श्वसनरूपतामेति, तथाप्यतिवेगवताघातं विना अवरोधो न तत्र तिष्ठति। तथा च वायोर्मूर्ध्नावरोधो संजायते। तदनु नादरूपेण विवर्तः स परावृत्य ताल्वादिसंयोगेन अकचटतपादिनानावर्णानां स्वरूपत्वं लभते। प्रातिशाख्येषु प्रतिपादितं यत् श्वासनादादयः आभ्यन्तरप्रयत्नरूपाः किन्तु पाणिनीयव्याकरणे इमे बाह्यप्रयत्नरूपेण परिभाष्यन्ते। प्रातिशाख्यानुसारं श्वासनादादिभिर्वर्णोत्पत्तिर्भवति किन्तु वैयाकरणानां मते एषां वर्णोत्पत्तेरनन्तरभावित्वमुपपन्नम्। तथा च शब्देन्दुशेखरे नागेशेन विचिन्तितम्—

'एवं च शब्दप्रयोगेच्छयोत्पन्नयत्नाभिहताग्निना नाभिप्रदेशात् प्रेरितो वायुवेगान्मूर्धपर्यन्तं गत्वा प्रतिनिवृत्तो वक्त्रं प्राप्य उक्तयत्नसहकारेण तत्तत्स्थानेषु जिह्वाग्रादिस्पर्शपूर्वकं तत्तत्स्थानान्याहत्य वर्णानभिव्यनक्ति। ततो यत्नविशेषेण गलविवरविकासादीन् करोति, तत्र ये तत्तत्स्थानाभिघातका यत्नाः, ते आस्यान्तर्गततत्तत्कार्यकारित्वादाभ्यन्तरा उच्यन्ते। गलविवरविकासादिकराश्चास्य बहिर्भूतदेशे कार्यकरत्वाद् बाह्या इति। मात्राकालिकत्वादिरूपह्रस्वत्वादिकन्तु वाय्वल्पकृतमहत्त्वकृतमिति नाभिप्रदेशात् प्रेरकयत्न एव कश्चिद् विलक्षणोऽल्पं वायुं प्रेरयति कश्चिदधिकमिति तस्य वायुप्रेरणारूपं कार्यमास्य बाह्यदेशमिति तदपि बाह्यमेव।'[1] इति वैयाकरणानां पक्षः, किन्तु आधुनिकभाषाशास्त्रविचक्षणाः विषयेऽस्मिन् प्रातिशाख्यपक्षमेवावलम्बन्ते।

उभयपक्षयोः यन्मतान्तरं तिष्ठति तत् तिष्ठतु किन्तु उभयत्र इदन्तु विस्पष्टमेव यत् ध्वनेरुत्पत्तिक्रियायां वायोः सर्वतोभावेन विशिष्टं स्थानं वरीवर्ति। ध्वनेरुत्पत्तिक्रियामभिलक्ष्यैव भाषाशास्त्रमर्मज्ञाः ध्वनति ध्वनयतिवेति व्युत्पत्तिमूलकं ध्वनिमेवं लक्षयन्ति—

वायोः विशिष्टकम्पनात्मकगतिद्वारा उपलब्धस्य श्रोत्रेन्द्रियस्यानुभवः ध्वनिः कथ्यते। ध्वनिरयं स्फोटतः भिन्न एव[2]। तथा च प्रतिपादितं 'तपरस्तत्कालस्य'

---

१. लघुशब्देन्दुशेखरः, संज्ञाप्रकरणम्।

२. जो वान्द्रियेज, अनुवादक—जगवंशकिशोरबलवीर, भाषा पृ० २३

इति सूत्रं व्याचक्षाणेन भगवता कात्यायनेन । यस्य 'भेर्याघातवत्' इति दृष्टान्त-वार्तिकमाश्रित्य भगवता पतञ्जलिना स्पष्टीकृतं यत्—एवं तर्हि स्फोटः शब्दः । ध्वनिः शब्दगुणः । कथम् ? भेर्याघातवत् । तद्यथा भेर्याघातो भेरीमाहत्य कश्चिद् विंशतिपदानि गच्छति, कश्चित् त्रिंशत्, कश्चित् चत्वारिंशत् । स्फोटस्तावानेव भवति । ध्वनिकृताः वृद्धिः ।

ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते ।
अल्पो महांश्च केषांचिदुभयं तत् स्वभावतः[1] ।।"

भाष्यमिदं स्पष्टीकुर्वन् कैयटाचार्यः कथयति अत्र भाष्ये स्फोटः व्यक्तिस्फोटस्य वाचकः, तच्च 'येनोच्चारितेन सास्नालांगूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्दः'[2] इत्यस्य बोधकः, किन्तु ध्वनिः तस्य शब्दस्य गुणः, व्यंजकत्वेन उपरञ्जकः । ह्रस्वदीर्घप्लुतास्तु स्वत एव भिन्नाभिन्नैर्ध्वनिभिर्व्यज्यन्ते इति तेषां कालभेदः । यथा प्रयत्नवशादुत्पन्नो भेरीशब्दः कश्चिदल्पकालमुपलभ्यते, कश्चिच्चिरं, कश्चित् चिरतरम् । एवं वृत्तिषूपलब्धीनां कालभेदः विषयस्य त्वभेद एव ।

यथा कोऽपि भेरीवादकः भेरीमाहत्य तद्ध्वनिमाकर्णयन् विंशतिपदानि याति, कोऽपि त्रिंशत् पदानि कोऽपि चत्वारिंशत्पदानि, कोऽपि ततोऽप्यधिकानि अल्पानि वा पदानि याति, पुनश्च तदनन्तरमग्रे प्रयाणाय भेरीमाघातयति । किन्तु सर्वत्र भेर्याघातरूपः स्फोटः भेरीविस्फोटो वा एकसदृश एव तिष्ठति, ध्वनिरेव वृद्धिमेति ह्रासं वा याति । एवं चेदं स्पष्टं यत् स्फोटः व्यंग्यः ध्वनिश्च व्यंजकः । शब्दानां व्यंजकध्वनिः केवलं बाह्येन श्रवणेन्द्रियेण महत्वरूपेण वा लक्ष्यते । स्फोटस्तु सर्वेषु ध्वनिषु अभिन्न एव तिष्ठति । व्यक्तेषु शब्देषु स्फोटः ध्वनिश्च इत्युभावेव तिष्ठतः, यतः तत्र अर्थविबोधः भवति किन्तु अव्यक्तशब्देषु अर्थवाचकत्वरूपसामर्थ्याभावात् स्फोटः न तिष्ठति, केवलं ध्वनिः एव तिष्ठति । तात्पर्यमिदं यत् ध्वनिः स्फोटस्य व्यंजकः बोधकः वा भवति । शब्दः व्यंग्यः, ध्वनिः तस्य व्यंजकः । तस्मिन् व्यंजके ध्वनावेव वृद्धिः ह्रासो वा परिलक्ष्यते । ध्वनिः शब्दस्य गुणः एतदर्थमेव कथ्यते यतः सस्फोटं प्रकटयति । स्फोटादेव ध्वनेरुत्पत्तिः भवति अतः उभयोः कार्यकारण-भावसम्बन्धः, स्फोटः कारणं; ध्वनिः कार्यम् । यत् श्रवणेन्द्रियव्यापारजन्यं तद् ध्वनिः किन्तु श्रवणानन्तरं यदवगम्यते तत्तु स्फोटं । विषयेऽस्मिन् पतंजलेः यदभिमतम्—अर्थज्ञानाय उभयोरेवावश्यकता, तत्तु सर्वथा उपयुक्तमेव । वैयाकरणा-नामवलोकने स्फोटं विना न तु ध्वनेः कल्पनापि कर्तुं शक्यते, नापि ध्वनिं विना स्फोटस्यैव परिकल्पना । स्फोट एव शब्दः, ध्वनिः तस्य गुणः । स्फोट एव आकाशः,

---

१. महा०, १।१ ७०

२. महा०, पस्पशाह्निकम्.

ध्वनिः तस्य गुणः—'शब्दगुणकमाकाशम्'। अत एव स्फोटः शब्दः, ध्वनिः अर्थः, स्फोट एव वास्तविकं तत्त्वं प्रकृतिः वा, ध्वनिः तस्य प्रत्यभिज्ञा प्रत्ययो वा, स्फोट एव परब्रह्म, ध्वनिस्तु तस्य माया। स्फोटः आत्मा, ध्वनिः शरीरम्, स्फोटः नवनवोन्मेषशालिनी प्रतिभा, ध्वनिः तस्य ज्ञानम्। स्फोटः अदृश्यः परोक्षरूपो वा किन्तु ध्वनिः दृश्यमानः प्रत्यक्षरूपः वा। स्फोटः वर्तते परमाणुः, ध्वनिस्तु अणुः। स्फोटः अक्षररूपः, सर्वथा अविनाशी, किन्तु ध्वनिः क्षररूपः विनाशी वा। वस्तुतस्तु संयोगविभागाभ्यामुत्पन्नो ध्वनिर्ह्यनित्यः, स्फोटस्तु नित्यः।

ध्वनेरस्य प्राकृतवैकृतरूपं यद् द्वैविध्यं भर्तृहरिणा उपपादितं[1] तत्र प्रकृत्यार्थबोधनेच्छया स्वभावेन वा जातः स्फोटव्यंजकः प्रथमः प्राकृतः। तस्मात् प्राकृताद् जातो विकृतिविशिष्टश्चिरस्थायी निवर्तको वैकृतिकः। अयं वैकृतिकः-विकृतेर्विकारादागतः ध्वनिरेव भाषाशास्त्रीयैः विचिन्तितध्वनिपरिवर्तनकोटौ समायाति।

कस्याः अपि भाषायाः ध्वनयः कदापि सुस्थिराः एव न भवन्ति। तेषु निरन्तरं परिवर्तनानि समायान्ति। परिवर्तनानामेषां विभिन्नकारणानि भाषाशास्त्रविचक्षणैः प्रतिपादितानि। कारणेष्वेषु प्रयोक्तुः अज्ञानं, मिथ्यानुकरणं, भावावेगः, इत्यपि अन्यतमरूपेण तिष्ठति। वस्तुतः भाषा केवलमेतदर्थमेव न तिष्ठति यत् मनुष्यः कस्यापि तथ्यस्य तन्माध्यमेन अभिव्यक्तिं कर्तुं शक्नुयात्, प्रत्युत भाषा तु तस्य जनस्य व्यक्तित्व-विशेषस्य अभिव्यक्तेः साधनरूपापि तिष्ठति। अतः भाषाप्रयोक्तुः व्यक्तित्वस्यापि प्रभावः भाषापरिवर्तनस्य कारणत्वेन वरीवर्ति। ध्वनिपरिवर्तनानामुत्पत्त्याः कारणमपि भाषायां परिवर्तनस्य प्रवृत्तिहेतुकम् एव तिष्ठति। एवं चेदं स्पष्टं यत् व्यक्ति-गतेनापि सामर्थ्येन ध्वनिपरिवर्तनं भवति। व्यक्तयोऽपि तथा दृश्यन्ते याः संयुक्ताक्षरादीनां ङकारणकारादीनां वा सम्यगुच्चारणे न शक्ताः, ततश्च कश्चित् तथाविधान् वर्णान् त्यजति किम्बा तत्साहाय्याय अपरान् वर्णानुपादत्ते, तत्तत्साधुशब्दज्ञानवशाच्चापि विपरीतं भाषते। तादृशव्यक्तिबाहुल्ये अनुकरणपदेषु वा जनेषु ध्वनिविपर्यासः स्फुटं दृश्यते। संस्कृतवैयाकरणैरपि इदमुररीकृतम्। कात्यायनेन स्पष्टमेव प्रतिपादितं—सिद्धं त्ववस्थिता वर्णा वक्तुश्चिराचिरवचनाद् वृत्तयो विशिष्यन्ते[2]। वार्तिकमिदं विश्लेषयता भगवता पतंजलिनोक्तं

---

१. वर्णस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते।
वृत्तिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते॥
शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदाय वैकृतः।

वाक्यपदीयम्।

२. महा०, वा०, १।१.७०

यद् - सिद्ध - मेतत् । कथम् । अवस्थिता वर्णाद्रुतमध्यमविलाम्बितासु । किं कृतस्तर्हि वृत्तिविशेषः । वक्तुश्चिराचिरवचनाद् वृत्तयो विशिष्यन्ते । वक्ता कश्चिदाश्वभिधायी भवति । आशुवर्णानभिधत्ते । कश्चिच्चिरेण । कश्चिच्चिर—तरेण कश्चिच्चिरतमेन । तद्यथा तमेवाध्वानं कश्चिदाशु गच्छति । कश्चिच्चिरेण कश्चिच्चिरतरेण कश्चिच्चिरतमेन । रथिकः आशु गच्छति । आश्विकश्चिरेण । पदातिश्चिरतरेण शिशुश्चिरतमेन । विषम उपन्यासः अधिकरणमत्राध्वा व्रजि-क्रियायाः । तत्रायुक्तं यदधिकरणस्य वृद्धिह्रासौ स्याताम्[1] । निदर्शनेनानेनास्माकं तात्पर्यं यत् इदं तु स्पष्टं यत् वक्तुः उच्चारणप्रक्रिया प्रतिव्यक्तिभिन्ना एव भवति । यदैव उच्चारणे भेदः समायाति तदैव शनैः शनैः ध्वनौ भेदः समायास्यति । अतः इदं स्पष्टमेव यत् प्रयोक्तुः उच्चारणसौविध्यात्, अज्ञानात्, भ्रान्त्या वा, मिथ्या-नुकरणात्, भावावेशाच्च ध्वनौ परिवर्तनं भवति, तथा च तस्य कायिकरचनापि विशेषेण ध्वनिपरिवर्तने नियामिका भवति । वस्तुतः ध्वनौ द्विविधं परिवर्तनं संजायते—स्वतः उद्भूतं[2] परिवर्तनं परोद्भूतं[3] वा परिवर्तनम् । तत्र प्रथम-कोटिकध्वनि—परिवर्तनाय परिस्थितिविशेषस्य अवस्थाविशेषस्य चावश्यकता वरीवर्ति । स्वतः अनुनानासिकत्वरूपं ध्वनिपरिवर्तनमस्मिन्नेव वर्गे तिष्ठति । स्वतः उद्भूतं परिवर्तनमकारणमनायासं वा भवति । किन्तु कथनमिदं तत्त्वतः नोपयुक्तं यतः तत्रापि अज्ञानादीनि कारणानि तिष्ठन्त्येव । परोद्भूतं परिवर्तनं शब्दस्याभ्यन्तिरिकं परिवर्तनं न भवति प्रत्युत बाह्यपरिस्थिति हेतोः भवति । ध्वनिपरिवर्तनस्य स्वरूपं यथा द्विविधं तथैवास्य कारणमपि द्विविधं भवति—आभ्यन्तरबाह्यभेदेन । कस्मिन्नपि ध्वनिविशेषे सम्पद्यमानं परिवर्तनं यदा कदा स्वसमीपस्थध्वनीनां कारणादपि भवति । केचन ध्वनयः सबला भवन्ति । केचन निर्बलाः । निर्बलध्वनिषु प्रायः परिवर्तनं भवति किन्तु सबलध्वनिषु परिवर्तनं न जायते यदि कदाचित् भवत्यपि तदा स्वल्परूपेणैव । यदि कस्मिन्नपि शब्दविशेषे निर्बलसबलौध्वनी समकालमेव समागच्छतः तदा निर्बलध्वनिः विलुप्यते । संयुक्त व्यंजनेषु यद्युभौ व्यंजनध्वनी समानशक्तिकौ भवतः तदा प्रथमः व्यंजनध्वनिः निर्बलः सन् लोपमेति । ये शब्दाः विशेषदैर्घ्ययुक्ताः भवन्ति तेषामुच्चारणे अधिकं सौविध्यं भवति, अतः तेष्वधिकं परिवर्तनं जायते । तथा च आभ्यन्तरकारणानां सम्बन्धः वक्तुः उच्चारणतः श्रोतुः श्रवणक्षमतायाश्च तिष्ठति । बाह्यकारणेषु वागयन्त्रस्य विभिन्नता, भौगोलिकी विभिन्नता, कालखण्डस्य प्रभावः, सामाजिक-धार्मिकराजनीतिक - स्थितीनां प्रभावः, लेखनं, सादृश्यम्, अन्यदेशीयध्वनीनां

1. महा०, ११।७०
२. Unconditional or Spontaneous.
३. Conditional or contact.

अपरस्याः भाषायाः ध्वनीनां विषये प्रभावः, इत्यादिकारणानि तिष्ठन्ति। एषु सादृश्यं, बलाघातः, प्रयत्नलाघवम्, इति कारणत्रयं प्रामुख्यं भजते। सन्ति एवंविधाः कतिपये शब्दाः ये अन्यशब्दानां सादृश्यात् स्वकीयध्वनिषु परिवर्तनमुत्पादयन्ति कदाचिदेव कापि एवंविधा ध्वन्यात्मिका वृत्तिः वर्तते यदुपरि सादृश्यस्य प्रभावः न परिलक्षितः भवेत्, अथवा सादृश्यात् सा वृत्तिः अस्तव्यस्ता न संभवेत्। बलाघात-कारणादपि ध्वनौ परिवर्तनं भवति। कस्मिन्नपि ध्वनिविशेषे यदि बलं स्थाप्येत तदा श्वसनक्रियायाः अधिकांशः तस्यैवोच्चारणे व्ययीक्रियेत। परिणामतः समीपस्थाः ध्वनयः दुर्बलाः भवन्ति तथा शनैः शनैः तेषां लोपः संजायते। प्रयत्न-लाघवं ध्वनिपरिवर्तनस्य सर्वप्रमुखं कारणं तिष्ठति। कापि भाषा साध्यत्वेन न तिष्ठति प्रत्युत सा विचाराणां स्फुटाभिव्यक्तेः साधनरूपैव। अतः इदन्तु परं स्वाभाविकं यत् सर्वः जनः इदमेवाभिलषेत् यत् स स्वल्पप्रयासेनैव स्वकीयभावानाम-भिव्यक्तीकरणस्य चेष्टां विदध्यात्। मुखसौकर्यात् उच्चारणे कठिनध्वनीनां परित्यागः अतीव स्वाभाविकः। आधुनिकभाषाशास्त्रविचक्षणानां मते ध्वनि-परिवर्तनं प्रायशः पंचदशप्रकारैः भवति। ते च पंचदशप्रकाराः तेषाम्मते एवं तिष्ठन्ति—

लोपः, आगमः, विपर्ययः, समीकरणं, विषमीकरणं, सन्धिः, मात्राभेदः; ऊष्मीकरणम, अनुनासिकीकरणम्, घोषीकरणम्, अघोषीकरणम्, महाप्राणीकरणम्, अल्पप्राणीकरणं, स्वरभक्तिः, अपश्रुतिः। एषां संक्षेपतः संकेतरूपेण वा विवेचनमत्र विधीयते—

लोपः[1]—प्रयत्नलाघवात्, त्वराहेतोः, स्वराघाताद्वा कतिपयध्वनीनां लोपः संभवति। ध्वनिपरिवर्तने इयं प्रवृत्तिः प्राधान्येन तिष्ठति। स्वरलोपव्यंजनलोपस्वर-व्यंजनोभयलोपरूपं त्रैविध्यमत्र वरीवर्ति। यदा अक्षरद्वयम् अक्षरसमूहो वा एकसममेव वारद्वयं समागच्छति तदा उच्चारणसौविध्याय अन्यतरस्य लोपः भवति। लोपोऽयं समाक्षरलोपः[2] कथ्यते। अस्यापि ध्वनिपरिवर्तनकारणेषु प्रामुख्यं तिष्ठति। संस्कृतभाषायां समाक्षरलोपस्य बहुशः उदाहरणानि लभ्यन्ते। तद्यथा

---

1. Elision.

2. Haplolagy occurs when in a word one whole syllable (i-e a vowel plus consonent) drops out. Such dropping happens most offen if the syllable following the one dropped contains the same consonant.

Elements of the Sce. of lang, p. 165.

जहीति इत्यस्य स्थाने जहि, शस्पपिंजरः इत्यस्य स्थाने शष्पिंजरः, शेववृधः इत्यत्र शेवृधः इत्यादीनि बहूनि उदाहरणानि समाक्षरलोपस्य निदर्शकत्वेनोपलभ्यन्ते ।

आगमः—लोपस्य विपरीतप्रक्रिया आगमे तिष्ठति । यदि कोऽपि नवीनः ध्वनिः उच्चारणसौविध्याय समायाति तदा आगमः भवति । आदिमध्यान्त्यसमस्वरागमरूपेण स्वरध्वनीनामागमः ध्वनिपरिवर्तनं प्रस्तौति । तथा च आदिव्यंजनागममध्यव्यंजनागमान्त्यव्यंजनागमरूपेण व्यंजनागमः भवति तथा च स्वरव्यंजनयोरुभयोः एकत्रागमनात् स्वरव्यंजनागमः भवति । उच्चारणसौकर्याय कस्मादपि व्यंजनात् विशेषतः संयुक्तव्यंजनात् प्रारभमाणस्य शब्दस्य आदौ, मध्ये, अन्ते च स्वरव्यंजनयोः आगमः भवति । तत्र प्रारम्भे यः स्वरः समायाति स प्रागुपजनसंज्ञया अभिधीयते[1] ।

विपर्ययः[2]—कस्यापि शब्दस्य कश्चित् स्वरध्वनिः कश्चित् व्यंजनध्वनिः वा यदा स्थानमेकं परित्यज्य अपरं स्थानमाप्नोति तथा तस्मात् स्थानात पुनः प्रथमं स्थानमेति, तदा वर्णानां पारस्परिकपरिवर्तनमेतत् विपर्यय इति कथ्यते । अयमेव आद्यन्तविपर्ययापरसंज्ञयाभिधीयते । स्वरव्यंजनविनिमयरूपावस्य द्वौ भेदौ प्रतिपादितौ ।

समीकरणम्[3]—समीपस्थौ द्वौ वर्णौ यदा अन्योन्यं प्रभावितं विधाय अन्यतरस्य रूपं प्राप्नुतः तदा समीकरणं भवति । इदमेव संस्कृत वैयाकरणानां सवर्णीकरणम् । प्रवृत्तिरियं पूर्णतः प्रयत्नलाघवजन्या ।

विषमीकरणम्[4]—यदा द्वयोः सदृशयोः समीपस्थयोः वर्णयोः एकः विषमरूपेण असमरूपेण वा परिवर्तते तदा परिवर्तनस्येयं प्रक्रिया विषमीकरणसंज्ञयाभिधीयते ।

सन्धिः—ध्वनिपरिवर्तनक्षेत्रे विशेषतः संस्कृतभाषायाः क्षेत्रे सन्धीनां महत्वपूर्णं स्थानं वरीवर्ति । द्वयोः ध्वन्योः परस्परं सम्मिलनं सन्धिः एतद्दृष्ट्या भूयशः ध्वनिपरिवर्तनं संस्कृतभाषायामवलोक्यते ।

मात्राभेदः—यदा-कदा कोऽपि ह्रस्वः स्वरः दीर्घं संजायते कोऽपि च दीर्घः ह्रस्वः संजायते । प्रक्रियेयं क्षतिपूरकता हेतोः स्वराघातादिकारणाद्वा भवति । संस्कृतभाषायां मात्राभेदरूपं ध्वनिपरिवर्तनमपि बहुत्र लक्ष्यते ।

---

1. We find in some languages certain vowels are developed before certain consonants.

   P. D. Gune. *Comparative philology*, p. 59.

2. Metathesis
3. Assimilation.
4. Dissimilation.

ऊष्मीकरणम्[1]—विशिष्टध्वनीनाम् ऊष्मेषु श, ष, स-प्रभृतिषु ध्वनिषु परिवर्तनस्य प्रक्रिया ऊष्मीकरणं कथ्यते। इदमेवाधृत्य भारोपीय भाषापरिवारः केन्तुम्, सतम् इति वर्गद्वये विभज्यते।

अनुनासिकीकरणम्[2]–अनुनासिकध्वनीनाम् अनुनासिकध्वनिषु परिवर्तनम्, अनुनासिकीकरणं कथ्यते। इदन्तु कदाचित् सकारणं कदाचिच्च अकारणमपि भवति।

घोषीकरणम्[3]–उच्चारणसौकर्याय अघोषध्वनीनां घोषध्वनिषु रूपान्तरं घोषीकरणं कथ्यते।

अघोषीकरणम्[4]—घोषध्वनीनामघोषध्वनिषु अन्तर्भावः, अघोषीकरणमभिधीयते।

महाप्राणीकरणम्[5]—अल्पप्राणध्वनीनां महाप्राणध्वनिषु परिवर्तनं महाप्राणीकरणम्।

अल्पप्राणीकरणम्[6]—महाप्राणध्वनीनामल्पप्राणध्वनिषु परिवर्तनम् अल्पप्राणीकरणमभिधीयते।

स्वरभक्ति[7]—संयुक्तव्यंजनानामपाकरणे या असुविधा तिष्ठति तामपाकर्तुं तेषां मध्ये कस्यापि स्वरस्य स्वरभागस्य वा यः आगमः संजायते स स्वरभक्तिः विप्रकर्षो वा कथ्यते[8]। प्रातिशाख्येषु अपि स्वरभक्तिचर्चा दरीदृश्यते—रेफाद् स्वरोपहिताद् व्यंजनोदयाद् ऋकारवर्णस्वरभक्तिरुत्तरा। विच्छेदाद्

---

1. Assibilation
2. Nasalization
3. Vocalization or vocing.
4. Devocalization or unvocing.
5. Aspiration.
6. Dispiration.
7. Anaptyxis.
8. Another similar phenomenon is the insertion of a vowel between combination of sounds, which are difficult to pronounce. This is called स्वरभक्ति or Anaptyxis.

Comp. phil., p. 60

स्पर्शोष्मपराच्च घोषितः[1] । श्रीसिद्धेश्वरवर्मणा संस्कृतभाषायां संजातेषु ध्वनिपरिवर्तनेषु स्वरभक्तेः महत्त्वं प्रतिपादितम्[2] ।

अपश्रुतिः[3]—अत्र व्यंजनानां स्वस्वरूपे यथावस्थितावपि केवलं स्वरपरिवर्तनात् अर्थे परिवर्तनं भवति तथा चात्र ह्रस्वस्य दीर्घे, दीर्घस्य ह्रस्वे च स्वरपरिवर्तनं जायते । अपश्रुतौ एव भारतीयवैयाकरणानां संप्रसारणगुणवृद्धीनामपि अन्तर्भूतिः भवति ।

आधुनिकभाषाशास्त्रज्ञैः प्रोक्तानि इमानि कारणानि शब्दान्तरैः प्राचीनभारतीयभाषाशास्त्रेऽपि परिलक्ष्यन्ते । निरुक्तकृतायास्केन वर्णध्वनिपरिवर्तनस्य निम्नलिखितदिशः प्रकीर्तिताः—

अथाप्यस्तेर्निवृत्तिस्थानेष्वादिलोपो भवति । स्तः । सन्तीति । अथाप्यन्तलोपो भवति । गत्वा । गतमिति । अथाप्युपधालोपो भवति । जग्मतुः । जग्मुरिति । अथाप्युपधाविकारो भवति । राजा । दण्डीति । अथापि वर्णलोपो भवति । तत्त्वायामीति । अथापि द्विवर्णलोपस्तृच इति । अथाप्यादिविपर्ययो भवति । ज्योतिः । घनः । बिन्दुः । वाटय इति । अथाप्याद्यन्तविपर्ययो भवति । स्तोकाः । रज्जुः । सिकताः । तर्क्विति । अथाप्यन्तव्यापत्तिर्भवति । ओघः । मेघः । नाधः । गाधः । वधूः । मध्विति । अथापि वर्णोपजनः । आस्थत् । द्वारः । भरूजेति । एवं च यास्काचार्येण अत्र ध्वनिपरिवर्तनस्य सरणिः प्रदर्शिता । आधुनिकभाषाशास्त्रस्य **Syncope** इति उपधालोपः वर्तते, **Assimilation** तथा **Dissimilation** इति विपर्यय इत्यत्र गतार्थौ भवतः । संस्कृतवैयाकरणानामाद्यन्तविपर्ययः (**Metathesis**) इति तिष्ठति । वर्णोपजनं तु **Anaptyxis** इति वर्तते[4] ।

---

१. ऋक्प्रातिशाख्यम् ६।४६,४७

२. All the Indian works on phonetics......point out the close connection of **Svarbhakti** with a succeeding fricative, stating that Svarbhakti occurs after, V or l when they are followed by a fricative e g. darsa-will be pronounced as darisa, arha-Ariha etc. Siddheshwar Varma, *Critical studies in the phonetic observations of Indian Grammarians.* p. 133,

३. **Ablant or Vowel gradation.**

४. निरुक्तम्, २।१-२

भगवता पतंजलिनापि ध्वनिपरिवर्तनस्य कारणानि निर्दिष्टानि वर्णव्यत्ययः वर्णापायः, वर्णोपजनं, वर्णविकारः। वर्णव्यत्यया पायोपजनविकारेषु ... ... वर्णव्यत्यये कृतेस्तर्कः, कसेः सिकताः, हिंसेः सिंहः, अपायो लोपः। घ्नन्ति घ्नन्तु, अघ्नन्... ... उपजन आगमः, सविता। लवितुम्। ... ... विकार आदेशः। घातयति घातकः।

काशिकायामपि पृषोदरादीनि यथोपदिष्टमितिसूत्रविश्लेषणपुरस्सरम् एतत् सुचिन्तितं तिष्ठति—वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ। धातोस्तदर्थातिशयेन योगस्तदुच्यते पंचविधं निरुक्तम्[१]। एतस्य व्याख्यानक्रमेणाह न्यासकारः जिनेन्द्रबुद्धिः—निरुक्तशास्त्रे ये शब्दा व्युत्पाद्यन्ते तेषां पृषोदरादित्वादेव साधुत्वमिष्यत इतीमं श्लोकमाह—वर्णागम इत्यादि। अपूर्वस्य वर्णस्यागमो वर्णागमः–नकारादेरपूर्वस्य प्राप्तिः, यथा कौ जीर्यते कुंजर इति। अत्र कुशब्दस्य नुगागमः क्रियते। वर्णविपर्ययः वर्णस्थानव्यत्यासः यथा हिंसि हिंसायाम्, हिनस्तीति सिंह इत्यत्र पचाद्यचि कृते हकारसकारयोः स्थानव्यत्यासः। वर्णविकारः वर्णस्य रूपान्तरापत्तिः, वर्णनाशः वर्णस्य लोपः यथा पृषोदर इति। अत्र तकारस्य लोपः। अर्थातिशयः अर्थविशेषः, प्रसिद्धादर्थादर्थान्तरम्, तेन धातोर्योगः सम्बन्धः यथा मह्यां रौतीति मयूरः। अत्र रौतेःरमणेनार्थेनातिशयेन योगः। एतत् पंचविधं पंचप्रकारं निरुक्तम् निश्चयेनोच्यतेऽर्थोऽनेनेति निरुक्तम्[२]। अत्र पदमंजरीकारः—कौ जीर्यंत इति कुंजर इत्यत्र नकारस्य वर्णस्यागमः। हिनस्तीति सिंह इत्याद्यन्तयोर्वर्णयोर्विपर्ययो व्यत्यासः। षोड इत्यत्र षकारस्योकाररूपापत्तिः वर्णविकारः। पृषोदर इत्यादौ तकारादेर्वर्णस्य विनाशः। यस्य धातोर्योऽर्थः प्रसिद्धः, तस्मादर्थान्तरेण योगस्तदर्थातिशयेन योग इति। एतत् पंचविधं निरुक्तम्–निर्वचन–प्रकारः, शब्दानां तदन्तेन सूत्रेणोच्यत इति श्लोकार्थः[३]।

भाष्यस्य विचारसरणिमाश्रित्य भट्टोजिदीक्षितेन चोक्तम्—

भवेद्वर्णागमाद्हंसः सिंहो वर्णविपर्ययात्।
गूढोत्मावर्णविकृतेर्वर्णनाशात्पृषोदरम्[४] ॥

विवेचनेनानेन ज्ञायते यत् प्राचीनभारतीयभाषाशास्त्रज्ञैरपि ध्वनिपरिवर्तनस्य प्रवृत्तिविषये बहुशः चिन्तितमासीत्।

---

१ का०, ६।३।१०९
२. का०, ६।३।१०९
३. का०, पदमंजरी, (६।३।१०६)
४ सिद्धान्तकौमुदी, समासाश्रयप्रकरणम्

कात्यायनकालिकभाषायामपि ध्वनिपरिवर्तनस्य उदाहरणानि बहुशः अवलोक्यन्ते। पाणिनिसूत्रैः व्युत्पन्नानां संस्कृतशब्दानां ध्वनौ कालक्रमव्यवधानवशाद् यत् परिवर्तनं समागतं तत् आचार्यकात्यायनेन स्वकीयवार्तिकैः निर्दिष्टम् अत्र कतिपयानामेषां परिवर्तनानां विवेचनं प्रस्तूयते—

भा०— ऋकारऌकारयोः सवर्णविधिः (११६)

का०— ऋकारऌकारयोः सवर्णसंज्ञा वक्तव्या ,,

प्र०, सि०—ऋऌवर्णयोः मिथः सावर्ण्यं वाच्यम् ,,

तुल्यास्यप्रयत्नं सवर्णम्[1] इति सूत्रानुसारं ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्च इत्येतद्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात्। ऋवर्णऌवर्णयोः भिन्नस्थानत्वेन सवर्णसंज्ञायाः अप्राप्तया होतृऌकारः इत्यत्र इष्टस्य दीर्घस्य सिद्ध्यर्थम् ऋकारऌकारयोः सवर्णविधिः इति वार्तिकं भाष्ये पठितम् तदर्थः एव काशिकायां कौमुद्यां च उपर्युक्तवार्तिकं पठितमस्ति। ऋ इत्यस्य स्थानं वर्तते—ऋटुरषाणां मूर्धा ततः ऋ इति मूर्द्धन्यो वर्णः 'ऌतुलसानां दन्ताः' इति ऌकारस्य दन्त्यवर्णता, स्थानभिन्नतया उभयोः 'तुल्यास्ये' त्यनेन सवर्णसंज्ञा न भवति, होतृ ऌकारः इत्यवस्थायाम् 'अकः सवर्णे दीर्घः' इत्यनेन ऋ इत्यस्य ऌ इत्यस्य च स्थाने दीर्घः ॠ' इति न भवति अतः वार्तिकविधानेन समानवर्णत्वेन दीर्घसिद्धौ होतॄकारः इति। ऌवर्णस्य द्वादशभेदाः तस्य दीर्घाभावात् 'एकः पूर्वपरयोः' इत्यस्याधिकारः, अतः ऋ ऌ इत्युभयोः स्थाने ऌकार सवर्णी ऋकारो दीर्घः संजातः।

एवं प्रतीयते यत् पाणिनेः समये होतृऌकारः इत्येव प्रयुज्यमानः आसीत् कालान्तरे होतृ + ऋकारः—होतॄकार इत्यवलोक्य होत्ॡकारः इत्यनिष्टप्रयोगसंभावनया मुखसौविध्यदिशा होतॄकारः इति प्रयोगस्य सुखं प्रचलनहेतोश्च कात्यायनेन उक्त-वार्तिकस्य प्रणयनं विहितम्। इह होतृ + ऋकारः—होतॄकारः इति सादृश्यात् होतृ + ऌकारः इत्यत्रापि होतॄकारः इति प्रयोगः सादृश्येन ध्वनिपरिवर्तनस्य सूचकः।

भा०—वयस्यचरमे (४।१।२०)

का०—वयस्य चरम इति वक्तव्यम (भाष्यव्याख्यानम्) ,,

प्र०—वयस्यचरमे इति वाच्यम् ,,

सि०—वयस्य चरम इति वाच्यम् ,,

अन्त्यभिन्ने वयसि अदन्तकूटचिरण्टशब्दात् स्त्रियां ङीप् भवति। ये त्रीणि वयांसि इच्छन्ति तन्मते इदं वार्तिकम्। त्रीणि वयांसि वर्तन्ते, यथा—

---

१. अष्टाध्यायी, १।१।९

पिता रक्षति कौमारे भर्ता रक्षति यौवने।
पुत्रश्च स्थविरे भावे न स्त्रीस्वातन्त्र्य मर्हति[1]॥

यदा तु उपचयापचयलक्षणे द्वे एव वयसीतीच्छन्ति केचन वर्द्धते यास्त्व-पचयवत्योऽवस्थास्ताः सर्वाराशीकृत्य द्वितीयं वयः तथा चोक्तम्—वर्द्धते यावदङ्गेन तावद् वृद्धितव्यं पश्चादपायेन योक्ष्यते[2]। तदा वार्तिकं विफलम् यौवनस्यापि प्रथमवयःपदेन ग्रहणात्। उदाहरणम् —वधूटी, चिरण्टी, वधूटशब्दस्य चिरण्टशब्दस्य यौवनवाचित्वे सति 'वयसि प्रथमे' इति सूत्रेण अप्राप्तस्य ङीपः विधानाय वार्तिकमिदम्। वधूटी इत्यस्यार्थः वर्तते-वहति पुरुषभारं सहते वा इति वधूटी, चिरं पतिगृहं परित्यज्य व्यभिचाराय इतस्ततः अटति भ्रमतीति चिरण्टी, चिरेण अटति पितृगृहात् भर्तृगेहम् अथवा यौवनवत्यां पितृगेहस्थायां स्त्रियामपि चिरण्टी[3]।

वधूटीचिरण्टीशब्दौ आगमप्रागुपजनस्य (**Prothesis**) अन्तव्यंजनस्य अक्षरागमस्य उदाहरणत्वेन तिष्ठतः। वधूः इति तथा चिरण्टशब्दयोः 'टी' इति व्यंजनाक्षरस्य आगमः संजातः तिष्ठति। प्राकृतभाषायां 'ड़ो', 'ड़ी' सदृशाः स्वार्थे प्रत्ययाः सम्भवत। आसन् ये अपभ्रंशभाषायां स्पष्टतः उपलभ्यन्ते - 'टोड.'। संस्कृते अयमेव 'ड' इति 'ट' इत्यस्मिन् परिवर्तितः अवधीकाव्ये—

"पियसौं कहेउ सन्देशड़ा हे भौरा काग !"

हेमचन्द्रेणापि लिखितम्—अद्धा पडि आ बलिअड़ा अद्धा फुट्टि तड़त्ति।

अन्त्रम् इत्यस्मिन् अर्थे अपभ्रंशे अन्त्रड़ी इति तिष्ठति। इयमेव अन्त्रड़ी अन्त्रटिका-अन्त्रटी इति संस्कृते लभ्यते तथैव वधूटी->बहुरी->बहूड़ी->बहुरिया।

भा०, प्र०, सि० —ऋते च तृतीया समासे (६।१।८६)

का०— ऋते च तृतीया समासे वर्णाद् वृद्धिर्वक्तव्या ,,

अत्र आदिति, वृद्धिरिति, अचीति चानुवर्तते। तृतीयासमासे अकाराद् ऋतशब्दावयवेऽचि परे पूर्वपरयोरचोः वृद्धिरेकादेशः भवेदित्यर्थः। सुखार्त.

---

१ आषोडशाद्भवेद्बालो यावत्क्षीरान्नवर्तकः।
मध्यमः सप्ततिर्यावत्परतो वृद्ध उच्यते॥
काशिका, न्यासः ४।१२

२. काशिकान्यासः, ४ १२

३ वाचस्पत्यम्, **A** woman married or single who continued to reside after maturity in her father's house, **A** young woman (in genarel.) *Skt. Eng. Dict., V. S. Apte.*

'प्रकृत्यादिभ्यः उपसंख्यानम्'[१] इति तृतीया, ऋत इति ऋत गतौ इत्यतः 'गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्चेति'[२] सूत्रेण कर्तरिक्तप्रत्यये, 'सुप।' इति समासे सुख ऋत इति स्थितौ वृद्धिः सुखार्तः इति बालमनोरमायां प्रदर्शितम् । वस्तुतः अत्र सुखेनेति कर्तरि तृतीया ऋत इति कर्मणि क्तः । सुखकर्तृ-कप्राप्तिकर्मीभूतः सुखविशिष्ट इति फलितोऽर्थः । एवमेव दुःखार्तः । समासे इति यदि न वाच्यम् तदा परमश्चासौ ऋतः परमर्तः इतिवत् दुःखर्तः, सुखर्तः इति भविष्यति । लोके सुखार्तः दुखार्तः इति प्रयोगमवलोक्य कात्यायनेनेदं वार्तिक-मुपसंख्यानम् । पाणिनिनियमेन सुखेन गच्छति दुःखेन गच्छति इत्यर्थे आद्गुणः'[३] इत्यनेन गुणे सुखर्तः, दुःखर्तः इति स्यात् ।

एवं प्रतीयते यत् यथा परमर्तः भवति तथैव सुखर्तः इत्यपि पाणिनिकालिक-भाषायाम् व्यवहृतमासीत् किन्तु कालान्तरे दुःखार्तः, सुखार्तः, पीडार्तः इत्यादि-प्रयोगाः भाषायां प्रचलिताः तदर्थमेव प्रकृतमुपन्यस्तम् । वार्तिके 'समासे' इति तिष्ठति सति एवमेव प्रयोगः स्यात्, तात्पर्यमिदं यत् पाणिनिना क्वापि तृतीयासमासे सुखार्तः इत्यादि प्रयोगः भविष्यति इति न संकेतितम्, अतएव भाष्यकारेण उपसंख्यानवार्तिकत्वेन वार्तिकस्यास्य निर्देशः विहितः । अत्र वृद्धिध्वनिसमन्वितम् मात्रात्मिकापश्रुतिदिशाध्वनिपरिवर्तनं[४] लक्षितम् ।

भा०—	सोऽपदादावनव्ययस्य	(८।३।३८)
का०—	सोऽपदादावित्यनव्ययस्येति वक्तव्यम्	,,
प्र०—	—	
सि०—	अनव्ययस्येति वाच्यम्	,,

पाशकल्पककाम्यच्सम्बन्धिनो अपदादयोः कवर्गपवर्गयोः परयोः विसर्जनीयस्य स स्यात् इत्यर्थकेन 'सोऽपदादौ'[५] इति सूत्रेण ईषदसमाप्तं प्रातः कल्पम् इत्यत्रापि विसर्गस्य सत्वं स्यात् अतः सोऽपदादावनव्ययस्येति वार्तिकं प्रस्तौति कात्यायनः

१. अष्टा०, वा०, २।३।१८

२. अष्टा०, ३।४।७२

३ अष्टा०, ६।१।८७

४. The Sanskrit Grammarians have only noticed the quantitative ablant in गुण (Guna) वृद्धि (Vridhi) and सम्प्रसारण (Samprasarana) Dr. S. K. Chatterjee P. D. Gune, *Comp. phil,* p. 54 इत्यत्रोद्धृतम् ।

५. अष्टा०, ८।३।३८

तथा चायमर्थः लभ्यते अव्ययसम्बन्धिनः विसर्गस्य स्थाने सत्वं न भवति । उदाहरणम् —प्रातः कल्पम् अत्र विसर्गस्य अव्ययसम्बन्धित्वेन सत्वं न जातम् । एवमेव पुनः कल्पम्, अन्तः कल्पम् इत्यादीनिरूपाणि ।

सम्भवतः पाणिनेः समये प्रातस्कल्पम्, पुनस्कल्पम्, अन्तस्कल्पम्, इत्यादि-प्रयोगाः भाषायां प्रचलिताः आसन् । किन्तु कालान्तरे प्रातः कल्पम्, पुनः कल्पम् अन्तःकल्पम् इत्यादयः विसर्जनीयध्वनिविशिष्टाः प्रयोगाः भाषायां समागताः एतदर्थमेव कात्यायनेन वार्तिकस्यास्य रचना विहिता ।

अत्र एकमपरमपि तथ्यं ध्येयम् । प्राचीनसंस्कृतभाषा निसर्गध्वनिः, रध्वनिः, सध्वनिश्च इति त्रयो एव ध्वनयः परस्परं परिवर्तिताः भवन्ति । मूलतः सर्वेषामेषां प्रकृतिः एकसदृश एव तिष्ठति । अतः त्रयोऽपि परस्परं विनिमयं प्राप्नुवन्ति— Interchangeable वर्तन्ते । यदि विसर्गानन्तरं क्, ख्, ध्वनी समायातः तदा— जिह्वामूलीयः ⌣ ध्वनिः सम्भाव्यते— प्रातस्कल्प→प्रातः कल्प→ प्रात ⌣ कल्प । प्रातर् कल्प, प्रात⌣कल्प इति उच्चारणे वक्ता काठिन्यमनुभविष्यति, उभयत्र मुखसुखस्य अभावः स्थास्यति । पाणिनिकाले प्रातस्कल्प इत्येव प्रयोगे अवशिष्टः किन्तु शनैः शनैः भाषायां प्रातः कल्प इति सध्वनिविरहितः विसर्गध्वनियुक्तः प्रयोग एव प्रचलने अवस्थितः यमभिलक्ष्य कात्यायनः 'सोऽपदादावनव्ययस्य' इति वार्तिकं समुपस्थापितवान् ।

एतद्विपरीता स्थितिः पुरस्कारशब्दे परिलक्ष्यते । पुरः कार— पुरस्कार इत्यत्र पुरस्कार एवावशिष्टः । पुरस्कार इत्यत्र यः विसर्गः तिष्ठति स वस्तुतः स् इत्यस्य स्थानापन्नः न तु र् इत्यस्य । प्रातः कल्पम् इत्यत्र 'प्रातर्' इति र् विशिष्टः विसर्गः→प्रातः । यत्र पाणिनिना मूलतः स्विशिष्टः विसर्गः स्वीकृतः तत्र स्ध्वा युक्त एव प्रयोगः स्थास्यति–पुरस्कार इति किन्तु यत्र पदान्तर्स्थाना-पन्न विसर्गः स्थास्यति प्रातर् कल्प→प्रातः कल्प इति तत्र र्ध्वनेः व्यञ्जनत्वं लुप्तं सत् केवलं विसर्गत्वादेशं प्राप्स्यति विशिष्टेषु प्रातः कल्पम्, पुनः कल्पम्, अन्तः कल्पम् इत्यादिषु प्रयोगेषु ध्वनिसम्बन्धिवैशिष्ट्यमिदं निरीक्ष्य भगवता कात्यायनेन प्रकृतवार्तिकस्योपस्थापनं कृतम् ।

भा० का०—	चयो द्वितीयाः शरि पौष्करसादेः	(८।४।४८)
सि० कौ०—	चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्	(८।१।२८)
प्र० —	शरि परेपौष्करसोदेर्मते न चयो द्वितीयाः स्युः ।	

'ङणोः कुक्टुक्शरि'[1] इत्यनेन ङकारणकारयोः शरि कुक्टुकौ आगमौ भवतः विकल्पेन, तद्यथा—प्राङ् षष्ठः इत्यत्र सूत्रेणानेन ङ--कारस्य कुगागमे, अनुबन्ध-लोपे प्राङ्क्षष्ठः, विकल्पे—प्राङ् षष्ठः, एवमेव प्राङ्क्शेते, प्राङ्शेते, सुगणट् षष्ठः, सुगण् षष्ठः एवमेव वणट् शेते वण् शेते इति । किन्तु पाणिनेरनन्तरका-लिकभाषायां प्राङ्ख्शेते इत्यादिरूपपरिवर्तनं संजातं यदवलोक्य पौष्करसादेराचार्यस्य सिद्धान्तमुपस्थापयन् कात्यायनः चयो द्वितीयाः शरि पौष्करसादेरिति वार्तिकं प्रस्तुतवान् । प्राङ्क्शेते इत्यवस्थायां चय्प्रत्याहारघटितरूपस्य द्वितीयाक्षराणि भवन्ति—पौष्करसादेराचार्यमतेनेत्यर्थपरकेन वार्तिकेनाकेन क् इत्यस्य ख् कृते प्राङ्ख् शेते इति सिद्ध्यति । तथैव तकारस्य थकारे कृते वत्सः इत्यस्य वथ्सः ककारस्य खकारे ख्षीरम्, पकारस्य फकारे अफ्सराः इत्यादयः प्रयोगाः निष्पद्यन्ते ।

काशिकायाः पदमञ्जर्याख्यव्याख्याकर्त्रा हरदत्तेन चयो द्वितीयाः इत्यस्य स्थाने 'खयो द्वितीयाः' इति पठितम् तन्न समीचीनमेवंप्रयोगाणामदर्शनात् ।

उपर्युक्तप्रयोगेषु क्-ट्-प्रभृतयः अल्पप्राणध्वनयः ख्-ठ्-प्रभृतिषु महाप्राणध्वनिषु विलीनाः भवन्ति । समीकरणद्वारा अल्पप्राणध्वनीनां महाप्राणध्वनिषु परिवर्तन-स्येमानि उदाहरणानि ।

भा०—	वा शर्प्रकरणे खर्परेलोपः	(८।३।३६)
का०—	खर्परे शरि वा लोपो वक्तव्यः	,,
प्र०—	खर्परे शरि वा विसर्गलोपः	,,
सि०—	खर्परे शरि वा विसर्गलोपो वक्तव्यः	,,

खर्परो यस्मादिति बहुव्रीहिः, परग्रहणसामर्थ्यात्, न तु कर्मधारयः, अन्यपदार्थश्च शर् एव । खर् अस्ति परे यस्य एवंभूतो यः शर् तस्मिन् परे सति विसर्गस्य लोपः जायते इति वार्तिकार्थः । 'शरि परे सति विर्गस्य स्थाने विकल्पेन विसर्ग एव भवति' इत्यर्थकेन 'वा शरि'[2] इति पाणिनीयसूत्रेण ज्ञायते यत् तत्समये भाषायां रामः स्थाता, रामस्स्थाता, वृक्षः शेते, वृक्षश्शेते, वृक्षः षण्डे, वृक्षष्षण्डे वृक्षा स्थातारः वृक्षास्स्थातारः इत्यादिरूपाणि प्रचलितानि आसन् किन्तु कात्यायन-काले एकं नवीनमपि रूपं विसर्गविहीनं भाषायां समागतं—यथा रामः स्थाता, रामस्स्थाता, इति तु आसीदेव राम स्थाता इत्यपि प्रचलितम्, वार्तिकस्य विकल्पपक्षे रामः स्थाता, रामस्थाता इत्यपि रूपं भवति ।

---

१. अष्टा०, ८।३।२८
२. अष्टा०, ८।३।३६

अत्रेदं स्पष्टं यत् पूर्वं रामस्थाता इति रूपं प्रचलितमासीत् किन्तु तदनन्तरम् उच्चारणसौकर्याय रामः स्थाता इत्यपि प्रयोगे समागतम्। कालान्तरे कात्यायनकाले पुनरपि उच्चारणलाघवाय विसर्गविरहितं रामस्थाता, वृक्षा स्थातारः प्रभृति एक-ध्वनिविरहितानि रूपाणि समागतानि। यच्च समाक्षरलोपदिशा[1] ध्वनिपरि-वर्तनेन परिवर्तितस्यापरस्य रूपस्यद्योतकानि तिष्ठन्ति। परिवर्तनमिदं निरीक्ष्य एव वार्तिकविधानं कृतमस्ति। रामस्स्थाता, रामस्थाता इत्युभयत्र उच्चारणे-स्स्थ स्थ-इत्यत्र कोऽपि भेदः न लभ्यते। यतः उभयत्र प्रथमव्यञ्जनध्वनेः स् इत्यस्य अभिनिधानं (Holding up) क्रियते। स्स्थ, स्थ इत्युभयत्र उच्चारणमेक-सदृशमेव तिष्ठति। स्विरहितः रामः स्थाता इति प्रयोगस्तु वर्तनी इत्यर्थं-लिप्यङ्कन-हेतोः तिष्ठति तथा चायं वैकल्पिकः प्रयोगः (Variant) वर्तते।

भा०—	इतौ अनेकाच् ग्रहणम्	(६।१।९८)
का०—	अनेकाच इति वक्तव्यम्	"
प्र०—	एकाचो न	"
सि०—	एकाचो न	"

एकाचः अव्यक्तानुकरणस्य इतौ परे पररूपं न भवेदित्यर्थः। यद्यपि भाष्ये इतौ अनेकाच् ग्रहणमिति वार्तिकं पठितं तथापि लाघवानुरोधेन एकाचो न इति प्रक्रिया-कौमुद्यां सिद्धान्तकौमुद्याञ्चोक्तम्।

क्वापि पट्, पट्, पट् एवं ध्वनिं श्रुत्वा पट्त इति अनुकृतं पररूपे सति 'ट' सदृशमेव अत् भागः संजातः अतः पटिति इति रूपं निष्पन्नं किन्तु स्रदिति इत्यत्र पररूपं न जातं यतः स्रति ध्वनेरनुकरणे अनेकाच्त्वं नास्ति। कुत्रापि सुर् सुर् ध्वनिं कुर्वन् कश्चित् खादतिस्म तस्य स्रत इति केनाप्यनुकृतं, ततः इति शब्दे परे स्रति अनेकाच्त्वाभावात् पररूपाभावे पटिति इतिवत् स्रिति इति रूपं न संजातम्। कात्यायनस्य काले जनाः लक्षणैकचक्षुष्काः अभवन्, अतः अव्यक्तानुकरणस्यात इतौ'[2] इति सूत्रेण पररूपे कृते पटत् इति पटिति इति सादृश्यात् स्रत् इति स्रिति इति रूपं जनाः न वदेयुः, एतदर्थमेव वार्तिकस्यास्य विधानं कृतमिति।

---

1. Haplology is a name given by bloomfield to the phenomenon where of two similar syllables following each other, one is dropped The condition for haplology is that one sound at any rate on the two consecutive syllables must be common.

Comp. Phil, P—61

२. अष्टा०, ६।१।९८

भा० (१)	ऋति ऋ वा वचनम्	(१।१।६)
का०—	सवर्णदीर्घत्वे ऋति ऋ वा वचनम्	(६।१।१०१)
प्र०—	ऋतिसवर्णे ऋ वा	„
भा०, का० (२)	ऌति ऌ वा वचनम्	(१।१।६)
प्र०—	ऌति ऌ वा	„
सि०—	ऌति सवर्णे ऌ वा	„

तुल्यास्यप्रयत्नं सवर्णम् इति सूत्रे 'ऋकारऌकारयोः सवर्णविधिः'[२] इति वार्तिकस्य व्याख्यानावसरे भाष्ये तिष्ठति वक्ष्यत्येतत्-'सवर्णदीर्घत्वे ऋति ऋ वा वचनम्' 'ऌति ऌ वा वचनम्' इति। एतेन ज्ञायते यत् 'अकः सवर्णे दीर्घः'[३] इति सूत्रोपरि उभे वार्तिके तिष्ठतः, ययोः संकेतः भाष्य कारेणात्र प्रदत्तः यद्यपि 'अक. सवर्णे दीर्घ.' इति सूत्रोपरि अपि भाष्यव्याख्यानं नास्ति। संभवतः भाष्यव्याख्यानमेतत केनापि प्रकारेण विनष्टं तिष्ठति। अतएव काशिकादिषु वार्तिकयोरनयोः परिगणन तिष्ठति।

'अकः सवर्णे दीर्घः' इत्यनेन अकः स्थाने सवर्णे अचि परे पूर्वपरयोः स्थाने एकदीर्घादेशः भवति किन्तु होतृ-ऌकारः इत्यवस्थायां सावर्ण्याभावे दीर्घत्वस्य प्राप्तिः न भवति तथा होतृ+ऋकारः इति स्थितौ नित्यदीर्घः भवति। कात्यायनः भाषायाम् उभयविधं रूपं विलोक्य 'ऋति ऋ वा वचनम्'। 'ऌतिऌ वा वचनम्' इति वार्तिकद्वयं प्रणीतवान्। अकः परस्मिन् सवर्णे ऋति परे 'ऋ' आदेशो भवति विकल्पेन–होतृ+ऋकारः—होतृकारः पक्षे होतॄकारः। प्रयत्नलाघवजन्यस्य दीर्घस्य ऋध्वनेः स्थाने ह्रस्वस्य ऋध्वनेरपि प्रयोगः भाषायां समागतः। इदं समीकरणस्य प्रक्रियानुरूपम्।

एवमेव ऌति ऌ वा वचनम्' इत्यस्यार्थः ऌति सवर्णे परतः ऌ भवति विकल्पेन। पाणिनेः नियमानुसारं ऋकारऌकारयोः परस्परं सावर्ण्याभावात् केवलं होतृऌकारः इत्येव प्रयोगः सम्भवति। किन्तु कात्यायनानुसारं होतृऌकारः तथा होतृकारः इति उभयविधं रूपं भवति। प्रायः कात्यायनकाले जनभाषायां दीर्घ-ह्रस्वयोरुभयोः प्रयोगः सम्भवति स्म। एवम् उभयविधं प्रयोगं निरीक्ष्य वार्तिक-कारेणायं नियमः कृतः। इदं तथ्यं भाषायाः सरलीकरणस्य प्रक्रियायाः सूचकं यत् प्रयत्नलाघवात् सम्भूतमस्ति। इहापि समीकरणस्य प्रक्रियानुरूपमेव ध्वनिपरि-वर्तनम्।

---

२. महा०, वा०, १।१।९

३. अष्टा०, ६।१।२०१

पाणिनेः 'तुल्यास्येति' नियमानुरूपम् ऋ-ऌ-वर्णयोः परस्परं सावर्ण्यानुपपत्तेः होतृ+ऌकारः इत्यत्र सवर्णदीर्घस्य प्रश्न एव नोत्तिष्ठति परन्तु कात्यायनसमये ऋवर्णः ऌवर्णश्च सवर्णत्वेन व्यवहृतौ आस्तामत एव वार्तिककारेण 'ऋकारऌकारयोः सवर्णविधिः' इति विधानं कृतम्। इदानीं होतृ+ऌकारः एतस्मिन्नपि स्थले सवर्ण दीर्घप्राप्तिः भवितुं शक्येत यस्य निषेधाय ऌति सवर्णे ऌ वा इति वार्तिकमुपस्थापितम्। अनेन इदमपि ज्ञायते यत् वार्तिककारस्य समये दीर्घस्य 'ॠ' इत्यस्य सादृश्येन दीर्घस्य ॡ इत्यस्यापि प्रयोगः संचलितः अभविष्यत्, यं समुचितं न मत्वा प्रकृतवार्तिकस्य प्रणयनं विहितम्।

उभयोः वार्तिकयोः विषये इयं शंका समुदेति यत् संज्ञाशब्दस्यार्द्धमात्रिकत्वेन ऋति सवर्णे लोपो वा, ऌति सवर्णे लोपो वा इति वार्तिकस्वरूपाभिधानेन ऋकार-ऌकारयोः वैकल्पिकलोपे होतृकारः, होतृकारः होतृऌकारः होतृकारः इति रूपचतुष्टयं सेत्स्यत्येव इति उभयोर्विधानं व्यर्थमेव स्यात्। तद्द्वयं व्यर्थीभूय ज्ञापयति यत् अपूर्वविधानमेतत्। तद्यथा ऋति ॠ वा, ऌति ऌ वा इत्युभयत्रापि विधेयं वर्णद्वयं द्विमात्रम्। आद्यस्य ऋकारस्य मध्ये द्वौ रेफौ, तयोः एका मात्रा अभितः उभयतः ऋकारौ अज् भक्तेः अपरा (एका) मात्रा द्वितीयस्य ऌकारस्य मध्ये द्वौ लकारौ तयोः एका मात्रा अभितः ऌकारौ अज्भक्तेः अपरा मात्रा। एवं विलक्षणम् ऋकारऌकारविधानार्थम् एतद्वार्तिकद्वयं प्रणीतम्।

भा०—	भियः क्रुकन्नपि	(३।२।१७४)
का०—	क्रुकन्नपि वक्तव्यः	,,
प्र० सि०—	क्रुकन्नपि वाच्यः	,,

'ञिभी भये' इत्यस्माद्धातोः तच्छीलादिषु कर्तृषु क्रुक्लुकनौ प्रत्ययौ जायेते इत्यर्थके 'भियः क्रुक्लुकनौ' इति सूत्रे क्रुकन्प्रत्ययोऽपि वाच्यः इति वार्तिकार्थः। उदाहरणम्—भीरुकः-बिभेति तच्छीलः इति भीरुकः-भीधातोः प्रकृतवार्तिकेन क्रुकन् प्रत्यये अनुबन्धलोपे भीरुकः इति।

'भियः क्रुक्लुकनौ'[1] इति सूत्रेण क्रुक्प्रत्यये च कृते भीरुः, भीलुकः इति रूपं भवति किन्तु कालान्तरे 'रलयोरभेदः' इति नियमानुरूपं भीलुकः इत्यस्य स्थाने भीरुकः इत्यपि रूपान्तरं भाषायां प्रयोगे समागतं यस्य सिद्धये प्रकृतस्य विधानम्। एवं विषमीकरणदिशानुरूपं लध्वनेः रध्वनौ परिवर्तनेन भाषायां भीरुक-मिति रूपं प्रचलितम्।

१. अष्टा०, ३।२।१७४

भा०— रोः काम्ये नियमार्थम् (८।३।३८)
का०— „
प्र०— —
सि०— काम्ये रोरेवेति वाच्यम्

काम्यच्प्रत्यये परे रोरेव विसर्गस्य सत्वं भवति। नियमार्थम् इत्यनेन ज्ञायते यत् रोरेव विसर्गस्य सत्वं भवति नान्यस्येति वार्तिकार्थः, तथा च गोः काम्यति' इत्यत्र रूस्थानिकविसर्गस्य अभावेन सत्वं न भवति। पयस्काम्यति, यशस्काम्यति इतिवदेव पाणिनिसमये गीस्काम्यति, धूस्काम्यति इत्यादीनिरूपाण्यपि प्रायः प्रचलितानि भवेयुः, किन्तु कात्यायनकालिकभाषायां गीः काम्यति, धूः काम्यति, पूः काम्यति इत्यादिविसर्जनीयध्वन्यन्वितः प्रयोगव्यवहारः संजातः तन्नियमार्थमेव वार्तिकमिदं सृष्टम्।

भा०, का०— वा प्रकरणे गिरिनद्यादीनामुपसंख्यानम् (८।४।११)
सि०— गिरिनद्यादीनां वा „

'वा भावकरणयोः' इत्यस्मिन् वा प्रकरणे गिरिनदीप्रभृतीनां योनकारस्तस्य णत्वप्रतिपादनं कर्तव्यम्। पदमंजरीकारः संज्ञायां प्राप्ते, असंज्ञायामप्राप्ते–इत्युभयत्रविभाषेयमित्याह।

उदाहरणम्— गिरिणदी–अत्र नस्य प्रकृतेन णत्वे गिरिणदी, णत्वविकल्पपक्षे गिरिनदी। एवमेव चक्रणितम्बा, चक्रनितम्बा। अत्र दन्त्यः 'न'–ध्वनिः मूर्धन्यणध्वनौ परिणमति।

पाणिनिकालवदेव कात्यायनकालेऽपि वनपर्वतनदीनां नामसु नकारस्य स्थाने णकारस्योच्चारणं भवति स्म। गिरिणदी, चक्रणितम्बा, इमे नद्यौ पाणिनिकालतः अनन्तरकालीने वर्तेते अथवा ययोः चर्चा पाणिनिनाम कृता अतः तयोः उल्लेखं प्राप्य कात्यायनेन अनयोः रूपसिद्धिः प्रस्तुता। इदमपि सम्भाव्यं यत् पर्वतीयाः नद्यः गिरिणदीशब्देन व्यवहृताः आसन् यासां कृते गिरिणदी— गिरिनदीति उभयरूपं प्रयुक्तमासीत्। एवमेव चक्रनितम्बा-चक्रणितम्बा-नदी इति लाक्षणिकप्रयोगः, यथा च मेघदूते विवृतजघना नदी कालिदासेन वर्णिता तथैव चक्रणितम्बा इति प्रयोगः। शुक्लयजुर्वेदस्य वाजसनेयिप्रातिशाख्यानुसारं दन्त्यस्य मूर्धन्यापत्तिर्नतिः कथ्यते। दन्त्यस्य नकारस्य पूर्वपदस्थरेफप्रभावात् मूर्धन्यापत्तिः नतिः भवति (Retroflexion of the Dental न due to र)। गिरिणदी, चक्रणितम्बा इत्यादिषु प्रयोगेषु गिरिनदी—इत्यत्र नदी इत्यस्य नध्वनितः पूर्वं गिरि इत्यस्य र्ध्वनिः वर्तते, तस्यैव र्ध्वनेः प्रभावात् मूर्धन्यापत्तिः—गिरिणदी इति।

पाणिन्युपज्ञम्	कात्यायनोपज्ञम्
गिरिनदी	गिरिणदी
चक्रनितम्बा	चक्रणितम्बा
आम्रवनम्	आम्रवनम्

'वरणादिभ्यश्च'[1] इति सूत्रेण वीरणावतीनामिकायाः नद्याः ज्ञानं लभ्यते तथैव कात्यायनकालेऽपि गिरिणदी चक्रणितम्बेति रूपं समागतं यत्रूपपरिवर्तनं ध्वनिजन्यं वर्तते।

भा०, सि०, प्र० प्र०— लोकस्य पृणे (६।३।७०)

का०— लोकस्य पृणे मुम् वक्तव्यः ,,

पृणशब्दे उत्तरपदे सति लोकशब्दः मुमागमं प्राप्नोति। पृणातीति पृणः, मूलविभुजादिषु चेति[2] कप्रत्यये लोकस्य पृणः इति विग्रहे प्रकृतेन मुमागमे लोकम्पृणः इति रूपम्। इह लोकपृणयोर्मध्ये 'म'ध्वनेरागमात् लोकम्पृणः इति लोकस्य पूरकमित्यर्थे भाषायां संजातं रूपपरिवर्तनम् आगमात् संभूतं ध्वनिपरिवर्तनं संसूचयति। इदं Spontaneous Nasalization कथयितुं शक्यते। वस्तुतः अयं प्रयोगः अलुक् समासस्य तिष्ठति। विशिष्टप्रकारकोऽयं प्रयोगः। पाणिनिकाले तदनन्तरं वा लोकम् पृणः इत्यत्र लोकं पदस्य अनुस्वारः लुप्तः संजातः आहोस्वित् एतस्य वक्ता एव दुर्लभः समभवत्। भविष्ये जनाः अन्यविग्रहयुक्तं लोकाय पृण लोके पृणः इति प्रयोगं न कुर्युः एतस्य स्पष्टीकरणायापि वार्तिकस्यास्य विधानं तिष्ठति।

भा०, सि० — एकविभक्तावषष्ठ्यन्तवचनम् (भा० १।२।४४)
(सि० २।२।२)

'एकविभक्ति चापूर्वनिपाते'[3] इति सूत्रे षष्ठ्यन्तं विहाय उपसर्जनसंज्ञा भवति इति निवेशः वार्तिकेनानेन विधीयते। पिप्पल्याः अर्धम् इति विग्रहे 'अर्धं नपुंसकम्'[4] इत्यनेन समासे अर्धशब्दस्य पूर्वप्रयोगे सति 'एक विभक्तिचापूर्वनिपाते' इति विग्रहे नियतविभक्तिकपिप्पलीशब्दस्य उपसर्जनसंज्ञायां पिप्पल्याः पूर्वप्रयोगे

१. अष्टा०, ४।२।८३
२. कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम्, महा०, वा० ३।२।५
३. अष्टा०, १।२।४४
४. ,, २।२।२

निषिद्धे 'गोस्त्रियोरुपसर्जनस्य'[1] इति ह्रस्वत्वे 'अर्धपिप्पलि' इत्येवं प्रयोगः स्यात् किन्तु कालान्तरे अर्धपिप्पली इति दीर्घ-'ई'-ध्वनिघटितमुच्चारणं विलोक्य कात्यायनेन प्रकृतस्य विधानं कृतम्। इदं रूपपरिवर्तनम ध्वनिपरिवर्तनजन्यम्। युवतिः→युवती इत्यादिवत् ह्रस्वेकारस्य दीर्घेकारोच्चारणमूलकमत्र ध्वनिपरिवर्तनम्।

भा०—	इत्येनभ्याशस्य	(६।३।७०)
का०—	इत्येनभ्याशस्य मुम् वक्तव्यः	,,
सि०—	इत्येनभ्यासस्य	,,

अनभ्यासं दूरम्, इत्यं—गन्तव्यम्, इत्यस्य समासः। 'एतिस्तुशास्वृदृजुषः क्यप्'[2] इति क्यपि तुगागमे च इत्यः इति। अनभ्यासशब्दात् मुमागमः भवति इत्यशब्दे परे तिष्ठति। उदाहरणम्—अनभ्यासमित्यम्। अत्र प्रकृतेन मुमागमाभावे अनभ्यासेत्यमिति रूपं भवेत्। किन्तु दूरतः परिहर्तव्यमित्यर्थे भाषायामनभ्यासेत्ययोः मध्ये 'म'ध्वनेरागमेन अनभ्यासमित्यमिति रूपपरिवर्तनं विलोक्य वार्तिकस्यास्य निबन्धनं कृतम्। पूर्वम् अनभ्यासमित्यम् इत्यादयो प्रयोगाः पदबन्धरूपाः (Phrase) आसन् किन्तु कालान्तरे एकपदे परिवर्तिताः।

भा०—	अन्तोदात्ते जातप्रतिषेधः	(४।१।५२)
का०—	अन्तोदात्ताज्जातप्रतिषेधः	,,
प्र० सि०—	जातान्तान्न	,,

अन्तोदात्तात् क्तान्तात्, अदन्ताच्च बहुव्रीहेः स्त्रीत्वे ङीषः प्रतिषेधः विधेयः, इति वार्तिकार्थः। वार्तिकमिदं किम्प्रयोजनकमिति विवृण्वन् आह न्यासकारः—'अन्तोदात्ताद्बहुव्रीहेर्ङीषो विधाने जातशब्दान्तात् प्रतिषेधः स चान्तग्रहणादेव लभ्यते' इति नवक्तव्यम्। इहान्तग्रहणं न कर्तव्यमेव, विनापि तेन यथा 'वर्णादनुदात्तात्०' इत्यत्रानुदात्तान्तादिति विज्ञायते, तथेहाप्यन्तोदात्तादिति विज्ञास्यते। तदेवमर्थः क्रियते—अन्तोदात्त एव नित्यं बहुव्रीहिस्ततो यथा स्यात्, विकल्पेन योऽन्तोदात्तस्ततो माभूदिति। इह च दन्तजाता, स्तनजातेत्यत्र 'वा जाते' इति विकल्पेनान्तोदात्तत्वम्, अतोऽयं विधिर्न भविष्यति। अथवा—उत्तरसूत्रे (अस्वांगपूर्वपदाद्वेत्यत्र ४।१।५३) वाग्रहणमुभयोरपि योगयोः शेषः, व्यवस्थितविभाषा च, तेन जातशब्दान्तान्न भविष्यति। 'अस्मिस्तु व्याख्यानेऽन्तग्रहणं विस्पष्टार्थमेवेति वेदितव्यम्'[3]।

---

१. अष्टा०, १।२।४८
२. ,, ३।१।१०९
३. न्यासः, ४।१।५२ (काशिकायाम्)

जाता दन्ताः यस्याः इति विग्रहे बहुव्रीहिसमासे दन्तजातशब्देन 'बहुव्रीहेश्चान्तोदात्तात्'[1] इत्यनेन दन्तजाती इति रूपं पाणिनिदिशा भवतिस्म। प्रायः तदेव तात्कालिकभाषायां प्रचलतिस्म। किन्तु कालान्तरे 'इ' ध्वनिविरहितं तत्स्थाने 'आ' ध्वनिसमाविष्टं 'दन्तजाता' इति रूपं प्रचलितं, तदवलोक्य कात्यायनेनेह ङीषः निषेधः स्वीकृतः।

भा०— यरोऽनुनासिके प्रत्यये भाषायां नित्यवचनम् (८।४।४५)
का०— यरोऽनुनासिके प्रत्यये कर्तव्यम् ,,
प्र०— मयटि नित्यं वाच्यम् ,,
सि०— प्रत्यये भाषायां नित्यम् ,,

'यरोऽनुनासिकेऽनुनासिको वा'[2] इति सूत्रं केवलं अनुनासिकशब्दे परे पदान्तस्य यरः अनुनासिकः स्यात् इति विधानं प्रस्तौति किन्तु प्रत्ययावयवे अनुनासिकवर्णे परे सति यरः किं भविष्यति, एतस्य विषये न किंचिदपि विशेषं कथयति, एतदर्थमेव प्रकृतवार्तिकस्य विधानं। प्रत्ययावयवे अनुनासिके परे पदान्तस्य यरः नित्यमनुनासिकं करोतीदं वार्तिकम् भाषायाम्। शब्दोच्चारणे तत्प्रयुक्तानां ध्वनीनां परस्परं प्रभावनिष्पन्नं रूपं सञ्जायते। व्याकरणशास्त्रे सन्धिप्रकरणे एषैव प्रक्रिया दरीदृश्यते। अस्मिन्—तन्मात्रम्—वाङ्मयम् इत्युदाहरणे वक्ता कवर्णोच्चारणसमय एव कवर्णोत्तरमकारोच्चारणप्रयत्नप्रमुखो भवति। एतावता कवर्णोच्चारणसमये मुखविवरेण सार्द्धं नासिका विवरमपि विवृतं सञ्जायते। अतः कवर्णस्य ङवर्णस्फोटो भवति। तन्मात्रम्—तत् प्रमाणमस्य इत्यर्थे 'प्रमाणे-द्वयसज्दघ्नञ्मात्रचः'[3] इति सूत्रेण मात्रच् प्रत्यये यरोऽनुनासिकेऽनुनासिको वा 'इत्यनेन विकल्पेन अनुनासिककार्ये तन्मात्रं - तद्मात्रं (विकल्पपक्षे) इति रूपद्वयं स्यात् किन्तु वार्तिकमिदं नियमयति यत् केवलं तन्मात्रमिति रूपं भवेत्। एवमेव चिन्मयम्, वाङ्मयं, त्वङ्मयम् इत्यादिरूपसिद्धिः। भगवान् पतंजलिरपि वार्तिककारस्य समर्थनं विदधाति[4]।

प्रक्रियाकौमुदीकारेणात्र 'मयटि नित्यं वचनमिति वार्तिकं कृतं किन्तु तन्न समीचीनं यतः इदं न्यूनताबोधकं स्यात्, तन्मात्रम् इत्यादिमयड्व्यतिरिक्तप्रत्ययपर-कशब्दानां सिद्धिविषये एतद्वार्तिकं न प्रवर्तेत।

---

१. अष्टाध्यायी ४।१।५२
२. ,, ८।४।४५
३. ,, ५।२।३७
४. यरोऽनुनासिके प्रत्यये भाषायां नित्यमिति च वक्तव्यम्। महाभाष्यम्—८।४।४५

वार्तिकेनानेन ज्ञायते यत् कात्यायनपूर्वकालिके संस्कृते सामान्यतः प्रत्यय-विषयेऽपि अनुनासिकपरे पदान्तयरः स्थाने विकल्पेन अनुनासिकस्य प्रयोगः भवतिस्म परन्तु कात्यायनसमसामयिकसंस्कृतभाषायामनुनासिकप्रत्ययविषये नित्यमेव अनुनासिकविशिष्टरूपाणां प्रयोगः संजातः। वैदिकसाहित्येऽपि 'वाङ्मयम्' इति प्रयोगः मिलती[1], वार्तिकेऽस्मिन् 'भाषायाम्' इति कथनेन स्पष्टतः ज्ञायते यत् वेदव्यतिरिक्तायां लोकभाषायां केवलम् अनुनासिकघटितरूपमेव प्रचलितमासीत्। वाङ्मयमित्यत्र यतः मकारः अनुनासिक्यः वर्तते अतः तत्पूर्वं ककारस्यापि तत्प्रभावेण अनुनासिक्यव्ञ्जनोच्चारणं सञ्जातम्। इयन्तु वस्तुतः समीकरणस्य प्रक्रिया

वाक् + मयम्

ङ्म = वाङ्मयम्

वैदिकप्रयोगेषु द्विविधप्रयोगप्रचलनमासीत् किन्तु लोकभाषायां केवलं वाङ्मयम् तथा तन्मात्रम् इति प्रयोगः अवशिष्टः। कात्यायनः अनेन वार्तिकेन इदमेव स्पष्टीकरोति यत् तस्य समये वाँमयम् इति अतिरिक्तः वैदिकः प्रयोगः विलुप्तः।

भा०— रुविधावह्नो रूपरात्रिरथन्तरेषूपसंख्यानम् (८।२।६८)

का०— अह्नो रुविधौ रूपरात्रिरथन्तरेषूपसंख्यानं कर्तव्यम् ,,

सि०, प्र०— रूपरात्रिरथन्तरेषु रुत्वं वाच्यम् (८।२।६६)

रुविधौ अहन् इत्यस्य रूपरात्रिरथन्तरेषु परेषु सत्सु रुत्वस्य प्रतिपादनं विधेयमित्यर्थः। उदाहरणम्—अहोरूपम्—अह्नः रूपम्, अहोरात्रः—अहश्च रात्रिश्च, अहारथन्तरम्—अह इदम् अतः रथन्तरम् सामवेदमन्त्रं पठतु भवान् पूर्वाह्णे गेयं साम इत्युक्तेः। गतमहोरात्रिरेषा—भ्रमात् रात्रिं दिवं मन्यमानं प्रति कश्चिद् वक्ति अहर्गतं रात्रिः एषा इति। अहो रूपम्—अत्र प्रकृतवार्तिकेन अह्नः नकारस्य रुत्वे कृते तस्य उत्वे 'आद्गुणः'[2] इति गुणे अहो रूपम्। अह्न रात्रः इत्यत्र नकारस्य रुत्वे, उत्वे, गुणे अहोरात्रः, अत्ररात्रिशब्दाभावेऽपि 'एकदेशविकृतमनन्यवत्' इति परिभाषया एकदेशे विकृतमपि अन्यवत् न भवति यथा 'छिन्ने पुच्छे शुनि श्वैव नत्वश्वो नापि गर्दभः' इति व्यवहारात्।

---

१. यत्किंचिद्वाङ्मयम्, शतपथब्राह्मणः, १०।५।३४

२. अष्टाध्यायी, ६।१।८७

एषु प्रयोगेषु 'रोऽसुपि' इति सूत्रेण अहनः नकारस्थाने रत्वं प्राप्तमपवाद्य अनेन वार्तिकेन रुत्वविधानं कृतम्। यथा व्योमानि, सद्मानि, ब्रह्माणिप्रभृतिशब्दानां सादृश्यात् फलानि, वनानि, ज्ञानानिप्रभृतीनि रूपाणि प्रचलितानि तथैव अहन् रूपम् अस्यां स्थितौ 'रोऽसुपि'[1] इत्यनेन नकारस्थाने रत्वविधाने 'रोरी' त्यनेन पूर्वरेफलोपे 'ढ्रलोपे पूर्वस्य दीर्घोऽणः'[2] इत्यनेन अकारस्य दीर्घे अहारूपमिति स्यात्। तथैव अहारात्रः अहारथन्तरम् इति प्रयोगापत्तिरपि भवेत। समयानुसारं परिवर्तितानि अहोरूपम्,[3] अहोरात्रः,[4] अहो रथन्तरमित्यादिरूपाण्यवलोक्य कात्यायनेन वार्तिकस्यास्य विधानं कृतम्। एवमत्र 'आ' ध्वनिस्थानिकम् 'ओ' ध्वनिसमागमनं कात्यायनकालिकभाषायां ध्वनिपरिवर्तनस्य स्पष्टतः सूचकम्।

एतेन वार्तिकेन ज्ञायते यत् कात्यायनकाले भाषायाः सरलीकरणं प्रारब्धं विद्यते। शनैः शनैः विचित्राः जटिलप्रयोगाः समाप्तिं प्राप्ताः। यदा वयं य्, व्,ल् इत्यादिभिः सह ओध्वनिं प्रस्तुतं कुर्मः तदा कथं न अन्तःस्थ'र'वर्णस्य पूर्वमपि तमेव नियमं स्वीकुर्मः। भाषायाः स्वच्छन्दे प्रयोगविषये इहापि सैव प्रक्रिया प्रारब्धा तथा तामेव स्पष्टीकर्तुं वार्तिकमिदं प्रणीतं भवेत। इदन्तु ढ्रलोपे पूर्वस्य दीर्घोऽणः इत्यस्यापवादं सङ्केतयति।

भा०, का०, प्र०, सि० — आचार्यादणत्वं च (४।१।४९)

वार्तिके चशब्दः ङीषः आनुगागमस्येत्यर्थस्य च अनुकर्षणार्थः। तथा चायमर्थः फलति-आचार्यशब्दात् स्त्रीत्वविवक्षायां ङीषः, आनुगागमस्य च विधानं भवति तथा च णत्वस्य प्रतिषेधः जायते। आङ्पूर्वकात् चरेः 'चरेराङि चागुरौ'[5] इति वार्तिकेन गुरौ यतो निषेधात् आङ्युपपदे चरेर्गुरौ 'ऋहलोर्ण्यत्'[6] इति ण्यत्प्रत्यये, 'अत उपधायाः'[7] इति वृद्धौ आचार्य इति। मनुस्मृतिमते—

उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते[8]॥

---

१. अष्टाध्यायी, ३।१।१२४
२. ,, ७।२।११६
३. अहोरूपमहो वीर्यमहोसत्त्वमहोद्युतिः। पंचतन्त्रम, ५।९।२५
४ महाभारतम्, ३।२०३५ मनुस्मृतिः, ४।११९; ११।१८३
५. अष्टाध्यायी,
६. ,, ३.१।१२४
७. ,, ७।२।११६
८. मनुस्मृतिः, २

यस्माद् धर्मानाचिनोति सोऽपि आचार्यः। एवंभूतस्य आचार्यस्य पत्नी इत्यर्थे प्रकृतवार्तिकेन ङीषि, आनुगागमे, णत्वप्रतिषेधे च आचार्यानी इति रूपं सम्पद्यते। पुंयोगाभावे तु आचार्या इति स्वयं व्याख्यात्री धर्मोपदेष्ट्री इत्यर्थे।

पाणिनिद्वारा निष्पन्नस्य आचार्याणीशब्दकथनापेक्षया मुखसुखार्थं भाषायामाचार्यानी इति णत्वविरहितशब्दस्य प्रयोगः समागतः। उच्चारणसौकर्याय मूर्धन्यणध्वनेः स्थाने दन्त्यनध्वनेः व्यवहारः प्रचलितः, एतदर्थमेव कात्यायनेन प्रकृतवार्तिकस्योपसंख्यानं कृतम्। अत्र श्रीमता वासुदेवशरणाग्रवालमहोदयेन यदुक्तम् आचार्यानीशब्दः पाणिनिसम्मतः[1] तत्तु नोपयुक्तं, वस्तुतः वार्तिकविधानेनैव प्रयोगस्यास्य निष्पत्तिः भवति।

भाषाशास्त्रीयशब्दावल्यां आचार्यानी इत्यत्र मूर्धन्यण्ध्वनिस्थाने दन्त्यन्ध्वनिस्वीकारः मूर्धन्यध्वनेः अनतिभावं (Deretroflexion) सूचयति—मूर्धन्यः ध्वनिः दन्त्ये यदा परिणमति तदा मूर्धन्यध्वनेः अनतिभावः कथ्यते।

णत्वविरहितस्य आचार्यानीशब्दस्य साहित्ये बहुशः व्यवहारः दृश्यते, यथा च महावीरचरिते—

शत्रुमूलमनुत्खाय न पुनर्द्रष्टुमुत्सहे।
त्र्यम्बकं देवमाचार्यमाचार्यानीं च पार्वतीम्[2]॥

भा०, का० प्र०—	वनो न हशः	(४।१।७)
सि० —	वनो न हश इति वक्तव्यम्	,,

बहुव्रीहिसमासतः भिन्नस्थलेषु हशन्तधातोः विहितो यो वन् प्रत्ययः तदन्तप्रातिपदिकात् तदन्तान्तप्रातिपदिकात् च ङीप्, रादेशश्च न भवतीत्यर्थः। पदमंजरीकारेण—'विहितविशेषणं हश्ग्रहणं हशन्ताद् धातोर्यो वन्विहितस्तदन्तात्प्रातिपदिकान्ङीब्रौ न भवत इत्यर्थः, तेन शर्वरीत्यत्र प्रतिषेधाभावः,' इति व्याख्यानं विहितम्[3]। इदं भाष्यविवेचनमाधृत्य तिष्ठति[4]। बहवो युध्वानो यत्र सा बहुयुध्वा इत्यत्र तु 'अनो बहुव्रीहेः' इति ङीपि निषिद्धे सन्नियोगशिष्टन्यायेन रोऽपि न स्यादिति अबहुव्रीह्यर्थम्। विहितविशेषणाभावे अव्याप्तिं दर्शयन् उदाहरति श्रीमान् भट्टोजिदीक्षितः अवावा ब्राह्मणीति—ओणृ अपनयने धातोः 'अन्येभ्योऽपि

१. पाणिनिकालीन भारतवर्ष, पृ० ९९

२. महावीरचरितम्, ३।६

३. का०, पद, ४।१।७

४. यदि न हश इत्युच्यते—शर्वरीति न सिद्ध्यति। वहितविशेषणं हश्ग्रहणम्—हशन्ताद्यो विहित इति। महा० ४।१।७

दृश्यन्ते'[1] इति सूत्रेण वनिप् प्रत्यये, 'विड्वनोरनुनासिकस्यात्'[2] इति सूत्रेण 'ण' इत्यस्य स्थाने आत्वे 'ओ आवन्' इति स्थिते, 'एचोऽयवायवः'[3] इति ओकारस्यावादेशे अवावन्शब्दात् 'वनो र च'[4] इति स्त्रीत्वे ङीपः 'रः' अन्तादेशस्य प्राप्तिः समागता, तथा च बहुधीवरी इतिवत् अवावरी इति रूपापत्तिः किन्तु कात्यायनेन भाषायामवावा इति परिवर्तितरूपमवलोकितं तत्सिद्धये च उक्तनियमस्योपस्थापनं कृतं येन ङीरः, रादेशस्य च प्राप्तिः नाभवत् तथा अवावन्शब्दात् सौ, 'सर्वनामस्थाने चासम्बुद्धौ'[5] इति उपधादीर्घे, हल्ङ्यादिलोपे 'नलोपः प्रातिपदिकान्तस्ये'ति नलोपे अवावा इति रूपम् तदन्तप्रातिपदिकस्योदाहरणम् । तदन्तान्तप्रातिपदिकस्योदाहरणम्—राजयुध्वा—'युध् संप्रहारे' इति धातोः राजानं योधितवती इत्यर्थे अन्तर्भावितण्यर्थाद् युधेः 'राजनि युधि कृञः'[6] इति भूते, कर्मणि, क्वनिप्, इति त्रयमनुवर्तते । कर्मीभूते राजन्युपपदे भूते युधः कृञश्च क्वनिबित्यर्थः । 'अन्येस्योऽपि दृश्यन्ते' इत्येव सिद्धे नियमार्थमिदम् । वस्तुतस्तु दृशिग्रहणस्यागतिकगतित्वेन विधायकत्वमेव साम्प्रतम् । राजन् ङस् युध्वन् इति स्थितौ 'उपपदमतिङ्'[7] इति उपपदसमासे सुब्लुकि राजयुध्वन् । अत्र युधेर्विहितः क्वनिबिति युध्वन्निति वन्नन्ततदादिः राजयुध्वन्निति तु तदन्तान्तः । दृशन्ताद्विहितत्वेन ङीप् रादेशश्च न भवतः । वार्तिकाभावे राजयुध्वरी इति रूपमभविष्यत् ।

एवं प्रतीयते यत् पाणिनेः समये अवावरी, राजयुध्वरी एवं रूपं भाषायां प्रचलितमासीत् यथा—बहुधीवरी तथैव । वाचस्पत्यम् 'अवावरी' इत्यस्य चर्चां विदधाति—स्त्रियां ङीप् वनो रच—अवावरी, (अवावर् तथा राजयुध्वर् इत्यत्र अन्त्यव्यंजनस्य रेफस्य लोपः समजनि) स्त्रीत्वे टापि अवावा, राजयुध्वा, इति तु बहुधीवा इति प्रयोगस्य सादृश्यमूलकः प्रयोगः तथा च सादृश्यात् ध्वनिपरिवर्तनमत्र संलक्ष्यते । राजयुध्वा इत्यत्र यः ध्वा स सहयुध्वा इत्यस्य सादृश्यमाश्रित्य तिष्ठति । युद्धे वीरतायाः कार्यं पुरुषोचितं भवति अतः सहयुध्वा, राजयुध्वा एवमभिव्यक्तिः । स्त्रीलिङ्गे एतस्य प्रयोगः समागच्छत्, अतः अयं प्रयोगः सामान्यलिङ्गस्य रूपं प्राप्तवान् वर्तते—(Common gender) ।

---

१. अष्टाध्यायी, ३.२।७५
२. „ ६।३।२१
३. „ ६।१।७८
४. „ ४।१।७
५. „ ६।४।८
६. „ ३।२।९५
७. „ २।२।१९

			पुल्लिङ्गम्	स्त्रीलिङ्गम्
सह +	√ युध्	+	वा	[वरी]
अवा +			वा	[वरी]

पुल्लिङ्गरूपं भाषायामतिष्ठत् किन्तु स्त्रीलिङ्गरूपं शनैः शनैः विलुप्तम् ।

भा०— इदुदुपधस्य चाप्रत्ययस्येति चेत्पुंमुहुसोः प्रतिषेधः (८।३।४१)

का०— पुम्मुहुसोः प्रतिषेधो वक्तव्यः ,,

सि०— मुहुसः प्रतिषेधः ,,

इदुतौ-इकारोकारौ—उपधेयस्य एवंविधस्य प्रत्ययावयवसम्बन्धिविषयस्य स्थाने मूर्द्धन्यः 'ष' इति भवति कवर्गे पवर्गे च परे तिष्ठति सति, इत्यर्थकेन 'इदुदुपधस्य चाप्रत्ययस्ये'ति[1] सूत्रेण मुहुः कामयते इति विग्रहे मुहुः कामा इत्यत्र विसर्गः अप्रत्ययसम्बन्धी वर्तते अतः षत्वे सति आविष्कृतम्, दुष्कृतम् इति सादृश्यात् मुहुस्कामा इत्येव पाणिनिदिशा रूपसिद्धिः भवेत् किन्तु भाषायां मुहुः कामा इत्येवावलोक्य कात्यायनेन प्रकृतवार्तिकस्योपसंख्यानं कृतम् ।

इदुदुपधस्येत्यनेन षकारादेशः पुम्मुहुस्शब्दयोः अवयवभूतस्य विसर्जनीयस्य स्थाने न भवतीति वार्तिकार्थः, तथा च पुंस्कामा, मुहुः कामा इत्यादिरूपाणां सिद्धिः । मुहुः कामा इत्यत्र 'कुप्वोः कः पौ च'[2] इति सूत्रेण जिह्वामूलीयस्य ≍ प्राप्तिः आसीत् तथा एवमुच्चारणं स्यात्—मुहुः ≍ कामा, तत् प्रबाध्य 'इदुदुपधस्ये'ति षत्वस्य प्राप्तिः किन्तु वार्तिकनियमेन षत्वस्यापि प्रतिषेधः । पौनः पुन्येऽर्थे उच्चारणे 'मुहुः' इत्यत्र बललाभाय मूर्द्धन्यस्य षध्वनेः लोपः संजातः तथा विसर्गध्वनिः एव स्थितः ।

भा०, सि० प्र० प्र०— उष्णभद्रयोः करणे (६।३।७०)

का०— उष्णभद्रयोः करणे मुम् वक्तव्यः ,,

उष्णभद्रयोः करणशब्दे उत्तरपदे तिष्ठति मुमः उपसंख्यानं कर्त्तव्यम् । उष्णं करणं, भद्रंकरणम्—उभयत्र षष्ठीसमासः । इह उष्णकरण-भद्रकरणमित्यनयोर्मध्ये 'म'ध्वनेरागमेन संभूतं ध्वन्यात्मकं रूपपरिवर्तनं भाषायां तदानीन्तनप्रवृत्तिसूचकं च वार्तिकेनानेन व्युत्पन्नम् । वस्तुतः अयं प्रयोगः अलुक्समासमूलकः । अयं पदबन्धः वर्तते न तु पदम् ।

---

१. अष्टाध्यायी, ८।३।४१
२. ,, ८।३।३७

भा०—	इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च	(२।२।१८)
का०—	इवेन सह समासो विभक्त्यलोपश्च पूर्वपद—	,,
	प्रकृतिस्वरत्वं च वक्तव्यम्	,,
प्र०—	इवेन समासो विभक्त्यलोपश्च	,,
सि०—	इवेन सह समासो विभक्त्यलोपश्च	(२।४।७१)

इवेन सह सुबन्तस्य समासः भवति तथा विभक्तेः लोपः न भवति एवं पूर्वपद-प्रकृतिस्वरत्वं च जायते । उदाहरणम्–वाससी इव, कन्ये इव, जीमूतस्य इव । वाससी इवेति विग्रहे प्रकृतेन समासविधाने विभक्तेरलुकि च 'ईदूदेद्द्विवचनं प्रगृह्यम्'[1] इत्यनेन प्रगृह्यसंज्ञायां प्रकृतिभावे वाससी इवेति । एवमेव जीमूतस्य इवेति विग्रहे उक्तवार्तिकेन समासे, समासत्वात् प्रातिपदिकसंज्ञायां, सुपो धातुप्रातिपदिकयोरिति[2] विभक्तेर्लुकि प्राप्ते, वार्तिकेनानेन लुकः निषेधे जीमूतस्येवेति रूपम् ।

वार्तिकाभावे 'जीमूतेव' एवं प्रयोगापत्तिः । किन्तु भाषायां जीमूतस्येवेति प्रयोगप्रचलनं विलोक्य कात्यायनेन तदर्थमेव नियमोऽयं प्रस्तुतः । एवमेव हरीतिकीं भुंक्ष्व राजन् मातेव हितकारिणीम् । कदाचित् कुपिता माता नोदरस्था हरीतिकी, अत्र मातरम् इवेति रूपमभविष्यत् यदि वार्तिकं नाभविष्यत्, तथैव 'मातेव रक्षति पितेव हिते नियुङ्क्ते' इत्यादिषु मातेव पितेवेत्यादिरूपाणां सिद्धिः वार्तिकेनानेन एव भवति ।

तेन सदृशम्, तस्य सदृशम् इतिवदेव जीमूतसदृशः इत्यर्थे जीमूतस्येव इत्यस्य प्रयोगः भाषायामागतः यदभिलक्ष्य वार्तिकमिदं प्रस्तुतम् ।

भा०—	वा हतजग्धपरे च	(८।४।४८)
का०—	वा हतजग्धपर इति वक्तव्यम्	,,
प्र० प्र०—	हतजग्धपरे वा	,,
सि०—	वा हतजग्धयोः	,,

नादिन्याक्रोशे पुत्रस्य[3] इति सूत्रे अस्य वार्तिकस्य पाठादिदं वार्तिकमपि आक्रोशे एव । ईदृशाक्रोशस्य स्त्रीष्वेव प्रसिद्धत्वात् इदमपि स्त्रियामेव । हतशब्दे जग्धशब्दे च परे अचः परस्य पुत्रशब्दावयवस्य यरः द्वित्वं न भवति विकल्पेन, इति वार्तिकार्थः । उदाहरणम्—हतः पुत्रो यया, जग्धः पुत्रो यया इति पुत्रहती पुत्रजग्धी । 'वाहिता-

---

१. अष्टाध्यायी १।१।११
२. ,, २।४।७१
३. ,, ८।४।४८

ग्न्यादिषु[1] राजदन्तादिषु परम्'[2] इति वा हृतजग्धयोः परनिपातः । उद्योतकारमते प्रदीपोक्तम् 'अस्वाङ्गपूर्वपदाद्वा'[3] इति ङीष् नोचितं, तत्र जातिपूर्वादिति वक्तव्यम् इत्युक्तेः पुत्रशब्दस्य जातिवाचकत्वाभावात्, अतः गौरादित्वान् ङीष्[4] ।

'अनचि चे'ति[5] द्वित्वविकल्पे सिद्धे क्तान्ते परे पुत्रशब्दावयवस्य यरः द्वित्वं चेत् हृतजग्धयोरेव निन्दायामेव इति नियमार्थं वार्तिकस्यास्योपस्थापनं, तेन पुत्रकृती इत्यादौ द्वित्वाभावः । वार्तिकस्य विकल्पपक्षे 'अनचि चे'ति द्वित्वे पुत्त्रहृतीति भवति । एवं पुत्त्रजग्धी इति । अत्र आक्रोशेऽर्थे उच्चारणे प्रायः बललाभाय तकारस्य द्वित्वविधानं कृतम् । इदं मध्यव्यंजनागमस्योदाहरणभूतम् ।

भा०— नादिन्याक्रोशे पुत्रस्येति तत्परे च (८।४।४८)

काशिका — तत्परे चेति वक्तव्यम्

प्र० कौ०— वार्तिकमेव नास्ति

सि० कौ०— तत्परे च

पुत्रपुत्रादिनी त्वमसि पापे, अत्र आदिनीशब्दात् पूर्वं पुत्रस्य व्यवधानेन प्रथम-पुत्रशब्दावयवयरः तकारस्य द्वित्वं न प्राप्नोति 'नादिन्याक्रोशे पुत्रस्य'[6] इति सूत्रेण, अतः 'तत्परे चे'ति वार्तिकारम्भो विहितः । आदिनीशब्दः परः यस्मात् एवंभूतः यः पुत्रशब्दः तस्मिन् परे अर्थात् पुत्रादिनीपरे, अचः परस्य पुत्रशब्दावयवस्य यरः द्वित्वं निन्दायां गम्यमानायां न भवतीति वार्तिकार्थः । उदाहरणम्— पुत्रपुत्रादिनी त्वमसि पापे । एवमेव पुत्रपौत्रादिनी त्वमसि पापे अपि सिद्ध्यति । पुत्रस्य पुत्रम् अत्सि इति । पुत्रादिनी पुत्रभोजिनी इत्यर्थः । पुत्राश्च पौत्राश्च पुत्र-पौत्राः, तानत्तुं शीलमस्याः पुत्रपौत्रादिनी । इयं निन्दा स्त्रीष्वेव गम्यते ।

पाणिनेः समये स्त्रियः गाल्यां पुत्रादिनी त्वमसि इति शब्दस्य प्रयोगं कुर्वन्ति स्म । भाषायाः सारल्यदृष्ट्या अत्र 'पुत्त्र' इति द्वित्वं प्रायः पाणिनिना न स्वीकृतम् । कात्यायनस्य समये पुत्रपुत्रादिनी, पुत्रपौत्रादिनी, इयमपि गाली प्रचलितासीत्, इहापि पुत्रपुत्रादिनी इति कथने काठिन्यमवबुद्ध्य द्वित्वनिषेधाय प्रकृतवार्तिकस्य विधानं कृतमस्ति । पुत्रहत्यारूपं पुत्रभक्षणरूपं वा साहसं केवलं निर्घृणनारीणां

---

१. अष्टाध्यायी, २।२।३७
२. ,, २।२।३१
३. ,, ४।१।५३
४. ,, ४।१।४१
५. ,, ८।४।४७
६. ,, ८।४.४८

कृत एव सम्भवमासीत्। अतएव स्त्रीणामेव सन्दर्भे इदं वार्तिकं तिष्ठति। पुत्रस्य तकारस्य लोपः वर्णलोपस्योदाहरणत्वेन भाषायां ध्वनिपरिवर्तनं संसूचयति।

भा०— नुमचिरतृज्वद्भावेभ्यो नुट् (७।१।९६)

का०— तृज्वद्भावात् पूर्वविप्रतिषेधेन नुमनुटौ भवतः (७।१।७९)

सि०+प्र०— नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वप्रतिषेधेन (८।२।२४)

अत्र 'अचिर' इति 'अचि र ऋतः' इति सूत्रैकदेशानुकरणं तदपि तत्सूत्रविहित-रेफपरम्। ल्यब्लोपे कर्मण्यधिकरणे चेति पंचमी, तथा च एतान् प्रबाध्येत्यर्थः। विप्रतिषेधपदम् विप्रतिषेधप्रयोज्यबलवत्त्वपरं पूर्वशास्त्रबलत्वेन नुडित्यभिप्रायः। तृतीयादिषु अजादिविभक्तिषु परासु तिष्ठन्तीषु क्रोष्टुशब्दात् तृज्वद्भावः भवति अर्थात् क्रोष्टु-इत्यस्य स्थाने क्रोष्टृ-इत्यादेशः भवतीति विभाषातृतीयादिष्वचि इति सूत्रस्य[1] विशकलितार्थः। तथा च क्रोष्टुशब्दात् षष्ठीबहुवचने क्रोष्टृणाम् इति-पाणिनिसूत्रसम्मतं रूपं स्यात् किन्तु कात्यायनेन भाषायां प्रचलित क्रोष्टूनाम् इति रूपान्तरमवलोक्य तत्सिद्धये प्रकृतवार्तिकस्य प्रणयन कृतं तदनुसारं नुम, अचि च परे सति 'र' भावात् तृज्वद्भावात् च पूर्वविप्रतिषेधेन नुट् भवति। क्रोष्टुशब्दात् आमि 'ह्रस्वनद्यापोनुट्'[2] इति तथा 'विभाषा तृतीयादिष्वचि' इति सूत्रद्वयस्य प्राप्तिः तिष्ठति 'विप्रतिषेधे परं कार्यम्'[3] इति सूत्रज्ञापनानुसारं तृज्वद्भाव रूप-परकार्यस्य एव प्राप्तिः संजाता तथा च क्रोष्टृणाम् इति रूपस्य सम्भावना चागता किन्तु भाषायां क्रोष्टूनाम् इति रूपमवलोक्य वार्तिकस्यास्य नियमन-माचार्येण कृतं तथा च 'नुट्' एव अभवत् एवं च तृज्वद्भावाभावे क्रोष्टूनाम्। अत्र 'क्रोष्टु' इति मूलशब्दस्य आधारत्वेन मुखसुखार्थम् 'ऋ' इत्यस्य स्थाने 'ऊ'— ध्वनेरुच्चारणम्। तिसृणाम्, चतसृणाम्—अत्र त्रि आम्-चतुर आम् इत्यवस्थायां 'त्रिचतुरोः स्त्रियां तिसृचतसृ' इति सूत्रेण क्रमशः तिसृ-चतसृ इति स्त्रीलिङ्गे आदेशे, तिसृ आम्, चतसृ आम्, इति स्थितौ 'अचि र ऋतः'[4] इति सूत्रेण तिसृ-चतसृ इत्यनयोः ऋ इत्यस्य स्थाने र' इत्यादेशस्य प्राप्तौ ह्रस्वनद्यापो नुट्' इति नुडागमप्राप्तौ च विप्रतिषेधे उपस्थिते रादेशस्य प्राप्तौ प्रकृतवार्तिकेन 'नुडित्यस्य' एव पूर्वविप्रतिषेधेन विधाने तिसृनाम् चतसृनाम् इति स्थितौ, 'नामि' इति दीर्घस्य प्राप्तिरुपस्थिता, 'नतिसृचतसृ' इति सूत्रेण दीर्घस्य निषेधे 'ऋवर्णान्नस्य

१. अष्टाध्यायी, ७।१।९६
२. ,, ७।१।५४
३. ,, १।४।२
४. ,, ७।२।१००

णत्वं वाच्यम्'[1] इति वार्तिकेन णत्वे तिसृणाम्, चतसृणाम् इत्यनयोः सिद्धिः। वार्तिकाभावे रभावे सति तिस्रणाम्, चतस्रणाम् इति रूपापत्तिः। अत्र तिस्रनाम् इति स्थितौ 'तिस्र' इत्यस्य अध्वनेः 'इ' ध्वनौ परिवर्तनम् 'अपश्रुति इत्युनुरूपं वर्तते। तथा च तिसृनाम्' इत्यत्र 'न'—ध्वनेः णध्वनौ विपर्ययः पार्श्ववर्तिव्यंजन-विपर्ययस्योदाहरणम्।

नुम् इत्यतः पूर्वविप्रतिषेधेन नुट् इत्यस्योदाहरणम् वारीणाम्वारि + आम् इति स्थितौ 'इकोऽचि विभक्तौ'[2] इति नुमः प्राप्तिः ह्रस्वनद्यापो' इति नुटः प्राप्तिः, विप्रतिषेधत्वेन नुमिति परकार्यं प्राप्तं, किन्तु प्रकृतनिर्देशेन नुटि एव कृते नामीत्यनेन दीर्घे, णत्वे वारीणाम् इति। पाणिनिमते 'वारिणाम्' इति स्यात्। सम्भवतः इदमेव रूपं तात्कालिकभाषायां प्रचलितमासीत् किन्तु कात्यायनसमये ह्रस्वः 'इ' ध्वनिः दीर्घे 'ई'—ध्वनौ परिवर्तितः परिवर्तनमिदम् अपश्रुत्यनुरूपम्। एवमेव प्रियक्रोष्टुनेऽरण्याय, कृशक्रोष्टुनेऽरण्याय, हितक्रौष्टुने वृषलकुलाय इत्यादीनि रूपाणि भाषायां ध्वनिपरिवर्तनस्य सूचकानि सन्ति।

भा०—	षष्ठीप्रकरणे वाक्दिक्पश्यद्भ्यो युक्तिदण्डहरेषूप-संख्यानम्	(६।३।२०)
का०—	षष्ठीप्रकरणे वाग्दिक्पश्यद्भ्योयुक्तिदण्डहरेषु यथासंख्यमलुग्वक्तव्यः	,,
प्र० सि०—	वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु	,,

समासविवक्षायां वाक्, दिक्, पश्यत्, इत्येतेभ्यः शब्देभ्यः परे युक्तिदण्डहरशब्देषु सत्सु षष्ठ्याः अलुक् न भवति। यथा—वाचः युक्तिः—अत्र 'षष्ठी'[3] इत्यनेन समासे वाग्युक्तिः एवं रूपमभविष्यत् अथवा पाणिनिकाले एवमेव शब्दः प्रयुक्तः आसीत् भाषायां, किन्तु कालान्तरे चौरस्यकुलम् वृषलस्य कुलम् इति अलुग्घटितं रुपमवलोक्य तत्सादृश्यात् जनाः वाचः युक्तिरिति व्यवहरन्ति स्म यदवलोक्य कात्यायनेन प्रकृतस्य निर्देशः कृतः। एवमेव दिशोदण्डः, पश्यतोहरः इति। पश्यतोहरः इत्यत्र पश्यत इत्यत्र 'षष्ठी चानादरे'[4] इति षष्ठी, पश्यन्तमनादृत्य हरतीत्यर्थः। अयं शब्दः स्वर्णकाराय प्रयुज्यते। कात्यायनकालिके समाजे इमे स्वर्णकाराः जनेषु पश्यत्सु सत्स्वेव धूर्ततया स्वर्णहरणे क्षमाः आसन्। एतदर्थं कुख्याताः सन्तः पश्यतो हरः इति पर्यायेण अभिहिताः बभूवुः, यस्य संकेतः वार्तिकेनानेन लभ्यते।

१. महा०, वा०, ६।४।८४
२. अष्टा०, ७।१।७३
३. ,, २।२।८
४. ,, २।३।३८

वाग्युक्तिः, दिग्दण्डः, पश्यद्धरः इति प्रयोगाः वार्तिकाभावे स्युः। एषामुपर्युक्तरूपेषु परिवर्तनं स्वरभक्त्यनुरूपध्वनिपरिवर्तनेन संजातम्। संयुक्तव्यंजनानामुच्चारणे असौविध्यं दूरीकर्तुं मूलवर्णे ओध्वनिः समायातः तिष्ठति।

भा०—	अनाम्नवतिनगरीणां चेतिवक्तव्यम्	(८।४।४२)
का०—	अनाम्नवतिनगरीणामिति वक्तव्यम्	,,
प्र० सि०—	अनाम्नवतिनगरीणामिति वाच्यम्	,,

पदान्तटवर्गात्परस्य नामावयवभिन्नस्य सकारतवर्गस्य ष्टुत्वं न स्यादित्यर्थके 'न पदान्ताट्टोरनाम्'[1] इति सूत्रे केवलम् 'आमिति' कथनं न पर्याप्तमतः वार्तिकमिदमुपन्यस्तम्। भाष्यकारश्च अतएव ब्रूते 'अत्यल्पमिदमुच्यते'—अनाम्नवतिनगरीणां चेति वक्तव्यम्। लोकभाषायां सन्धिविशिष्टोच्चारणव्यवहारात्—षण्णगर्यः, षण्णवतिः इति दर्शनात् कात्यायनेनेदं पूरकवार्तिकं प्रस्तुतम्; यस्याभिप्रायः वर्तते—नाम् च नवतिश्च नगरी चेति द्वन्द्वे नञ्समासे च 'द्वन्द्वादौ द्वन्द्वान्ते च श्रूयमाणं प्रत्येकमभिसम्बध्यते इति न्यायेन नाम्नवतिनगर्य्यवयवभिन्नो यस्तवर्गस्तस्य पदान्तटवर्गात्परस्य ष्टुत्वं नेति वक्तव्यम्।

षण्णाम् 'षष्नाम्' इति स्थितौ 'स्वादिष्वसर्वनामस्थाने'[2] इति पदसंज्ञायां जश्त्वेन-षस्य डे आदेशे 'प्रत्यये भाषायां नित्यम्' इत्यस्यासिद्धतया ष्टुत्वेन तस्य णत्वे षण्णामिति। षण्णवतिः—'दिक्संख्ये'[3] इति नियमात् षडधिका नवतिरिति विग्रहे अनवतीति पर्युदासात् ष्टुत्वनिषेधो न, एवमेव षण्णगर्यः इत्यत्र—षडिति नगर्यः इति पृथक्पदे, अनगरीति पर्युदासात् ष्टुत्वनिषेधो न।

अत्र अघोषस्य टध्वनेः घोषे णध्वनौ रूपान्तरमस्ति, इदमेव घोषीकरणं, घोषत्वं (Vocalization अथवा Vocing) कथ्यते।

भा०, प्र०, सि०—	स्वादीरेरिणोः	(६।१।८९)
का० —	स्वादीरेरिण्योर्वृद्धिर्वक्तव्या	,,

स्वशब्दावयवाकाराद् ईरेरिघटके अचि परे पूर्वपरयोरचो वृद्धिरिति वार्तिकार्थः। ईरशब्दो द्वैविध्यं प्राप्नोति— ईर गतौ' इत्यतो भावे घञि ईरणमीर इति स्वेच्छया गमनम्, अथवा स्वेन ईरते गच्छतीति पचादित्वादचि स्वैरः स्वेच्छया गमनकर्ता, मन्दश्च।

---

१. अष्टा०, ८।४।४२
२. ,, १।४।१७
३. ,, २।१।५०

पाणिनिनियमेन स्वेरी स्वेरिणी इति गुणविशिष्टं रूपं स्यात्। किन्तु महाभारतादिषु[1] पाणिनेरन्तरं साहित्येषु वृद्धिघटितं स्वैरः[2] स्वैरी च रूपमवलोक्य कात्यायनेनात्र प्रकृतेन वृद्धेः विधानं कृतम्। स्वैरी-स्वपूर्वकादीरतेः सुप्यजातौ णिनिस्ताच्छील्ये'[3] इति णिनिः, स्त्रियामपि ङीपः प्राग्भागस्य ईरिन्रूपत्वात्, लिंगविशिष्टपरिभाषाश्रयणेनापि वृद्धिसिद्धया परिभाषया तत्साधनं विफलम्। वस्तुतः णिनिस्तु अनभिधानान्न भविष्यति यतः ईरिन्ग्रहणमनर्थकं, 'पदास्वैरिबाह्य' इति निपातनात्सिद्धम्, पदास्वैरशब्दादिना मत्वर्थीयेन सिद्धम् तथा चोक्तं भाष्यकारेण—'इरिन्ग्रहणं शक्यमकर्तुम्। कथं स्वैरीति ? इनिनैतन्मत्वर्थीयेन सिद्धम्—स्वैरोऽस्यास्तीति स्वैरी'[4]। एतेन 'स्वादीरेरिणोः' इत्येव कर्तव्यमित्युक्तं भवति।

स्वैरिणी,[5] जारिणी, व्यभिचारिणी, पतञ्जलिना उक्तं 'कथं सभायां स्त्री साध्वी स्यात्' अत्र 'सभा' इति उपलक्षणार्थकत्वेन तिष्ठति। अयमाक्षेपः बौद्धभिक्षुणीनां कृते तिष्ठतीदं प्रतीयते।

उच्चारणे बलागमात् ओध्वनिः औध्वनौ परिवर्तितः। समस्वरागमदिशा ध्वनिपरिवर्तनेनेदं रूपपरिवर्तनम्।

भा०—	अक्षादूहिन्याम्	(६।१।८९)
का०—	अक्षादूहिन्यां वृद्धिर्वक्तव्या	,,
प्र०—	अक्षादूहिन्याम्	,,
सि०—	अक्षादूहिन्यामुपसंख्यानम्	,,

'अद्गुणः'[6] इति सूत्रस्यापवादत्वेन तिष्ठति वार्तिकमिदम्। समुदायस्थाने वृद्ध्यापत्तेः अक्षशब्दात् ऊहिनीशब्दे परे सति पूर्वपरयोः वृद्धिः इत्यर्थः न समीचीनः। अत्र आदिति, अचि इति, वृद्धिरिति चानुवर्तते, अक्षपदन्तु स्वावयवे लाक्षणिकम्, ऊहिन्यामिति, घटकत्वं सप्तम्यर्थः। तथा चायमर्थः अक्षशब्दाकारादूहिनीशब्दावय-

---

१. लघुः स्वैरं गमिष्यसि, महाभारतम् ३।८४४६

२. सार्थाः स्वैरं स्वकीयेषु चेरुर्वेश्मस्विवाद्रिषु, रघु०, १७।६४

३. अष्टा०, ३।२।७८

४. महा०, ६।१।८९

५ व्यभिचारिस्त्रियां—वाचस्पत्यम्, तथा च—
परपुरुषचतुष्कगामिन्यां स्त्रियाञ्च। नातश्चतुर्थं प्रसवमापत्स्वपि वदन्त्युत। अतः परं स्वैरिणी स्यात्। बन्धकी पंचमे भवेत्।

B. & Roth.

६. अष्टा०, ७।१।८७

वेऽचि परे पूर्वपरयो: स्थाने वृद्धिः भवेत्। अक्षशब्दावयवादवर्णाद् ऊहिनीशब्दावयवे अचि परे पूर्वपरयोः स्थाने एकवृद्ध्यादेश: भवति इति विशकलितार्थ: । अक्षौहिणी-अक्षौहिणीशब्दः सेनाविशेषे रूढ: । अक्षाणां भूतपाशादीनामूहिनी इत्यप्यर्थ: । 'ऊह वितर्के' इत्यतो भावे घञि ऊहनमूहस्तर्कः सोऽस्त्यस्या इति ऊहिनी, 'अत इनिठनौ'[१] इति इनिः 'ऋन्नेभ्यो ङीप्'[२] इति ङीपि ङ्यन्तेन षष्ठीसमासे पूर्वपदादिति[३] णत्वे अक्षौहिणीति । अत्र 'आद्गुण:' इत्यनेन अक्ष + ऊहिनी इत्यवस्थायां गुणे अक्षोहिणी[४] इति रूपं पाणिनिनियमेन भवेत् । एवं प्रतीयते यत् पाणिनिकाले अक्षोहिणी इति रूपं प्रचलितमासीत् किन्तु महाभारतकाले अक्षौहिणीति वृद्धिघटितं रूपं सेनाविशेषे रूढम्, अत: प्रयोगममुं विलोक्य कात्यायनेन वार्तिकेनानेन वृद्धि-नियम: प्रस्तुत: ।

अत्र ओध्वनेः स्थाने औध्वनिः समागतः, सेनेत्यादीनां सम्बन्धे उच्चारणे बलागमात् अत्र समस्वरागमः जातः। अस्मात् ध्वनिपरिवर्तनात् भाषायां रूपपरिवर्तनम् ।

भा०, प्र०, सि०—	ओत्वोष्ठयोः समासे वा	(६।१।९४)
का०—	ओत्वोष्ठयोः समासे वा पररूपं वक्तव्यम्	,,

इह इति, आदिति, अचि इति, एक: पूर्वपरयो:, इति पररूपमिति चानुवर्तते । समासे इति घटकत्वं सप्तम्यर्थः, तेनायमर्थ:—समासघटकाकारात् तत्समासघटके ओत्वोष्ठयोरवयवेऽचि परे पूर्वपरयो: पररूपमेकादेशो विकल्पेन स्यादिति । व्याख्यानेनानेन यत्र समासे ओतुपदम् ओष्ठपदम्वा उत्तरपदं तस्मिन् परे एव पररूपमुपसंख्यातमिति शंका अपास्ता । एवं च दन्ते भवो दन्त्यः, ओष्ठे भवः ओष्ठ्यः, दन्त्यश्चासावोष्ठ्यश्च दन्त्योष्ठ्यम् इह ओष्ठशब्दस्योत्तरपदत्वाभावेऽपि समानसमासघटकाकारात् परस्य ओष्ठशब्दघटकौकारस्य अच: विद्यमानत्वात्पररूपसिद्धिः ।

१. अष्टा०, ५।२।११५
२. ,, ४।१।५
३. ,, ८।४।१०६
४. ऊहः समूहः संविकल्पकज्ञानं वा सोऽस्यामस्तीति, अक्षाणां रथानां सर्वेषामिन्द्रियाणां वा ऊहिनी, रथगजतुरंगपदातिसंख्याविशेषान्विते सेनासमूहे-वाचस्पत्यम् । तथा च A large army consisting of 21870 chariots, as many elephants, 65610 horse and 109350 foot.

Skt. Eng. Dict., Apte. p. 8

स्थूलोतुः–स्थूलश्चासावोतुश्चेति स्थूलोतुः स्थूलविडालः। विम्ब्याः फलं विम्बं तदिव रक्तवर्णौ ओष्ठौ अस्येति—विम्ब + ओष्ठः, इत्यवस्थायां वृद्धि बाधित्वा वार्तिकेनानेन पररूपम्। विम्बफलवद्रक्तौष्ठ इत्यभिप्रेतम्। पररूपविधानस्य विकल्पपक्षे स्थूलौतुः विम्बौष्ठः इतिरूपम्। समासाभावे न पररूपत्वम्—तवौष्ठः, तिष्ठ देवदत्तौष्ठं पश्य।

पाणिनेः समये केवलं वृद्धिघटकं विम्बौष्ठः स्थूलौतुः इत्यादिरूपं प्रचलितमासीत् किन्तु तदनन्तरं केवलमेकमेव ओष्ठवनिघटकं पररूपविशिष्टं स्थूलोतुः, इति रूपमपि प्रचलितमतः तन्निष्पत्त्यै कात्यायनेन प्रकृतस्य उपसंख्यानं कृतम्। परिवर्तनमेतत् मुखसौविध्यानुरूपं सञ्जातम्।

भा०—	अहरादीनां पत्यादिषूपसंख्यानम्	(८।२।६८)
का०—	अहरादीनां पत्यादिषूपसंख्यानं कर्तव्यम्	(८।२।७०)
प्र० —	अहरादीनां पत्यादिषु वा रेफः	(८।२।६९)
सि०—	,, ,,	,,

पतिप्रभृतिषु शब्देषु परेषु सत्सु अहन् प्रभृतिशब्दानामन्त्यवर्णस्य रेफादेशः विकल्पेन भवतीति वार्तिकाभिधेयः। अत्र 'रोऽसुपी'ति[1] रेफादेशे 'खरवसानयोर्विसर्जनीयः'[2] इत्यनेन विसर्गस्य प्राप्तिरासीत्, तमपवाद्य वार्तिकेनानेन रेफविधानं विहितम्—अहर्पतिः, गीर्पतिः, धूर्पतिः। रेफादेशस्य विकल्पपक्षे 'कुप्वोः ≍क≍पौ च'[3] इत्यनेन उपध्मानीये आदेशे सति अह≍पतिः, गी≍पतिः, धू≍पतिः इतिरूपाणि भवन्ति। चकारात् विसर्गे सति उपध्मानीयध्वनेः स्थाने विसर्गध्वनिः समायातिअहः पतिः गीः पतिः, धूः पतिः, किन्त्वत्र कात्यायनेनायं नियमः निर्दिष्टः यत् 'अहरादीनां पत्यादिषु वा रेफः'। यदनुसारं रेफादेशे सति अहर्पतिप्रभृतयः प्रयोगाः सम्भवन्ति। वार्तिकविकल्पपक्षे विसर्जनीयोपध्मानीयावपि प्रयुज्येते।

स्वकालिकभाषायामुभयविधध्वनीनां प्रयोगमवलोक्य आचार्येण वैकल्पिकं विधानं कृतम्। विसर्जनीयोपध्मानीयाभ्यां भिन्ने रेफध्वनौ समागते इदं स्पष्टतः ध्वनिपरिवर्तनस्य संकेतकम्। अहर्गणः इत्यादिरूपाणां सादृश्यात् अहर्पतिः, धूर्पतिः इत्यादिप्रयोगाः व्यवहारे समागताः यानभिलक्ष्य प्रकृतवार्तिकस्योपसंख्यानं विहितमस्ति।

भा०, का० —	श्रितादिषु गमिगाम्यादीनामुपसंख्यानम्	(२।१।२३)
प्र० —	गम्यादेरिष्टिः	,,
सि० —	गम्यादीनामुपसंख्यानम्	,,

---

१. अष्टा०, ८।२।६८
२ ,, ८।३।१५
३. ,, ८।३।३७

गमिशब्दो गमेरिनिरित्यौणादिकः, गामीति बाहुलकात् वृद्धिः, औणादिकानामन्येषांच संग्रहार्थमुभयोरुपादानम् । अत्र आदिशब्दः प्रकारवाची, गमिगामिशब्दयोरेकतरोपादानेनैव सिद्धे द्वयोरूपादानमुणादीनामन्येषांच यथा स्यात्, अन्यथा यदि गामिग्रहणमेव क्रियेत तदादिशब्दस्य प्रकारवाचित्वाद् गमिप्रकाराणामुणादीनामेव ग्रहणं भवेत् । अथ गामिग्रहणमेव विधीयेत, तदा गामिप्रकाराणामनुणादीनां स्यात् । तस्माद् द्वयोरपि ग्रहणं कर्तव्यम् । तथा च द्वितीयान्तं सुबन्तं गमिगाम्यादिप्रकृतिकसमर्थसुबन्तेन सह समस्यते । ग्रामं गमी इत्यत्र 'अकेनोर्भविष्यदाधमर्ण्ययोः'[१] इत्यनेन षष्ठ्याः निषेधे कर्मणि द्वितीया भवति, तदात्र 'द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः'[२] इत्यनेन तत्पुरुषसमासस्य प्राप्तिरेव नासीत् किन्तु भाषायां ग्रामं श्रितः ग्रामश्रितः, कृष्णम् अतीतः कृष्णातीतः इत्यादिरूपाणि अवलोक्य जनाः ग्रामगमी इत्यपि व्यवहरन्ति स्म:, अतः सादृश्याद्रूपपरिवर्तनमिदमवधार्य वार्तिकस्यास्य निर्देशेनात्र समासविधानम्—ग्रामगमी, ग्रामं गामी— ग्रामगामीति । एवमेव अन्नं बुभुक्षुः—अन्नबुभुक्षुः इत्युदाहरणमपि ध्येयम् ।

एषु प्रयोगेषु ग्रामं गमी इत्यत्र अनुस्वारध्वनेः अथवा मध्यस्थस्य ग्रामम् इत्यत्र 'म' इति व्यंजनध्वनेः लोपः संजातः ।

---

१. अष्टा०, २।३।७०
२. ,, २।१।२३

"ननु चार्थाभिधानाय प्रयोगः शब्दगोचरः"

पञ्चमोन्मेषः

अर्थपरिवर्तनदिशा प्रकृतस्य अनुशीलनम्

अर्थस्य लक्षणमुपस्थापयन् वार्तिककारः कात्यायनः उक्तवान्—सर्वे भावाः स्वेन भावेन भवन्ति स तेषां भावः[1]। तात्पर्यमिदं वर्तते यत् सर्वे शब्दाः स्वेन वाच्येन करणेन यस्मात् प्रवृत्तिनिमित्तात् सम्भवन्ति—वाच्यार्थज्ञापनाय प्रयोगं लभन्ते, स प्रवृत्तिनिमित्तरूपोऽर्थः तेषां शब्दानां भावः। वार्तिकेऽस्मिन् भावशब्दस्य वारत्रयं प्रयोगमवलोक्य भाष्यकारः प्रश्नमुपस्थापयति—किमेभिस्त्रिभिर्भावग्रहणैः क्रियते? स्वयमेव उत्तरमपि प्रस्तौति—एकेन शब्दः प्रतिनिर्दिश्यते द्वाभ्यामर्थः। यद्वा सर्वे शब्दाः स्वेनार्थेन भवन्ति स तेषामर्थ इति[2]।

भर्तृहरिणा चोक्तं यस्य शब्दस्य उच्चारणात् यस्यार्थस्य प्रतीतिः भवति, स तस्यार्थः तिष्ठति[3]। वस्तुतः कुमारिलभट्टमते यः अर्थः येन शब्देन सह सम्बद्धः तिष्ठति, स तस्यार्थः। तात्पर्यमिदं यत् शब्दस्य स एव अर्थः भवति यः तेन सह वर्तमानः तिष्ठति तथा तमर्थं कथमपि न परित्यजति[4]। अर्थस्य एभिःलक्षणैः इदमेव विस्पष्टं भवति यत् शब्दतः तस्य सन्निकटः सम्बन्धः, पतंजलिमते शब्दार्थौ अभिन्नावेव। अर्थस्तु शब्दस्यैवाभ्यन्तरशक्तिः। शब्दः शब्दात् बहिर्भूतः किन्तु अर्थस्तु अर्थात् अबहिर्भूतः अपृथग्वा तिष्ठति—'शब्दश्च शब्दाद् बहिर्भूतः अर्थोऽबहिर्भूतः'[5]। तन्मते यदा कोऽपि शब्दः श्रूयते तदा स प्रथमं स्वं रूपमेव बोधयति तदनन्तरमर्थं ज्ञापयति। यावत् शब्दः स्पष्टरूपेण न श्रूयते तावत् स नार्थप्रत्यायने शक्तः[6]। एकस्य शब्दस्य नियमितरूपेण एकस्मिन्नेव अर्थे प्रयोगः न भवति अतः प्रकृतिप्रत्यययोः अर्थस्य अनियतत्वात् इदं स्पष्टं यत् अर्थेषु परिवर्तनं भवति।

---

१. महा०, वा०, ५।१।११९

२. महा०, ५।१।११६

३. यस्मिंस्तूच्चरिते शब्दे यदा योऽर्थः प्रतीयते। तमाहुरर्थं तस्यैव नान्यदर्थस्य लक्षणम्

४ तत्र योऽन्वेति यं शब्दमर्थस्तस्य भवेदसौ। श्लोकवार्तिकम्, १६०

५. महा०, १।१।६६

६. शब्दपूर्वकोह्यर्थे सम्प्रत्ययः, महा०, १।१।६७

यद्येक एव शब्दः नानार्थकः तिष्ठति तदा स अर्थविकासस्य परिचायकः। अर्थस्यापि सम्बन्धः वस्तुतः विनाशशीलमानवेनैव तिष्ठति अतः तद्वत् सोऽपि परिवर्तनशीलः विनाशशीलो वा।

मानवजीवनतः सम्बद्धानि एवंविधानि बहूनि कारणानि स्वतः समुपस्थितानि भवन्ति येभ्यः शब्दानामर्थेषु परिवर्तनस्य सम्भावना समायाति। यथा परिवारस्य बन्धनानि शैथिल्यमायान्ति तथैव शब्दानामपि मुख्यार्थः सुगमतया प्राचीनार्थतः पार्थक्यमाप्नोति। शब्दानां विविधप्रयोगकारणाद् तेषामर्थेषु निरन्तरमेव परिवर्तनस्य सम्भावना वर्द्धते। शब्दानाम् अर्थेषु परिवर्तनस्य बहूनिकारणानि संदृश्यन्ते, किन्तु तेषां विवेचनात्पूर्वं शब्दार्थयोः परस्परं किम्विधः सम्बन्धः तिष्ठति स ज्ञेयः यतः यदि अर्थेषु परिवर्तनं स्वीक्रियते तदा इयं शंका समुदेति यत् दार्शनिकास्तु इदं स्वीकुर्वन्ति यत् अर्थाः नित्या एव तथा च शब्दार्थयोः सम्बन्धः सर्वथा नित्यः, यद्येवं तदा अर्थेषु परिवर्तनस्वीकरणमसंगतमेव। वस्तुतः समस्यायाः अस्याः अतीव सुष्ठु समाधानं पातञ्जलमहाभाष्ये अवलोक्यते। भगवता कात्यायनेन स्वकीयप्रथम-वार्तिकावतरणं कुर्वता उक्तं—सिद्धे शब्दार्थसम्बन्धे यस्य विश्लेषणक्रमेण भगवान् पतञ्जलिराह यत् कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तमिति जिज्ञासायां कात्यायनाचार्यः सिद्धेशब्दार्थसम्बन्धे चेति प्रस्तौति। अत्र सिद्धशब्दः नित्यपर्याय-वाची, तथा च शब्दार्थयोः सम्बन्धं नित्यं मत्वा व्याकरणशास्त्रमिदं प्रवर्तितमिति पाणिनिकात्यायनयोः विचारः। पतञ्जलिरपि नित्यो ह्यर्थवतामर्थैरभिसम्बन्धः इत्युक्त्वा इदमेव विशिनष्टि। अत्र कैयटमते शब्दे इयं स्वाभाविकीयोग्यताबोधक-जनकत्वयोग्यता यत् यदा शब्दः उच्चार्यते तदा स अर्थमपि उपस्थापयति। द्रव्य-रूपिणी अर्थे अनित्ये सत्यपि शब्दार्थयोः सम्बन्धः नित्य एव[1] यतः अर्थबोधनस्य योग्यता शब्दे तिष्ठति, शब्दश्च नित्यः[2]। वाक्यपदीयेऽपि शब्दार्थयोः सम्बन्धः नित्य एव स्वीकृतः[3]। लोकव्यवहारतः अपि ज्ञायते यत् शब्दार्थयोः सम्बन्धः स्वाभाविकः[4]। यत्तु कैयटेनोक्तं—'तस्माद् वृद्धव्यवहारादेव शब्दार्थसम्बन्ध-व्युत्पत्तिः[5] तत्रापि लोकव्यवहार एवार्थः। भर्तृहरिमते शब्दार्थौ सर्वथा

---

१. सम्बन्धस्यापि व्यवहारपरम्परयानादित्वान्नित्यता, प्रदीपः, महा० प्र० आ०

२. अनित्येऽर्थे कथं सम्बन्धस्य नित्यतेति चेद् योग्यता लक्षणत्वात् सम्बन्धस्य तस्यां च शब्दाश्रयत्वात् शब्दस्य च नित्यत्वाद् दोषः। प्र०, महा०, प्र० आ०

३. नित्याः शब्दार्थसम्बन्धाः समाम्नाता महर्षिभिः। सूत्राणां चानुतन्त्राणां भाष्याणां च प्रणेतृभिः। वाक्यपदीयम्, १।२३

४. लोकत. लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेणधर्मनियमः। महा, प्र आ०।

५. प्र०, म०, २।१।१

अभिन्नौ, वस्तुतः एकस्यैवात्मनः रूपद्वयौ—एकस्यैवात्मनो भेदौ शब्दार्थावपृथक् स्थितौ[1]।

शब्दार्थयोः नित्यता यत् स्वीक्रियते तत्र कः अर्थः अभीष्टः इति प्रथमंज्ञेयः। स्थूलावलोकनेन ज्ञायते यत् आकृतिर्हिनित्या द्रव्यमनित्यम्। किन्तु पतञ्जलिना एतद्विपरीतमेव स्वकीयं मतमुद्भावितम्। तन्मते द्रव्यं हि नित्यमाकृतिरनित्या। 'कथं ज्ञायते? एवं हि दृश्यते लोके—मृत्कयाचिदाकृत्या युक्तः पिण्डो भवति, पिण्डाकृतिमुपमृद्य घटिकाः क्रियन्ते, घटिकाकृतिमुपमृद्य कुण्डिकाः क्रियन्ते। तथा सुवर्णं कयाचिदाकृत्या युक्तं पिण्डो भवति, पिण्डाकृतिमुपमृद्य रुचकाः क्रियन्ते, रुचकाकृतिमुपमृद्यकटकाः क्रियन्ते, कटकाकृतिमुपमृद्य स्वस्तिकाः क्रियन्ते। पुनरावृत्तः सुवर्णपिण्डः पुनरपरयाकृत्यायुक्तः खदिरांगारसवर्णे कुण्डले भवतः, आकृतिरन्या चान्या च भवति द्रव्यं पुनस्तदेव। आकृत्युपमर्देन द्रव्यमेवावशिष्यते। इदमेव द्रव्यं पतञ्जलिमते शब्दब्रह्म वर्तते तथा इदमेव नित्यम्। एतस्यैव लक्षणं विधीयते—ध्रुवं कूटस्थमविचाल्यनपायोजनविकार्यनुत्पत्त्यवृद्ध्यव्यययोगि यत् तन्नित्यमिति। एवं-भूतौ नित्यौ यौ शब्दार्थौ वर्तेते तत्र तात्पर्यं वर्तते—स्फोटरूपः शब्दः वाचकः तथा शब्दब्रह्मरूपी अर्थः वाच्यः। अनयोः सम्बन्धः स्वाभाविकः नित्यश्च। किन्तु इतः भिन्नोऽपि अर्थः भवति यस्य संकेतः महाभाष्यस्य प्रथमाह्निके पूर्वविवेचनप्रसंग एव भगवता प्रदत्तः—आकृतावपि पदार्थं एष विग्रहो न्याय्यः—सिद्धे शब्दे अर्थे सम्बन्धे चेति। ननु चोक्तम्-आकृतिरनित्या-इति नैतदस्ति। नित्याकृतिः। कथम्? न क्वचिदुपरतेति कृत्वा सर्वत्रोपरता भवति। द्रव्यान्तरस्था तूपलभ्यते। अनेन ज्ञायते यत् आकृतिविशेषे नष्टेऽपि सति नित्या जातिः तिष्ठत्येव—अद्वैतेन लोके व्यवहाराभावात्व्यवहारे चाकृतेरेकाकारपरामर्शहेतुत्वान्नित्यत्वम्। विवेचनेनानेन इदं स्पष्टीभवति यत् अर्थे परिवर्तिते सत्यपि अर्थस्य नित्यतारूपः सिद्धान्तः अक्षुण्ण एव तिष्ठति। अर्थस्य विनाशेऽपि तस्य अविनाशः अनेन उपपन्नः। अत एव च पतञ्जलिना नित्यशब्दस्य अपरमपि लक्षणं स्थिरीकृतं—'तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते।' यस्य नाशमुपगतेऽपि तद्गतः मौलिकः धर्मः न विनश्यति सोऽपि नित्यः तथा च विश्लेषितम् उद्योतकारेण—'यस्मिन्विहतेऽपि तद्वृत्तिधर्मो न विहन्यते तदित्यर्थः। प्रवाहनित्यता चानेनोक्ता तन्नाशेऽपि तद्धर्मो न नश्यति। आश्रय-प्रवाहाविच्छेदादिति भावः। प्रदीपकृतापि इदमेवांगीकृतं—बुद्धिप्रतिभासः शब्दार्थः, यदा यदा स शब्दः उच्चारितस्तदार्थाकारा बुद्धिरुपजायते-इति प्रवाहनित्यत्वादर्थस्य नित्यत्वमित्यर्थः[2]। तात्पर्यमिद यत् प्रवाहे नष्टे सत्यपि तस्य धर्मस्य नाशः न

१ वाक्य, २।३१, आत्मभवत्तन्निष्ठः शब्दोऽपि

२. प्र०, म०, प्र० आ०

भवति, यतः प्रवाहस्य यद् मौलिकं रूपं तिष्ठति तत्तु अविच्छिन्नमेव। एवमेव अर्थेषु परिवर्तनानि समायान्ति किन्तु तस्य परिवर्तनरूपा या अनित्यता प्रतिभासमाना तिष्ठति सा वस्तुतः अनित्या सत्यपि नित्यैव[1]। एवं च दार्शनिकानामर्थनित्यत्व-सिद्धान्तः अनेन विखण्डितः न भवति अर्थपरिवर्तनरूपः भाषाशास्त्रीयसिद्धान्तश्च संगच्छते।[2]

अर्थपरिवर्तनस्य मूले एकः सुनिश्चितः सिद्धान्तः तिष्ठति यत् प्रत्येकं जनस्य स्वकीयसंस्कारकारणात् अर्थस्य स्वरूपं स्थिरीभवति। तत्त्वतः शब्दस्य कोऽपि निश्चितः अर्थः न तिष्ठति।[3]

तथा च वक्ता स्वबुद्ध्यनुरूपमेव शब्दस्य प्रयोगं करोति किन्तु विभिन्नाः श्रोतारः स्वस्वबुद्ध्या तस्य शब्दस्य विभिन्नमर्थम् अवगच्छन्ति। अतः यदि प्रयोग-कर्तुः ज्ञानं पूर्णं न वर्तते तदा स मुख्यार्थतः भिन्नमर्थमवगन्तुं शक्तः भवेत्। कथन-स्यायमाशयः यत् अर्थपरिवर्तनस्य विभिन्नेषु कारणेषु कस्यचिदपि जनस्य स्वकीयः दृष्टिविशेषः ज्ञानविशेषः वा मुख्यंकारणं तिष्ठति नैकान्तं व्यक्तिगतकारणात् अर्थे परिवर्तनमायाति प्रत्युत सामाजिककारणेभ्यश्च एवं संभवति। प्रायशः कवयः, साहित्यिकाश्च एकमेव शब्दमनेकेषु अर्थेषु प्रयुञ्जते। तस्मिन्नेव कामपि अपूर्वां शक्तिमुपस्थाप्य कार्यमिदं विधीयते, इदमपि अर्थपरिवर्तनस्य कारणेष्वन्यतमम्। यथा कस्यापि शब्दस्योच्चारणे केवलमेकस्मिन् एवध्वनौ बलापसरणं विधीयते तदा शनैः शनैः अन्ये ध्वनयः बलहीनाः सन्तः विलुप्यन्ते तथैव कस्यापि शब्दस्यार्थे यदि प्रधानार्थतः अपसृत्य गौणे अर्थे बलं समागच्छति तदा शनैः शनैः स प्रधानः अर्थः समाप्तिं याति। स्वभावतः मानवः अनुकरणप्रियः किन्तु अनुकरणकलायाः पूर्णतायाः अभावात् तस्य स्वकीयभावशक्त्याः प्रभावोऽपि स्वभावतः समायाति, एवं चार्थे परिवर्तनं सम्पद्यते। संसर्गवशात् अन्याभ्यः भाषाभ्यः यदि केचनशब्दाः गृह्यन्ते तदा तेषामपि अर्थे परिवर्तन जायते। भौगोलिकसामाजिकराजनीतिकधार्मिक-वातावरणे परिवर्तनेभ्यश्च शब्दानामर्थेषु परिवर्तनं संजायते। प्रयत्नलाघवरूपा मानवीया सहजप्रवृत्तिरपि अर्थपरिवर्तनेनियामिका यतः प्रत्येकं मानवः वाञ्छति यत्

१. अनित्येष्वपि नित्यत्वमभिधेयात्मनास्थितम् वाक्य०, ३.११३

२. "तत्र शास्त्रप्रक्रियानिर्वाहको वर्णस्फोटः। प्रकृतिप्रत्ययास्तत्तदर्थवाचका एवेति तदर्थः, उपसर्गनिपातधात्वादिभागोऽपि काल्पनिकः, स्थानिना लादय आदेशास्तिबादयः कल्पिता एव"। नागेशभट्ट, परमलघुमंजूषा।

३. प्रतिनियतवासनावशेनैव प्रतिनियताकारोऽर्थः तावतस्तु कश्चिदपि नियतो वाभिधीयते. पुण्यराजः, वाक्य०, २।१३६

तस्य हृदि ये शब्दाः सन्निविष्टाः वर्तन्ते तेभ्यः एव स्वकीयार्थस्याभिव्यक्तिं स कुर्यात् अतः नवीनार्थानाम् अवबोधायापि स स्वकीयशब्दकोषतः एव कस्यापि शब्दस्य चयनं विदधाति तस्मिन्नेव शब्दे अभीप्सितार्थं प्रतिष्ठितं च करोति। विभिन्न-नवीनावश्यकतार्थं नूतनाविष्कारार्थमपि अर्थपरिवर्तनं समापद्यते। शिष्टाचार-निर्वाहाय नम्रताप्रदर्शनाय वा अर्थेषु परिवर्तनं संजायते। अशोभनशब्दान् परित्यज्य तत्स्थाने शोभनशब्दानां प्रयोगादपि परिवर्तनमिदं जायते। वर्णानामल्पप्रयोगोऽपि अर्थपरिवर्तनप्रक्रियायां सहायकः भवति, तद्यथा यत्र अधिकवर्णानां प्रयोगः अभीष्टः आसीत् तत्र यदि अल्पैरेव वर्णैः अभीष्टार्थसिद्धिः विधीयते तदापि अर्थपरिवर्तनं भवति। सादृश्यादपि अर्थपरिवर्तनं जायते। शब्दानां पुनरावृत्तिरपि अर्थं परिवर्तितं करोति। अज्ञानवशादपि अर्थे परिवर्तनं समायाति, केषाञ्चन जनानामयं स्वभावः भवति यत ते अप्रचलितशब्दानां प्रयोगं कुर्वन्ति, तत्र अज्ञानाद् अर्थे भ्रान्तिः समायाति एवं चार्थः परिवर्तते। व्यंग्यभावावेशालंकारिकप्रयोगैश्च अर्थविकासस्य गतिः त्वरान्विता भवति।

प्राचीनभारतीयभाषाशास्त्रज्ञैः अपि अर्थपरिवर्तनानां कारणानि विचारितानि तेषां मते अर्थशक्तिस्त्रिधारूढिर्योगो योगरूढिश्च। शास्त्रकल्पिता - वयवार्थभानाभावे समुदायार्थनिरूपितशक्ती रूढिः यथा मणिनूपुरादौ। शास्त्रकल्पितावयवार्थनिरूपिता शक्तिर्योगः, यथा पाचकादौ। शास्त्रकल्पितावयवार्थान्वितविशेष्यभूतार्थनिरूपिता शक्तिर्योगरूढिः। यथा पंकजपदे।[1] इयं त्रिविधा शक्तिः विभिन्नैः कारणविशेषैः नियम्यते तथा चोक्तं वाक्यपदीयकारेण—

संयोगो विप्रयोगश्च साहचर्यं विरोधिता।
अर्थः प्रकरण लिंगं शब्दस्यान्यस्य सन्निधिः॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥

इमे संयोगविप्रयोगादयः विभिन्नेषु अर्थेषु शब्दार्थस्यानवच्छेदे-अवच्छेदो निश्चयस्तदभिन्नोऽनवच्छेदः तस्मिन्, एकस्मिन् धर्मिणि विरुद्धकोटिद्वयावगाहि-ज्ञानरूपे सन्देहे तदपाकरणद्वारा-धर्मविशिष्टविशेष्यतानिरूपकज्ञानत्वरूपसंशयस्य नाशद्वारा विशेषार्थनिर्णायकाः स्वविषयकज्ञानवत्त्वेनविशेषार्थतात्पर्यनिश्चायकाः।

अर्थनिर्णयस्य एभिरेवोपायैः अर्थपरिवर्तनस्य संकेतसरणिः उपलभ्यते। निरुक्तकृता सादृश्यम् अर्थपरिवर्तनस्य मुख्यं कारणम् उपपादितम्, 'तानि चेत् समानकर्माणि समाननिर्वचनानि। नानाकर्माणि चेन्नानानिर्वचनानि। यथार्थं

---

१. नागेशभट्टः, परमलघुमंजूषा

निर्वक्तव्यानि[1]। यास्काचार्यस्य विश्लेषणेनानेन अर्थपरिवर्तने सादृश्यस्य महत्त्वं विस्पष्टं भवति। लक्षणायाः अपि अर्थपरिवर्तने महत्त्वशालिनीभूमिका तिष्ठति। तात्स्थ्यात्, ताद्धर्म्यात्, तत्सामीप्यात्, तत्साहचर्याच्च अर्थपरिवर्तनमिदं भवति। कस्याप्यर्थस्य विस्तृतौ, नवीनार्थस्यादेशे च लक्षणायाः उपर्युक्ता चतुर्विधा प्रवृत्तिः मुख्यतः नियामिका तिष्ठति। साहचर्याच्च एकस्य शब्दस्य अन्यस्मिन्नर्थे प्रयोगः भवति[2]। अज्ञानात्, त्रुटिमूलकात् स्मरणात्, अस्पष्टश्रवणात्, मिथ्याज्ञानात्, अशुद्धप्रयोगात्; प्रमादात्, आलस्यात्, इत्यादिभ्यः कारणेभ्यश्च शब्दानामर्थः परिवर्तितः भवति। बद्धमूलः सन् स एव परिवर्तितोऽर्थः मुख्यार्थत्वं संगच्छते[3]। व्याजस्तुतिव्याजोक्तिप्रभृतिभिः अलंकारैः व्यंग्यप्रयोगैश्च अर्थेषु परिवर्तनं समायाति। प्रकरणभेदात् औचित्यभेदात्देशकालभेदाच्च अर्थपरिवर्तनं वैयाकरणैः बहुशः स्वीकृतम्। वाक्ये पदानि पृथक्-पृथक् रूपेण सामान्यार्थस्य वाचकानि किन्तु समासे सति तानि विशिष्टार्थस्य बोधकानि भवन्तीति भर्तृहरिनिर्देशेन ज्ञायते यत् समासस्यापि अर्थपरिवर्तने वैशिष्ट्यम्। उपसर्गसंयोगेन अर्थविकासस्य मान्यता तु सर्वैः भारतीयाचार्यैः भृशं स्वीकृता[4]। हरिणा प्रतिपादितं यत् यथा स्वरभेदात् अर्थभेदः भवति तथैव लिंगभेदादपि, अर्थभेदः भवति[5]। स्वरभेदात् अर्थभेदस्तु प्रसिद्ध एव—'दुष्टः शब्दः' इति प्रतीकद्वारा पतञ्जलिना सुष्ठुव्याख्यातः।

नैकान्तमिमान्येव कारणानि अर्थपरिवर्तनस्य नियामकानि भवितुमर्हन्ति इतोऽप्यधिकानि बहूनि वा कारणानि भवितुं शक्यन्ते यैः अर्थेषु परिवर्तनं समायाति। अर्थानां विविधपरिवर्तनानि मुख्यतः त्रिषु वर्गेषु विभज्यन्ते-अर्थसंकोचः, अर्थविस्तारः अर्थादेशश्च। इदमपि कथयितुं शक्यते यत् अर्थपरिवर्तनस्य यानि विभिन्नानि कारणानि प्रोक्तानि तेषाम् अर्थसंकोचार्थविस्तारार्थादेशरूपाः तिस्रः दिशः भवन्ति

---

१. निरुक्तम्, २।७

२. सूर्यमस्यावत्समाह, निरुक्तम्, २।२०

३. तस्माददृष्टतत्त्वानां सापराधं बहुच्छलम्।
दर्शनं वचन चापि नित्यमेवानवस्थितम्।। वाक्य०, २।१४०

४. न निर्बद्धा उपसर्गा अर्थान् निराहुः इति शाकटायनः।
नामाख्यातयोस्तुकर्मोपसंयोगद्योतका भवन्ति।। निरुक्तम्, १।३ तथा च
उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।
प्रहाराहारसहारविहारपरिहारवत्।। सिद्धान्तकौमुदी, ८।४।१८

५. स्वरभेदाद्यथाशब्दा साधवो विषयान्तरे।
लिंगभेदात् तथा सिद्धात साधुत्वमनुगम्यते।। वाक्य०, उ०, पृ०–४४१

याः वस्तुतः अर्थपरिवर्तनस्य स्वरूपं परिचाययन्ति । अर्थविज्ञानस्य प्रथमः प्रामाणिकः पाश्चात्यः विश्लेषकः आचार्यः ब्रीलमहाशयः अर्थपरिवर्तनस्यत्रैविध्यमिदं स्वीकरोति—(1) Contraction of Meaning, (2) Expansion of Meaning, (3) and Transference of Meaning. तत्र यदि सामान्यतः विशेषार्थं प्रति अर्थस्य प्रगतिः अवलोक्यते तदा अर्थसंकोचः भवति[1] । एवंभूताः बहवः शब्दाः ये पूर्वं विभिन्नार्थकाः आसन् किन्तु प्रसिद्धिहेतोः तेषामर्थे संकोचः समायाति तथा कोऽप्येकः विशिष्टः अर्थः अवशिष्यते अन्ये चार्थाः अप्रयुक्ताः संजायन्ते । यद्यपि शब्दस्य शक्तिः अनन्ता, शब्दस्तु सर्वार्थबोधकः, सतितात्पर्ये सर्वे सर्वार्थवाचकाः इति भाष्ये, किन्तु यदा एकस्मिन् विशिष्टे अर्थे प्रयोगाय तस्य निन्यत्रणं भवति तदा स तस्यैव विशिष्टस्य अर्थस्य ज्ञापनं करोति नान्यस्य सर्वार्थाभिधानशक्तियुक्तः शब्दो यदा विशिष्टेऽर्थे संव्यवहाराय नियम्यते, तदा तत्रैव प्रतीतिं जनयति नान्यत्र । नागेशेन परिभाषेन्दुशेखरे मातृशब्दः अर्थसंकोचस्य उदाहरणत्वेन प्रस्तुतः[२] । माता इत्यस्य अर्थद्वयं-जननी, मापकर्त्रीच, किन्तु प्रसिद्धिवशात् जननीरूपः विशिष्टः अर्थः अवशिष्टः मापकर्त्री इत्यर्थः अप्रचलनगर्ते निपतितः । समासेन, उपसर्गसंयोगेन च अर्थेषु संकोचः समायाति । कर्णेजपः, पश्यतोहरः, क्रान्तिः, उत्क्रान्तिः, प्रहारः, विहारः, रक्तः, पटः, कृष्णः, गौः, खट्वारूढः, इत्याद्युदाहरणैः तथ्यमिदं सुस्पष्टमेव । अर्थसंकोचे सति सामान्यस्य विस्तृतस्य वार्थस्य ज्ञापकः शब्दः कस्मिन्नपि विशिष्टे संकुचिते वार्थे प्रयुज्यते[३] ।

यदि कस्यापि शब्दस्य विशेषार्थतः सामान्यार्थं प्रति प्रवृत्तिः अभिलक्ष्यते तदा अर्थविस्ताररूपम् अर्थपरिवर्तनम् भवति । अर्थविस्तृतौ शब्दानामर्थाः स्वकीयमौलिकार्थानां विद्यमानत्वेऽपि, स्वसीमित क्षेत्रमतिक्रान्तं विधाय व्यापकार्थान् सूचयन्ति । यथा दीपकः घटादिसंदर्शनाय प्रयुज्यते किन्तु स साहचर्यहेतोः सान्निध्यहेतोश्च गेहस्थानि अन्यवस्तून्यपि प्रकाशयति तथैव शब्दाः अपि येषु अर्थविशेषेषु प्रयुक्ताः सन्तः साहचर्यात् सामीप्याच्च अन्यानर्थानपि ज्ञापयन्ति, ये

---

१. जब कोई वक्ता यह समझकर कि सामान्य नाम से विशिष्ट जाति का बोध हो सकता है, किसी विशिष्ट जाति के लिए उस सामान्य नाम को प्रयुक्त करे तो ऐसे प्रयोग को अर्थसंकोच की संज्ञा दी जाती है ।

जो. वान्द्रियाज, अनुवादक, बलवीर, भाषा, पृ० २४०

२. अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी, परिभाषेन्दुशेखरः, १०७

३. जो जाति या देश जितना ही अधिक सभ्य होगा उसकी भाषा में अर्थसंकोच उतना ही अधिक होगा । ब्रील, संस्कृत भाषाविज्ञान, पृ० २३७ इत्यत्र उद्धृतम् ।

अर्थाः पूर्वं तेषां विवक्षितत्वेन नासन्। सुष्ठु चेदं तथ्यं प्रतिपादितं वाक्यपदीये भर्तृहरिणा[1]। कात्यायनेन गोष्ठादयः स्थानादिषु पशुनामादिभ्यः इति वार्तिकेन अर्थविस्तृतेः प्रवृत्तिः संसूचिता। गोष्ठशब्दः पूर्वं केवलं गवां स्थानार्थे प्रयुज्यमानः आसीत् किन्तु कालान्तरे अविगोष्ठम्, गोगोष्ठम्-इत्यादिप्रयोगाः प्रचलिताः। अतः स एव गोष्ठशब्दः स्थानार्थकः सन् अर्थविस्तृतिं संसूचयति। महाभाष्यकृतः संघाते कटच्, द्वित्वे गोयुगच्, विस्तारे पटच्, स्नेहनेतैलच्-इत्यादीनिवचनानि तात्कालिकभाषायामर्थविस्तारस्य सूचकानि वर्तन्ते।

यदा द्वावर्थौ एकसदृशावेव व्यापकौ विद्येते तथा एकस्य स्थाने द्वितीयस्य सामीप्यात् आदेशः भवेत् तदा अर्थादेशः भवति। वस्तुतः कस्यापि शब्दस्य यः मुख्यः अर्थः प्रचलितः तिष्ठति तस्य भावसाहचर्यात् प्रचलितः अपरः गौणार्थः अपि प्रचलितः भवति। तस्मिन् यदि तस्य शब्दस्य मुख्यतया व्यवहारः संजायते तदा प्राचीनः मुख्यार्थः समाप्तिं याति गौणश्चार्थः तत्स्थानमाप्नोति तथा च एकस्मिन्नर्थे विलुप्ते सति तत्स्थाने नवीनार्थस्यादेशात् अर्थादेशः भवति। यदा अर्थे एवंविधमन्तरमापद्येत यत् तस्य मौलिकार्थः विनश्यति तथा च अपरः अर्थः तत्स्थाने समायाति तदा अर्थादेशः भवति। कवयः क्रान्तदर्शिनः, कविशब्दः पूर्वं मेधावी, क्रान्तदर्शी, इत्याद्यर्थेषु अभिव्यज्यमानः आसीत् किन्तु शनैः शनैः 'काव्यप्रणेता' इत्यस्मिन् अर्थे रूढःसंजातः, अत्र अर्थादेशमूलकं परिवर्तनं लक्ष्यते।

पूर्वं दुहितृशब्दः दुग्धदोहने संलग्नायाः कस्याः अपि नार्याः बोधकः आसीत् किन्तु मुख्यार्थस्य दुग्धदोहनरूपार्थस्य साहचर्यात् दोहनकर्त्री या कन्या आसीत् तस्याः एव बोधः पुत्रीसामान्यरूपेण प्रचलितः। प्राचीनः अर्थः विलुप्तः नवीनश्चार्थः समागतः।

कात्यायनकालिकभाषासु यदर्थपरिवर्तनप्रवृत्तिः परिलक्ष्यते तत्र अर्थसंकोचार्थविस्तारार्थादेशमूलकाः प्रवृत्तयः अपि संदृश्यन्ते। अत्र कात्यायनवार्तिकलक्षितशब्दानां पूर्वतः परिवर्तितार्थानां विभिन्नकारणनिर्देशपुरस्सरं परिशीलनं विधास्यते।

---

१. संसर्गिषु तथार्थेषु शब्दो येन प्रयुज्यते।
तस्मात् प्रयोजकादन्यानपि प्रत्याययत्यसौ॥
तथा शब्दोऽपि कस्मिंश्चित् प्रत्याय्यार्थो विवक्षिते।
अविवक्षितमप्यर्थं प्रकाशयति सन्निधेः॥
वाक्य०, २।३००-३०२

भा० — पाणिगृहीत्यादीनां विशेषे (४।१।५२)
का० — पाणिगृहीत्यादीनामर्थविशेषे (,,)
प्र०, सि० — पाणिगृहीती भार्यायाम् (,,)

यस्याः सविधि अग्निसाक्षिकं पाणिः गृह्यते तस्यां वाच्यायां पाणिगृहीत-शब्दात् स्त्रियां ङीष् वक्तव्यः इति वार्तिकार्थः। तत्र भाष्यकारव्याख्यानेन ज्ञायते यत् 'पाणिगृहीतादीनां विशेष इति वक्तव्यम्' पाणिगृहीती भार्या चेत्। यस्याः हि यथाकथंचित्पाणिर्गृह्यते। पाणिगृहीता सा भवति। इदमत्रावधेयम्—पाणि-गृहीत्यादीनां सिद्धये विशेष एव ङीष् भवति न सर्वत्र। एतदपि व्यवस्थित-विभाषया लभ्यते। विशेषस्तु पाणिग्रहणस्य वेदितव्यः। अग्निसाक्षिपूर्वकं भार्यार्थं यस्याः पाणिः गृह्यते सा पाणिगृहीती किन्तु यथाकथंचित् यथोक्तात् प्रकाराद् भिन्नेन केनापि प्रकारेण यदि पाणिर्गृह्यते तदा तु पाणिगृहीतेति रूपम्।

पाणिनेः नियमानुसारं बहुव्रीहेश्चान्तोदात्तात् इत्यनेन ङीषि कृते भार्याव्यति-रिक्तापि कापि स्त्री, यस्याः पाणिः केनापि परपुरुषेणापि यदि गृह्येत, अथवा विवाहविधिं विनैव यदि कश्चन जनः कस्याः अपि पाणिमवलम्ब्य स्वगृहे पत्नीवद् निदधाति सापि पाणिगृहीती भवतिस्म, किन्तु भाषायां कालान्तरे प्रयोगान्तर-मवलोक्य कात्यायनेन अर्थविशेषे केवलं विधिपूर्वकं परिणीतायां भार्यायां वाच्यायामेव पाणिगृहीती भवतीति वार्तिकेनानेन स्पष्टीकृतम्। इतो भिन्नेऽर्थे यथा कौतुकाद्यर्थं यदि कोऽपि जनः कस्याः अपि दास्याः, कस्याः अपि नार्याः वा करमवलम्बेत् तदा सा पाणिगृहीता। एवमत्र कात्यायनेन पाणिगृहीतीशब्दस्य अर्थसङ्कोचदिशा अर्थपरिवर्तनं स्वीकृतम्।

अग्रवालमते तात्कालिकसमाजे पत्नीव्यतिरिक्तयान्ययापि नार्या सह शारीरिकसम्बन्धस्थापनस्य प्रथा प्रायः प्रचलिता आसीत् किन्तु अग्नि साक्षित्वेन स्वीकृत्य यस्याः पाणिः गृह्यते स्म सा पाणिगृहीती कथ्यते स्म। किन्तु वैवाहिक-विधिं विनैव यस्याः स्त्रियः पाणिः केनापि पुरुषेण गृह्यते स्म तदा सा पाणिगृहीतेति।[1]

भा० — वर्णका तान्तवे (७।३।४५)
का० — वर्णका तान्तव उपसंख्यानम् (,,)
प्र०, सि० — वर्णका तान्तवे (,,)

तन्तूनां विकारः इत्यर्थे वर्णकसम्बन्धिनः प्रत्ययस्थात् ककारात् पूर्वस्य अकारस्य स्थाने 'प्रत्ययस्थादि'ति इत्वं न भवति। वर्ण क्रियाविस्तारगुणवचनेषु इति

१. पाणिनिकालीन भारतवर्ष, पृ० ९८

चौरादिकवर्णधातोः ण्वुलि, अकादेशे, टापि वर्णकेति। अत्र 'प्रत्ययस्थेति' इत्वस्य प्राप्तिरासीत् किन्तु वार्तिकेनानेन निषिध्यते।

कात्यायनपूर्वकालिकभाषायाः वर्णिकायाः व्यंजनद्वयस्य मध्यस्थः 'इ' ध्वनिः विलुप्तः अतः वर्णिकास्थाने वर्णका इति रूपपरिवर्तनं तथा च परिवर्तनमिदम् अर्थपरिवर्तनमपि उद्भावयति। वर्णका इत्यस्यार्थः भवति प्रावारविशेषः। कौटिलीये अर्थशास्त्रे वर्णकशब्दः कम्बलस्यैकं भेदं विशिनष्टि[1]। वर्णिका इत्यस्यार्थः वर्तते— ग्रन्थविशेषस्य व्याख्या अथवा स्तोत्रकर्त्री। पतञ्जलिमते 'वर्णिका भागुरीलोकायतस्य'[2]। भागुरीटीकाविशेषोलोकायतस्य—बौद्धस्य। कात्यायनेन स्वकालिकसमाजे प्रचलितं प्रावारकवस्त्रविशेषं वर्णकासंज्ञया अभिहितं निरीक्ष्य तत्सिद्धये नवीनस्यास्य रूपस्य सिद्धिः प्रदर्शिता। एवं चैकस्मिन् अर्थे वर्णिका तथार्थविशेषे वर्णका इति कात्यायनसम्मतः वर्णकाशब्दः अर्थसङ्कोचस्य निदर्शनभूतः।

दशकुमारचरिते तान्तवप्रावरणभेदे वर्णकाशब्दव्यवहारः।[3] अमरकोषे वर्णकशब्दः अनुलेपनयोग्ये हरिताले प्रयुक्तः। वर्णा अक्षराणि लेख्यत्वेन सन्त्यस्या इति वर्णिका; पिष्टे मृष्टे वा चन्दनादौ द्रव्ये, मण्डने वा वर्णिका इति शब्दरत्नाकरे। चारणे वर्णिका इति मेदिन्यां वाचस्पत्ये च। शाकुन्तलनाटके च वर्णिका इत्यस्य व्यवहारः[4]।

भा०	—तारका ज्योतिषि	(७।३।४५)
का०	—तारका ज्योतिष्युपसंख्यानम्	(,,)
प्र०, सि०	—तारका ज्योतिषि	(,,)

नक्षत्रं नेत्रकनीनिका च ज्योतिः, इत्यस्मिन्नर्थे प्रत्ययस्थककारात् पूर्वस्य अकारस्य स्थाने इत्वं न भवति। उदाहरणम्—तारका—तॄ्प्लवन—सन्तरणयोः इत्यतः ण्वुल् प्रत्यये, अकादेशे, वृद्धौ, रपरत्वे, टापि, प्रत्ययस्थेतीत्वनिषेधे तारका इति। तारका इत्यस्यार्थः तारा नक्षत्रविशेषो वा भवति। अन्यत्र इतो भिन्नेऽर्थे यथा भगवत्याः तारायाः अर्थे तारिका इतिरूपं भवति। पूर्वं तारका-तारिका इत्यस्य च नक्षत्रार्थे तारणकार्ये—सन्तरणकार्ये वा प्रवीणा इत्यर्थे च प्रयोगः आसीत् किन्तु कात्यायनसमये तारकाशब्दः केवलं नक्षत्रविशेषे रूढः संजातः तारिकाशब्दः सन्तरणकार्ये-

१. अर्थशास्त्रम्, २।११

२. महा०, ७।३।४५

३. दशकुमारचरित०, ८।६७

४. अभिज्ञानशाकुन्तलम्, ५

नावादिना तारणकार्ये प्रवीणा स्त्री, भवतारणे समर्था भगवती तारा इत्यर्थे च रूढः संजातः। अथर्ववेदे[1] तारकाशब्दः दिव्यनक्षत्रेऽर्थे उपलभ्यते। महाभारते[2] तारयितरि इत्यर्थे तारकासुरदैत्यभेदे च दृश्यते। तथैव तारिकाशब्दस्य च उभयथा प्रयोगः आसीत्।

भा० —'शूद्रा चामहत्पूर्वा' जातिः (४।१।४)
का० —'शूद्रा चामहत्पूर्वा जातिः (वृत्तौ पठितम्) (,,)
सि०, प्र०—शूद्रा चामहत्पूर्वा जातिः (वार्तिकचिह्नाभावः) (,,)

शूद्रा चामहत्पूर्वा जातिः इति अजादिगणे पठ्यते, तत्र वाक्यत्रयम् शूद्रा चेत्येकम्, अमहत्पूर्वा इति द्वितीयम् जातिरिति तृतीयम्। इदं च उभयत्र सम्बद्ध्यते। तथा च शूद्रशब्दः स्ववाच्यार्थगतस्त्रीत्वे द्योत्ये टापं लभते, शूद्रत्वजातिविशिष्टाजातिः चेत् वाच्या। महत्पूर्वः शूद्रशब्दः टापं न लभते समुदायशक्त्या (शूद्रशब्दान्तशक्त्या) जातिश्चेत् वाच्या तेन शूद्रत्वजातिविशिष्टा स्त्री शूद्रा। अत्र 'जातेरस्त्रीविषयादयोपधात्'[3] इति न ङीष्। या तु शूद्रत्वजातिविशिष्टा स्त्री शूद्रा अशूद्रा वा तत्र शूद्री इत्येव, "पुंयोगादाख्यायामि"ति[4] सूत्रेण तत्र ङीषेव भवति। अत्र अमहत्पूर्वग्रहणाभावे शूद्रशब्दः टापमुत्पादयति जातिर्वाच्याचेत् इत्यर्थे कृते अत्र महाशूद्रशब्दे शूद्रशब्दत्वाभावात् टापः प्राप्तिरेव नास्ति अतः तदन्तविधिः किन्तु इह हि स्त्रीप्रत्यये तदन्तविधिनिषेधो न भवति अमहत्पूर्वग्रहणात्। तेन महाशूद्री इत्यत्र न टाप्, 'जातेरस्त्रीविषयादयोपधात्' इति ङीषेव भवति।

शूद्रा-शूद्रत्वजातिविशिष्टा स्त्री—'जातेरस्त्री'ति ङीषि शूद्री इति रूपं पाणिनिकाले तत्पूर्वं वा प्रचलितमासीत्—यस्यार्थः आसीत् शूद्रस्य स्त्री किन्तु कालान्तरे अर्थोऽयं परिवर्तितः, शूद्रजातेः स्त्री इत्यस्मिन् परिवर्तितेऽर्थे शूद्राशब्दस्य प्रयोगमवलोक्य कात्यायनेन टापः विधानाय वार्तिकमिदं प्रणीतम्। इदं च भाषायां रूपपरिवर्तनस्योदाहरणम्। शूद्रस्य स्त्री इत्यर्थतः शूद्रजातेः स्त्री इत्यर्थपरिवर्तनं च तात्कालिकसामाजिकस्थित्यनुरूपं वरीवर्ति। समाजे शूद्राः अन्यजातीयाभिः स्त्रीभिः सहापि विवाहं कुर्वन्ति स्म अतः शूद्रेण परिणीता अन्यजातीया स्त्री शूद्री कथ्यते स्म किन्तु या स्त्री जन्मना शूद्रजातेरासीत् सा शूद्रा कथ्यते स्म, तदनुसारं भाषायामिदं रूपपरिवर्तनं संजातम्।

---

१. प्रतित्वं दिव्यांस्तारका अमुक्थाः अथर्ववेदः, १९।४९
२. महाभारतम्, १।२९३२
३. अष्टाध्यायी, ४।१।६३
४. ,, ४।१।४८

एवमेव कात्यायनेन निर्दिष्टः महाशूद्रीशब्दः एकस्य विशिष्टार्थस्य बोधं कारयति। एवं प्रतिभाति यत् शूद्राणामेका अपरा जातिरासीत् या सामान्यशूद्रेभ्यः सामाजिकस्थितौ श्रेष्ठा विलक्षणा वासीत् सा जातिरासीत् महाशूद्री इति। भगवता पतंजलिनापि एतद्विषये निर्दिष्टमस्ति।[1] काशिकायामपि महाशूद्रशब्दः आभीरस्वजातिबोधकः इति उल्लिखितमस्ति।[2] अमरसिंहेनापि एवमेव उल्लिखितम्।[3] श्रीमतावासुदेवशरणाग्रवालेनापि-महाशूद्रशब्दः आभीरजातिपर्याय, इत्येव स्वीकृतम्।[4]

इदमपि अत्रावधेयम् यत् पूर्वं शूद्रीशब्दः जातेः पुंयोगस्य इत्युभयोः बोधकः आसीत् किन्तु कात्यायनसमये केवलं पुंयोगस्य बोधः अनेन भवति स्म। अतः शब्दोऽयम् अर्थसंकोचाख्यार्थपरिवर्तनदिशायाः उदाहरणत्वेन तिष्ठति।[5]

भा०—	आशिषि च	(७।३।४५)
का०—	आशिषि चोपसंख्यानम्	,,
प्र०, कौ०—	आशिषि वुनश्च न	,,

आशिषि–आशीर्वादेऽर्थे–यो वुन् प्रत्ययः तत्सम्बन्धिनः अकारस्य कात्पूर्वस्यापि इत्वं नेति वार्तिकार्थः। जीवतात् जीवका, नन्दतात् नन्दका, भवतात् भवका, एषु अर्थेषु आशीर्विषयार्थवृत्तेः धातोर्वुन् स्यात् कर्तरि इत्यर्थकेन 'आशिषि च'[6]

---

१. सामान्यविशेषवाचिनोश्च द्वन्द्वाभावात् सिद्धम्, यदि सामान्यविशेषवाचिनोर्द्वन्द्वो न भवतीत्युच्यते, शूद्राभीरं गोबलीवर्दं तृणोलपमिति न सिध्यति। नैष दोषः इह तावच्छूद्राभीरमिति, आभीरा जात्यन्तराणि।

महा०, १।२।७२ सूत्रोपरि

तत्रैव प्रदीपेन स्मृतिवचनमुल्लिख्य स्पष्टीकृतमेतत्—

ब्राह्मणादुग्रकन्यायामाभीरो नाम जायते।
माहिष्योग्रौ प्रजायेते विट्शूद्राङ्गनयोर्नृपात्॥ इति।

२. महाशूद्रशब्दो ह्याभीरजातिवचनः, का०, ४।१।४

३. शूद्रीशूद्रस्य भार्यास्यात् शूद्रा तज्जातिरेव च।
आभीरी तु महाशूद्री जातिपुंयोगयोः समा॥

अमर०, २० मा०; १२ श्लोकः

४. पाणिनिकालीन भारतवर्ष, पृ० ९४

५. शूद्राशूद्रजातिस्त्रियां, शूद्री शूद्रभार्यायाम्, वाचस्पत्यम्।

६. अष्टाध्यायी, ३।१।१५०

इत्यनेन जीवधातोर्नन्दधातोर्भूधातोश्च वुन् प्रत्यये वुनः 'युवोरनाकावित्यकादेशे'[1], टापि जीवका, नन्दकेति तथा भूधातोर्गुणे अवादेशे टापि भवकेति सिद्धम्। एषु 'प्रत्ययस्थादि'ति[2] प्राप्तस्येत्वस्य निषेधाय वार्तिकमिदमुपसंख्यातम्।

आशिषि चेति सूत्रेण आशीर्वादार्थे विहितेन वुन्प्रत्ययेन निष्पन्नेषु जीवका-नन्दकाभवकादिप्रयोगेषु 'प्रत्ययस्थादि'ति इत्वेन जीविकानन्दिकाभविकेत्यादिरूपाणां सिद्धिः भवेत् किन्तु भाषायां जीविकाजीवकाशब्दयोः विभिन्ने अर्थे प्रयोगमवलोक्य 'जीवका' इति प्रयोगं व्याकरणसम्मतं विधातुं कात्यायनेन प्रकृतस्योपसंख्यानं कृतम्।

वृत्यर्थकजीविकाशब्दस्य जीवयतीति जीविका इति विग्रहे ण्वुल्तृचौ[3] इति सूत्रेण ण्वुल्प्रत्यये तस्याकादेशे प्रत्ययस्थादितीत्वे जीविका इति भवति। एवं प्रतीयते यत् पाणिनिपूर्वं पाणिनिकाले च जीविकाशब्दस्य उभयार्थः प्रचलितः आसीत्। शनैः शनैः उभयोर्भेदाय संशयराहित्याय वा लोकभाषायां जीविकाशब्दः वृत्यर्थकत्वेन स्थितः तथा जीवकाशब्दः चिरजीवनरूपाशिषः अर्थे एव स्थितः। अनयोः अर्थभेदात् कात्यायनेन आशिषि चेति' वार्तिकं प्रणीय आशीर्वादार्थके जीवकाशब्दे इत्वनिषेधः विहितः। कठोपनिषदः 'वरं वृणीष्व वित्तं चिरजीविकां'[4] चेत्यनेन नन्दकाभवकेति आशीर्वादार्थकप्रयोगाभ्याम् आशिषि चेति सूत्रस्य आशीर्वादेऽर्थे[5] कर्तरि वुनः नियमाच्च स्पष्टमेव ज्ञायते यत् आशीर्वादात्मकमपि जीविकेतिरूपं पाणिन्युपज्ञमासीत्। कात्यायनकाले जीविकाशब्दः केवलं वृत्तौ रूढः जीवकाशब्दः आशिषि रूढः अतः अर्थवैशिष्ट्यमिदमभिलक्ष्य प्रकृतस्योप-संख्यानमाचार्येण कृतम्।

भा०, का० — अध्वपरिमाणे च (उपसंख्यानवार्तिकम्) (६।१।७६)
प्र० क, सि० क — अध्वपरिमाणे च (,,)

यूतिशब्दाव्यवहितपूर्वत्वविशिष्टस्य गोशब्दान्त्यालरूपस्य वान्तादेशः भवति अध्वनः परिमाणे गम्यमाने, इति वार्तिकस्यार्थः। 'ऊतियूतिजूतिसातिहेतिकीर्तयश्च'[6] इतिसूत्रेण यूतिशब्दे निपातिते गो यूतिः इत्यत्र 'वान्तो यि प्रत्यये'[7] इति सूत्रस्य

---

१. अष्टाध्यायी ७।१।१
२. ,, ७।३।४४
३. ,, ३।१।१३३
४. कठोपनिषद् १।२४
५. One who lives a long time. V. S. Apte. *Skt. Eng. Dict.*
६. अष्टाध्यायी, ३।३।९७
७. सैव, ६।१।७९

यादिप्रत्ययाभावादप्राप्त्या लोके च गव्यूतिः इति प्रयोगप्रचलनेन तत्सिद्ध्यर्थं लक्ष्यचक्षुष्केण कात्यायनेन प्रकृतवार्तिकस्योपसंख्यानं विहितम्। तथा च मार्गस्य इयत्तागम्यमानायां सत्यां यूतिशब्दे परे सति गोशब्दावयवस्यौकारस्य वान्तादेशे गव्यूतिः इति रूपं सिद्ध्यति।

वेदेऽपि प्रयोगस्यास्य प्रचलनमवलोकितं यस्य निष्पत्त्यै पाणिनेः मौनावलम्बनं मृग्यम्। कात्यायनेन स्वकालिकभाषायामस्य प्रयोगस्य प्रचलनमवलोक्य 'गोर्यूतौ छन्दस्युपसंख्यानमि'ति लिखित्वा 'अध्वपरिमाणे च' इत्यस्य प्रस्तावना विहिता। गो यूतिः इत्यस्यां स्थितौ गव्यम् इत्यस्य सादृश्यात् ध्वनिपरिवर्तने सति 'ओ' इति ध्वनेः स्थाने 'अव' इत्यस्यादेशे सति गव्यूतिः इति रूपम्।

वेदे[1] गव्यूतिः इत्यस्यार्थः विस्तृतः भूभागः इत्यासीत् यत्र गावः चरन्ति स्म[2] किन्तु लोके एकक्रोशस्य क्रोशद्वयस्य वा मार्गस्य परिमाणेऽर्थे गव्यूतिशब्दस्य प्रचलनं संजातम्। छान्दसगव्यूतिशब्दस्य लौकिके गव्यूतिशब्दार्थे परिवर्तनस्येदं कारणमभविष्यत् यत् पूर्वं गवां चरितभूमावर्थे गव्यूतिशब्दस्य प्रयोगः आसीत्। चरितभूमितः यावद्दूरं शब्दायमानानां गवां ध्वनिः श्रूयते स्म तावद्दूरवर्तिप्रदेशः गव्यूतिशब्देन अभिधीयते स्म। एतदर्थमेव गव्यूतिशब्दः क्रोशैकस्य क्रोशद्वयस्य वार्थे अभिहितः अभवत्। रौथमहाशयस्य बोटलिंकमहाशयस्य च शब्दकोशावलोकनेन इदं स्पष्टीभवति।

भा०, प्र०, सि०—	अष्टका पितृदेवत्ये	(७।३।४५)
का० —	अष्टका पितृदैवत्ये[3]	(,,)

पितरश्च देवताश्च पितृदेवताः तदर्थं कर्म पितृदैवत्यम् (देवतान्तात्तादर्थ्ये यत्[4]) तस्मिन् पितृदेवत्ये अर्थे अष्टकसम्बन्धिनः प्रत्ययस्थककारात्पूर्वस्य अकारस्य स्थाने इत्वं न भवति। अश् धातोः 'इण्शिभ्यां तकन्'[5] इति तकन्-प्रत्यये, षत्वे, ष्टुत्वे, अष्टकशब्दाट्टापि 'प्रत्ययस्थे'ति इत्वस्य प्रकृतवार्तिकेन निषेधे अष्टका इति सिध्यति। यस्यार्थः—अश्नन्ति ब्राह्मणाः यस्यां सा अष्टका, इतः

---

१. परा मे यन्ति धीतयो गावो न गव्यूतीरनु, ऋग्वेदः, १।२५।१६
२. Weideland, Roth & Bott.
३. काशिकायां, पितृदैवत्ये इति उल्लिखितं तन्न समीचीनम्, यतिं सति वृद्धिः न भविष्यति।
४. अष्टाध्यायी, ५।४।२४
५. अष्टाध्यायी, उणादिसूत्रम्, ३ पा०, १४८ सूत्रम्।

भिन्ने अर्थे अष्टौपरिमाणमस्याः इति विग्रहे अष्टन्शब्दात् 'संख्यायाः' अतिशदन्तायाः कन्'[1] अष्टकशब्दाट्टापि' 'प्रत्ययस्थादिति' इत्वे अष्टिकेति सम्पद्यते ।

वार्तिकमिदम् अर्थभिन्नताप्रतिपादकम् । अष्टकाशब्दस्य पितृदेवकर्मणि लोके व्यवहारमवलोक्य खारीति अर्थवाचकात् अष्टिकाशब्दात् तस्य पृथक्व्यवहाराय लोके प्रयुक्तम् अष्टकाशब्दमवलोक्य वार्तिककारेणायं नियमः उपस्थापितः 'अष्टका पितृदेवत्ये' इति । अत्रेदं चिन्त्यम्—

अष्टकाशब्दस्यार्थः—पितृदेवत्यम् तथा अष्टौ अध्यायाः परिमाणमस्याः इति अष्टका–अष्टाध्यायी अथवा एवंभूतः ग्रन्थविशेषः यस्य अष्टौ अध्यायाः वर्तन्ते । सूत्राच्च कोपधात् (४।२।६५) इति सूत्रस्योदाहरणक्रमे काशिकायामुक्तं-पाणिनीयमष्टकं सूत्रं तदधीते अष्टकाः पाणिनीयाः । न्यासकारः, पदमंजरीकारः इत्युभावपि एवमेव समर्थयतः । अतः तत्त्वबोधिनीकारः, लक्ष्मीटीकाकारः—सभापत्युपाध्यायः, अथवा अन्येऽपि ये केचन-अष्टिकाशब्दस्यार्थः अष्टाध्यायी वर्तते इति कथयन्ति, ते तत्त्वतः दूराः तिष्ठन्ति । स्वयंभाष्यकारः एतदर्थमेव अष्टिका खारी इति कथयति ।[2] एतेन ज्ञायते यत् भगवान् पतञ्जलिः अष्टका इत्यस्य अष्टाध्यायीति अर्थं तु विजानाति एव, अतएव च ततो भिन्ने पितृदेवत्ये अर्थे एतस्य प्रयोगमवलोक्य तत्सिद्ध्यर्थं कात्यायनसम्मतं वार्तिकं स स्वीकरोति । शब्दकोषादिभिः अपि एवमेव ज्ञायते ।[3]

एवं विज्ञायते यत् पाणिनिसमये अष्टकाशब्दस्य ग्रन्थविशेषः अर्थः आसीत्, किन्तु कालान्तरे पितृदेवत्यरूपः अर्थः अपि अस्य समागतः, तदर्थमेव कात्यायनेन वार्तिकस्यास्य प्रणयन कृतम् । एवमयं शब्दः अर्थविस्तारस्य बोधकः ।

प्रायः सर्वेषु गृह्यसूत्रेषु 'अष्टका' इत्यस्योल्लेखः लभ्यते।[4] द्राह्यायणगृह-संहितानुसारम् आग्रहायण्यानन्तरं याः तिस्रः तमिस्राः अष्टम्यः ताः एव अष्टका आसन् ।

---

१. अष्टाध्यायी ५।१।२२

२. महा०, ७।३।४५

३. अष्टौ अष्टाध्यायाः परिमाणमस्य इत्यष्टकं तत् विदंति अधीयते वा इत्यष्टकाः—The 8 chapters of Panini's sutras. A division of the Rgveda (it being divided into 8 Astakas). अश्नन्ति पितरोऽस्यां तिथौ ।
Skt. Eng. Dict. p. 185.

४. अमावस्या चतुर्दश्योः पौर्णमास्यष्टकासु च,
मनुस्मृतिः ८।११३

भा०, प्र०, सि० — एवे चानियोगे (६।१।९४)

का० — एवे चानियोगे पररूपं वक्तव्यम् (,,)

अवर्णात् एवघटके एङि परे पूर्वपरयोः पररूपमेकादेशो भवति नियोगभिन्ने अवधारणभिन्ने वार्थे गम्यमाने, इति वार्तिकार्थः। वार्तिके नियोगशब्दः यद्यपि प्रेरणायां वर्तते, कार्ये इत्याद्यनेकेष्वेर्थेषु, परन्तु 'नियोगे' इति किमर्थम् 'इहैव भव मि स्म गाः' 'अत्रैव त्वमाह वयं 'सुशेषाः' इति प्रत्युदाहरणात् अवश्यम्भावरूपमवधारणमिह गृह्यते। अन्ययोगव्यवच्छेदोऽवधारणम्-अन्यसम्बन्धाभावः निश्चय इति यावत् अनियोगोऽनिश्चयः। भाष्येऽपि इदंस्पष्टीकृत यत् अवधारणार्थभिन्ने एव पररूपम्। 'अनियोग' इति किमर्थम्? इहैव भव मास्म गाः, अत्रैव त्वमिह वय सुशेवाः[1]। उदाहरणम्—

इह एव-इहेव, अद्य एव अद्येव, क्व एव क्वेव। क्वेव भोक्ष्यते इति प्रदीपे उदाहरणं तत्र चोक्तम्-अत्रानवक्लृप्तावेवशब्दः[2], यदा त्ववधारणे वर्तते तदा वृद्धिः। इदमेव तत्त्वबोधिन्यामेवं व्याख्यातम्—

नावक्लृप्तौ यदा दृष्टः पररूपस्य गोचरः।
एवस्तु विषयो वृद्धेर्नियमोऽयं यदा भवेत्॥

नावक्लृप्तौ—अनिश्चये यदा एवकारो दृष्टः स पररूपस्य गोचरः-विषयः, यदा तु नियमे दृष्टः स वृद्धेर्विषय इति। केचित्तु नियोगो व्यापार इत्याहुः, तन्न, तदर्थे प्रमाणाभावात् 'यदैव पूर्वं ज्वलने शरीरे' इति कुमारसम्भवप्रयोगस्य 'ममैव जन्मान्तरपातकानाम्' इति रघुवंशप्रयोगस्य 'धातोस्तन्निमित्तस्यैव' 'लङः शाकटायनस्यैव' इति सौत्रप्रयोगस्य विरोधाच्च। सर्वत्र व्यापाराप्रतीत्या पररूपापत्तेः। यस्य कस्यचिद् व्यापारस्य ग्रहणे तु 'क्वेव भोक्ष्यसे' इत्यस्याप्युदाहरणत्वानापत्तेः, तत्रापि व्यापारस्य सत्त्वात्[3]।

शेखरकारमते 'एवशब्दस्य द्योत्यमर्थद्वयम्। अवधारणमसम्भवरूपमनवक्लृप्त्यादि च, 'तयोरन्त्य एवात्र एवशब्दार्थः' 'इत्युक्त्वा क्वेव भोक्ष्यसे इत्यस्य स्थलसंकीर्णत्वादिना नास्ति सम्भवस्तस्य भोजनस्येति गम्यते' 'इत्युक्तवान्। तस्य मते भोजनस्थलस्य निश्चयाभावः न गम्यते प्रत्युत भोजनासम्भव एवद्योत्यते। न्यासकारेण

---

१. महा०, ६।१।९४ एवे चानियोगे इत्यस्य व्याख्याने

२. महा० प्रदी०, ६।१।९४

३. सि० कौ० लक्ष्मीटीका पृ० १४२

स्पष्टमिदं व्याख्यातम्—एवशब्दोऽनियमे वर्तते। यदा तमेव केवलं नियमं व्यापारेणाविशिष्टं ब्रूते तदा पररूपं भवति। यदा तु व्यापारेण विशिष्टं तदा वृद्धिरेव[1]।

क्वेव भोक्ष्यसे-क्वापि भोज्यमासीत्, एकः जनः अनिमन्त्रितः तत्रागतः तमवलोक्य कश्चिदवदत्-स्थलसंकीर्णत्वात् क्वेव भोक्ष्यसे? अर्थात् नास्ति सम्भवः तव भोजनस्य। अत्र 'एव' शब्दः अनिश्चितेऽर्थे वर्तते अतः क्वएव इत्यवस्थायां वार्तिकेनानेन पररूपे कृते क्वेव भोक्ष्यसे इति, किन्तु यत्र निश्चितत्वं तिष्ठति यथा केनाप्युक्तं क्वेव भोक्ष्यसे उत्तरयति—तवैव-तव गृहे एव भोक्ष्यामि, अत्र निश्चयार्थकत्वात् तव + एव इत्यत्र वृद्धिः।

पाणिनिनियमेन इहैव अद्यैव क्वैव इति सम्भवति, एवं प्रतिभाति यत् कात्यायनकाले निश्चितार्थबोधनाय पररूपविधानस्य प्रयोगः आसीत् अतः वार्तिकमिदं क्वेव, इहेव, अद्येवेति रूपाणां सिद्धये उपसंख्यातम्। इहेव-इहैव, अद्येव-अद्यैव, क्वेव क्वैव, इति प्रयोगाः एकस्मिन् एव अर्थे प्रतिभान्ति किन्तु एषां विशिष्टे अर्थे भाषायां प्रयोगः आसीत्, अनिश्चयार्थे इहैव निश्चयार्थे इहेवेति, अतः इहेवेत्यत्र अर्थसंकोचः।

भा०, का०—अर्यक्षत्रियाभ्यां वा (४।१।४९)
प्र०, सि०—अर्यक्षत्रियाभ्यां वा स्वार्थे (,,)

स्वार्थे अर्यशब्दतः क्षत्रियशब्दतश्च ङीष्प्रत्ययः भवति आनुगागमश्चेति वार्तिकार्थः। उदाहरणम्—अर्याणी, अर्यास्वामिनी वैश्यावेत्यर्थः। इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्[2] इति पाणिनीयसूत्रेण अर्याविधानात् न ङीष् प्रत्युत 'पुंयोगादाख्यायाम्' इत्यनेन ङीषि अर्यी इति भवति। एवं प्रतीयते यद्भाषायाम् आचार्या आचार्यानी इतिरूपसादृश्यमाश्रित्य अर्या-अर्याणी, क्षत्रिया-क्षत्रियाणी-इत्यादिरूपं समागतम् तन्निष्पत्यर्थं कात्यायनेन प्रकृतवियमस्य विधानं विहितम्।

क्षत्रिया, क्षत्रियाणी इत्यस्य विषये एकं रोचकं तथ्यमपि कात्यायनेन संकेतितम्—यदि प्रकृतवार्तिकेन ङीषः आनुगागमस्य च विधानं स्वार्थे नाभविष्यत् एवं च पुंयोगेऽत्र ङीष् एव अभविष्यत्तदा क्षत्रियस्य शूद्रजातीया भार्या अपि क्षत्रियाणी क्षत्रिया वा अभिधीयते स्म। वैश्यस्य शूद्रजातीयापि भार्या अर्या अर्याणीति कथ्यते स्म। अतः स्वार्थे-अर्यस्य क्षत्रियस्य च स्वयमर्थे अस्य नियमस्य विधानं कृतम्। अमरकोषेऽपि उल्लिखितम्—

1. का०. व्या०, ६।१।९४
2. अष्टाध्यायी. ४।१।४९

अर्याणी स्वयमर्या स्यात् क्षत्रिया क्षत्रियाण्यपि
उपाध्यायाप्युपाध्यायी स्यादाचार्यापि च स्वतः
आचार्यानी तु पुंयोगे स्यादर्यी क्षत्रियी तथा
उपाध्यायान्युपाध्यायी इति ।

एवं क्षत्रिया, क्षत्रियाणी, अर्या, अर्याणी, इत्येषामर्थस्य केवलं क्षत्रियजाति-विशिष्टायाः वैश्यजातिविशिष्टायाश्च स्त्रियः अर्थे व्यवहारः भाषायाम् अर्थसंकोचस्य उदाहरणभूतः । अस्यार्थपरिवर्तनस्य रूपपरिवर्तनस्य च कारणं सामाजिकी व्यवस्थापि स्यात्-ब्राह्मणाः, वैश्याश्च क्षत्रियपत्न्या सह परिणयं कुर्वन्ति स्म तथा वैश्याः शूद्रजातेः स्त्रीभिः सह विवाहं कुर्वन्ति स्म, अतः अन्यजातीयया विवाहकार्ये कृते सति तया स्त्रिया स्वकीयजात्याः परिणीतया स्त्रिया च पार्थक्यप्रतिपादनाय प्रकृतवार्तिकस्य रचना कृता ।

भा०, का०, प्र०, सि०—यवनाल्लिप्याम् (४।१।४६)

लिप्यर्थे यवनशब्दात् ङीषः विधानम् आनुगागमश्च भवतः । इन्द्रवरुणभवशर्व-रुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्[1] इति पाणिनिसूत्रेण निष्पन्नः यवनस्य पत्नी यवनानीतिशब्दः कात्यायनकालिकभाषायां केवलं यवनानां लिपिः इत्यस्मिन्नर्थे रूढः संजातः । एवमत्र अर्थसंकोचदिशा अर्थपरिवर्तनं संजातमस्ति । यवनस्य पत्नी इत्यर्थे यवनी-इत्यस्य प्रयोगः कात्यायनकाले भाषायां समागतः, अतः यत्र यवनी इति नवीनस्य भाषाप्रयोगस्य सङ्केतः कात्यायनवार्तिकेनानेन लभ्यते तत्र यवनानी-इत्यत्र अर्थसङ्कोचः सञ्जातः ।

कात्यायनस्य काले यवनानां लिपितः भारतं परिचितमासीत्, अस्या लिप्याः प्रचलनमवलोक्य यवनपत्नी-यवनलिपिः-इत्यत्र अर्थभेदाय भाषायाम् एतदर्थं पृथक्-पृथक् अर्थविधानाय लिप्यर्थे यवनानी तथा यवनपत्न्यर्थे यवनी-इति रूपसिद्धिः । महाभाष्यकारमतेऽपि वार्तिकमिदम् अर्थनियामकम् ।

कालिदासकाव्येषु यवनस्य स्त्री इत्यस्मिन्नर्थे यवनीशब्दस्य विशेषप्रयोगो दरीदृश्यते—यवनी युद्धकाले 'राज्ञेऽस्त्रं ददाति'[2] किराती चामरधारिर्यवनीशस्त्र-

---

१. अष्टाध्यायी, ४।१।४६
२. शाकुन्तलम् द्वि० अं०
एष बाणासनहस्ताभिर्यवनीभिः परिवृत इत एवागच्छति प्रियवयस्यः ।

धारिणी[१] तथा च पण्डितराजजगन्नाथस्य काव्ये—

यवनी नवनीतकोमलाङ्गीति ।

भा०, का०, प्र०, सि०—हिमारण्ययोर्महत्त्वे (४।१।४६)

यदा महत्त्वेनयुक्ता हिमादयः स्त्रीलिङ्गेनाभिसम्बन्ध्यन्ते तदा स्त्रीत्वविवक्षायाम् अनयोः ङीष्प्रत्ययानुगागमयोः विधानं वार्तिकेनानेनाख्यायते, नतु स्त्रीप्रत्ययस्याय-मपवाद इति उच्यते, स्त्रीत्व एव हि प्रत्ययो भवति । पाणिनीमते 'इन्द्रवरुणे'ति सूत्रेण ङीषः आनुगागमस्य च विधानेन हिमशब्दतः हिमानी अरण्यशब्दतः अरण्यानीति रूपनिष्पत्तिः स्यात् किन्तु तत्र हिमानी इत्यस्यार्थः सामान्यहिमः तुषारो वा, अरण्यानीत्यस्य अर्थः विशालं प्राकृतिकं वनमथवा वनसामान्यमित्यासीत् किन्तु कालान्तरे भाषायामनयोः विशिष्टे अर्थे प्रयोगः प्रचलितः तदर्थमेव महत्त्वेऽर्थे हिमारण्यशब्दयोः आनुक्-ङीष् इत्यनयोः विधानार्थकस्य भाष्यमतेन अर्थनियामकस्य प्रकृतवार्तिकस्योपस्थापनम् आचार्येण कृतम् ।

तत्र हिनस्ति उष्णतामित्यर्थे 'हन्तेर्हि'[२] चे'ति औणादिकेन सूत्रेण हन्तर्मक्प्रत्यये हि इत्यादेशे हिमम्, ततः महद्धिमम् इत्यर्थे प्रकृतवार्तिकबलात् महत्त्वे ङीषि आनुक् कृते च हिमानीति सिद्धम् । एवमेव ऋच्छति—गच्छति शेषे वयसि यत्र इत्यर्थे 'ऋगतौ' इत्यतः 'उणादयो बहुलम्'[३] इति अन्यप्रत्यये अरण्यम् इति, ततः महदरण्यम् इत्यर्थे हिमारण्ययोर्महत्त्वे इति वार्तिकबलात् महत्त्वेऽर्थे ङीषि आनुगागमे च अरण्यानीति निष्पद्यते । महत्त्वयोगेनानयोः स्त्रीत्वम् अन्यथा नपुंसकत्वं स्यात् ।

एवं प्रतीयते यत् सामान्याय अरण्याय किम्बा बृहदरण्याय अरण्यानी तथा सामान्यहिमसंघाताय हिमाय वा हिमानी इति पाणिनिकालिकभाषायां रूपं व्यवहारे आसीत् किन्तु शनैः शनैः अनयोः अर्थः एकस्मिन् विशिष्टे अर्थे सङ्कुचितः तथा कात्यायनकाले अत्यन्तविशालाय वनाय अरण्यानी तथा च हिमस्य अतीव विशाल-संघाताय हिमानीति शब्दव्यवहारः प्रचलितः हिमालये स्थितस्य तुषारस्य संघातः हिमानी इति पदेनाभिधीयते स्म, इति डॉ० प्रभुदयालवग्निहोत्रिमहाशया-नामभिमतम्[४] । अतएव वार्तिकस्यास्य अभिनिवेशः । अत्र अर्थसङ्कोचदिशा अर्थ-परिवर्तनं सञ्जातमस्ति ।

---

१. विक्रमोर्वशीयम्, ५।७७ तथा च रघुवंशे, १।६१
यवनी मुखपद्मानां सेहे मधुमदं न सः

२. उणादि०, १ पा० १४७ सूत्रम्

३. ,, १ अ०, १ सू०

४. पतञ्जलिकालीन भारत, पृ० ७६

भा०, का०, प्र०, सि०—यवाद्दोषे (४।१।४६)

यवाद् दोषे गम्यमाने सति स्त्रीत्वविवक्षायां ङीष् भवति। दुष्टो यवो यवानीति युधातोरचि अपि वा यव इति, ततः दुष्टो यवः इत्याकांक्षायां प्रकृतेन ङीषि आनुगागमे च कृते यवानीति सिध्यति। प्रदीपकारमते यवानीत्यनेन जात्यन्तरमभिधीयते। दोषस्तु यवत्वजातेरभावे तदाकारानुकृतिमात्रमित्याहुः[1]। तात्पर्यमिदं यत् यवत्व-जातेरभावेऽपि यवाकारानुकृतिः इत्येवात्र दोषः। लोके 'जई' इत्यनेनाख्यातः यवानी इत्यस्य बोधकः।

वार्तिकमिदम् अर्थनियामकत्वेन महाभाष्ये व्याख्यातम्। दुष्टो यवः यवानीति नवीने अर्थे भाषायामेतस्य प्रयोगं विलोक्य तद्विश्लेषणाय कात्यायनेनेदं वार्तिक-मुपन्यस्तम्।

भा०, प्र०, सि०—वर्तका शकुनौ प्राचाम् (७।३।४५)
का० —वर्तका शकुनौ प्राचामुपसंख्यानम् (,,)

शकुन्यर्थे वर्तकसम्बन्धिनः ककारात् पूर्वस्य अकारस्य स्थाने इत्वं न भवति। वर्तयतीति वर्तिका-इति विग्रहे वृतु वर्तने 'धातोः णिचि', ततो ण्वुलि, अकादेशे, णिलोपे स्वार्थे अज्ञातादौ के, टापि वर्तकेति रूपम्। इह 'प्रत्ययस्थादि'ति प्राप्तमित्वं निषेधयति वार्तिकमिदम्। शकुनिभिन्नार्थे नित्यमित्वं भवति।

केचन वार्तिके प्राचामिति कथनेनेममर्थंवगच्छन्ति यत् पूर्वाचार्याणाम्मते शकुन्यर्थे वर्तकाशब्दस्य व्यवहारः भवतिस्म नवीनानाम्मते तु वर्तिकेति व्यवहारः, किन्तु मतमिदं नोपयुक्तम् यतः ऋग्वेदे एव वर्तिकाशब्दस्य विहगेऽर्थे व्यवहारः लभ्यते—"आस्नो वृकस्य वर्तिकामभीके।" महाभारतेऽपि अस्मिन्नेवार्थे वर्तिकाशब्दस्य प्रयोगः।[2] अतः प्राचामिति कथनेनायमर्थः अवबुद्ध्यः—प्राचाम् पूर्वदेशीयानां मते इति, उदीचामिति कथनेन—उत्तरदिशास्थानां जनानां मते इति। प्रायः पूर्वदेशीयाः खगेऽर्थे वर्तका तथा उत्तरवासिनः वर्तिका इति व्यवहरन्ति स्म।

अत्र अपरोऽपि निवेशः—भगवान् पतञ्जलिः वर्तिकाशब्दस्य वर्णिका इतिवत् वर्तिकाभागुरी लोकायतस्येत्यर्थं प्रस्तौति अनेन ज्ञायते यत् वर्तिका इति बौद्धमतस्य व्याख्याकर्त्री वर्तते। यतः वर्तिका उभयमर्थं व्यनक्ति स्म, ततः खगरूपमर्थं निराकर्तुं वर्तका—इति व्यवहारे समागतं रूपमवलोक्य भगवता कात्यायनेन 'वर्तका, शकुनौ प्राचामि'ति वार्तिकं निर्दिष्टम्। पतञ्जलिव्याख्यानेनापि इदं

१. प्रदीपः, ४।१।४६
२. महाभारतम्, १।७२४

स्पष्टीभवति—वर्तका शकुनौ प्राचामुपसंख्यानं कर्तव्यम् । वर्तकाशकुनिः । शकुनाविति किमर्थम् ? वर्तिकाभागुरीलोकायतस्य । प्राचामिति किमर्थम् ? वर्तिका ।

इदमत्रावधेयम्—पूर्वं वर्तिकाशब्दः लोकायतमतस्य व्याख्याकर्त्री जीवनकर्त्री, खगविशेषः, इत्येतेषु अर्थेषु लोके प्रचलति स्म किन्तु कालान्तरे केवलं खगविशेषे इत्वविहीनस्य वर्तकाशब्दस्य व्यवहारः समागतः । एतदर्थमेव कात्यायनेन वार्तिकमिदम् प्रस्तुतम् । अत्र वर्तिकाशब्दः व्याख्याकर्त्री इत्यर्थे वर्तकाशब्दः खगार्थविशेषे परिवर्तितः सन् अर्थसङ्कोचस्य उदाहरणभूतः ।

भा०	—	ख्युन उपसंख्यानम्	(४।१।१५)
का० प्र०	—	नञ्स्नञीकक्तरुणतलुनानामुपसंख्यानम्	(,,)
सि०	—	नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम्	(,,)

"टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः"[१] इति सूत्रस्थं ख्युन उपसंख्यानमिति कात्यायनप्रणीतं वार्तिकम् । यस्यार्थः—अनुपसर्जनं यत् टिदन्तं यददन्तं प्रातिपदिकं तत एव स्त्रियां न ङीप् वक्तव्यं प्रत्युत ख्युनः अपि—ख्युन्-प्रत्ययान्तादपि ङीपः उपसंख्यानं विधातव्यमिति । उदाहरणम्—आढ्यङ्करणी सुभगङ्करणी—

न आढ्यः अनाढ्यः, अनाढ्यः आढ्यो—धनी क्रियतेऽनया इत्यस्मिन्नर्थे "आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषुच्व्यर्थेष्वच्वौ कृञः करणे ख्युन्"[२] इति सूत्रेण—च्विप्रत्ययान्तभिन्नेषु आढ्यादिषु कर्मसु उपपदेषु कृञः करणे ख्युन् इत्यर्थकेन—कृञः ख्युन्प्रत्यये खस्येत्वलोपयोः, योः "युवोरनाकौ"[३] इति सूत्रेण अनादेशे कृञा गुणे "खित्यनव्ययस्य"[४] इति पूर्वपदस्य मुमागमे "कर्तृकर्मणोः कृति"[५] इति कर्मणि षष्ठ्याम् 'आढ्य अस् करण' इत्यवस्थायाम् 'उपपदमतिङ्'[६] इति तत्पुरुषसमासे प्रातिपदिकसंज्ञायाम् 'सुपो धातुप्रातिपदिकयोः'[७] इति असो लुकि आढ्यङ्करणशब्दात् "ख्युन उपसंख्यानम्' इति वार्तिकेन ङीपि सौ तस्य लोपे

---

१. अष्टा०, ४।१।१५
२. ,, ३।२।५६
३ ,, ७।१।१
४. ,, ६।३।६६
५. ,, २।३।६५
६. ,, २।२।१९
७, ,, २।४।७१

आढ्यङ्करणी इति निष्पन्नम्। एवमेव असुभगः—धनरूपसौभाग्येन विरहितः कोऽपि पुरुषः सुष्ठुधनसौभाग्येन अन्वितः क्रियतेऽनया इति अर्थविवक्षायां प्रकृतेन ङीपि कृते सुभगङ्करणीति सिध्यति।

अनयोः शब्दयोः अर्थः वर्तते—निर्धनं धनिनं कारयित्री स्त्री। वार्तिकेनानेन निष्पन्नाभ्यामाभ्यां शब्दाभ्यां ज्ञायते यत् कात्यायनकाले स्त्रियः सम्पत्त्यधिकारयुक्ताः अप्यासन्। ताः प्रभूतधनस्य स्वामिन्यः अपि भवन्तिस्म यासां सम्पर्कं प्राप्य ताभिः सह परिणयसम्बन्धं च उपस्थाप्य प्रणयसम्बन्धं वा प्राप्य पुरुषाः तया प्राप्तेन धनेन धनिनः सम्भवन्ति स्म। इति सामाजिक कारणात् एवंविधप्रचलितरूपस्य तदर्थस्य च सिद्धये भगवता कात्यायनेन वार्तिकमिदमुपसंख्यातम्।

गवेषणायाः क्रमे वार्तिकस्यास्य विषये कतिपयरोचकतत्त्वानामुद्भावनमप्यत्र विधीयते—

सर्वप्रथमं वार्तिकमिदं—'टिड्ढाराञ्द्वयसजिति' सूत्रोपरि तिष्ठति। सूत्रस्यास्य स्वरूपविषये एव मतवैभिन्यं तिष्ठति। महाभाष्ये पाणिनीयसूत्रस्यास्य स्वरूपमेवं तिष्ठति—'टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः' अष्टाध्यायी-सूत्रपाठेऽपि एवमेवोपलभ्यते किन्तु वामनजयादित्यविरचितायां काशिकायां, रामचन्द्रस्य प्रक्रियाकौमुद्याञ्च सूत्रस्वरूपे तात्त्विकमन्तरं तिष्ठति—'टिड्ढाणञ्-द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरप्ख्युनाम्' इति तत्र सूत्रपाठः। 'ख्युनाम्' इति तत्र सूत्रे परिवर्द्धनम्। सिद्धान्तकौमुद्यान्तु महाभाष्यसम्मतं 'ख्युनाम्'-इति-विरहितं सूत्रस्य रूपं तिष्ठति। अत्र पक्षद्वयस्यौचित्यमनौचित्यञ्च विचिन्त्यते—

सूत्रे 'ख्युनाम्' इत्यस्य परिवर्द्धितपाठात्पूर्वम् एकं तत्त्वं ध्येयम्—अत्र महाभाष्यकारेण सूत्रांशपूरकं कात्यायनसम्मतं वार्तिकमुपस्थापितम्—'ख्युन उपसंख्यानम्' इति किन्तु तत्रैव वार्तिकस्यास्य पाठेन केषाञ्चन अपरप्रयोगाणां साधुत्वसम्पादनं न भवतीत्यवलोक्य भगवता सूत्रांशपूरकभाष्यं प्रदत्तम्—'अत्यल्पमिदमुच्यते 'नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम्' — नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानं कर्तव्यम्'[1]। **सिद्धान्तकौमुद्याम्** 'नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानमि'त्येव वार्तिकस्वरूपम्। अत्र विज्ञायते यत् भाष्यवचनमेव गृहीत्वा भट्टोजिदीक्षितेन एतत्स्वरूपकस्य वार्तिकस्यास्य उपसंख्यानं कृतम् किन्तु **काशिकायां, प्रक्रियाकौमुद्याञ्च** वार्तिकस्यास्य नेदं स्वरूपं, तत्र तिष्ठति —

'नञ्स्नञीकक्तरुणतलुनानामुपसंख्यानम्' इति। यतः सूत्रे एव यदि 'ख्युनाम्' इति पाठः तदा ख्युन्विरहितं वार्तिकस्वरूपं साधु एव किन्तु यदि सूत्रे एवं पाठ न स्यात् तदा ख्युन्विरहितत्वात् आढ्यङ्करणी, सुभगङ्करणीति वार्तिकेनानेन

१. महा० ४।१।१५

न सिद्धि प्राप्स्यत.। यदि काशिकासम्मतः सूत्रपाठः स्वीक्रियेत तदा कात्यायनवार्तिकं 'ख्युन उपसंख्यानमिति' व्यर्थं स्यात्। यद्येदं विचिन्त्यते यत् काशिकाकारेण प्रक्रियाकारेण च भाष्यवचनमाश्रित्य 'नञ्स्नञीकक्' इति वार्तिकं पठितं तदा इदमपि न समीचीनं यतः उभयत्र वार्तिकचिह्नयुक्तमेव वार्तिकं तिष्ठति। अपरञ्च तत्त्वम् उभयत्र न ख्यातम्। 'नञ्स्नञीकक्तरुणतलुनानामुपसंख्यानमिति' वार्तिकं कात्यायनप्रणीतं न वर्तते नापि च तद्वार्तिकं भाष्यवचनरूपं वर्तते प्रत्युत वार्तिकमिदं सौनागैर्विरचितम्। तच्च 'आढयसुभगेति' सूत्रस्य व्याख्यानक्रमे भगवता पतञ्जलिना स्पष्टीकृतम् यत् नञ्स्नञीकक्ख्युंस्तरुणेति वचनं सौनागैः प्रस्तुतं वर्तते—ख्युनपि सति ईकारेण भवितव्यम्। एवं हि सौनागाः पठन्ति—नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम् इति[1]। तथा च 'स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्' इति सूत्रस्य व्याख्यानभाष्ये अपि महाभाष्ये एवमुल्लिखितम्–'इष्टमेवैतत्संगृहीतम्–स्त्रैणी, पौंस्नीत्येव भवितव्यम्' एवं हि सौनागाः पठन्ति 'नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम्'इति[2]।

'सुनागाचार्यस्य शिष्याः इति सौनागाः' इति पदमञ्जरीकारवचनेन ज्ञायते यत् सुनागाचार्यस्य शिष्याः सौनागशब्देनाभिधीयन्ते स्म। यथा कात्यायनस्य वार्तिकानि पाणिनीयसूत्राणां व्याख्यानार्थं तिष्ठन्ति तथैव सौनागानामपि वार्तिकानि कात्यायनवार्तिकैरवशिष्टानां भाषाप्रयोगाणां संसिद्धये कात्यायनवार्तिकेषु क्वापि न्यूनताधिक्यार्थं वा तिष्ठन्ति। 'टिड्ढाणञ्' इत्यत्र 'ख्युन उपसंख्यानम्' इति वार्तिककथनेन स्त्रैणी, पौंस्नी, शाक्तीकी, याष्टीकीप्रभृतिप्रयोगाणां सिद्धये सौनागानामिदं वार्तिकम्।

एवमवलोक्यते यत् काशिकाकारेण यदि महाभाष्यस्य 'एवंहि सौनागाः पठन्ति' इति विषये ध्यातं स्यात् तदा 'ख्युन उपसंख्यानमि'ति वार्तिकमपि तत्र पठितं स्यात्। यदि सूत्रे एव 'ख्युनाम्' इति भवेत् तदा वार्तिकमेव निरर्थकं स्यात् अतः यदैव भाष्ये 'ख्युन उपसंख्यानम्' इति वार्तिकं दृष्टं तदैव इदं चिन्तनीयं यद् मूलसूत्रं नूनमेव 'ख्युनाम्' इत्यनेन विहीनं स्यात् अन्यथा कथं कात्यायनेन तत्र 'ख्युन उपसंख्यानमिति' वार्तिकमुपसंख्यातम्। सूत्रे ख्युनाम् इत्यभावादेव सौनागैः 'नञ्स्नञीकक्ख्युंस्तरुणेति' पठितम्, यद्येवं स्वीक्रियेत यत् काशिकाप्रक्रियाप्रणेतारः ख्युन्सहितं सूत्रपाठमेवावलोकितवन्तः तदा तत्र इदमपि ध्येयं यत् वार्तिकं क्व गतम्? अतः सर्वथा 'ख्युनाम्' इति सूत्रे पठनं नोचितमेव। प्रदीपकारेणापि

---

१. महा० ३।२।५६

२. ,, ४।१।८७

एतदर्थमिदमुक्तम्—'सूत्रे ख्युनः पाठोऽनार्षः'[1]। पदमञ्जरीकारः हरदत्तोऽपि एवमेव विचारं व्यनक्ति—"भाष्ये तु कञ्क्वरपः" इत्येतावत्सूत्रम्, ख्युनः पाठोऽनार्ष इति तस्याप्युपसंख्यानमेव कृतम्।[2] पदमञ्जरीकारवचनेनापि इदं स्पष्टीभवति यत् यतः सूत्रं 'ख्युनामिति' विरहितमासीत् अत एव तत्र वार्तिकं 'ख्युनः उपसंख्यानमिति'।

महाभाष्यस्य काशिकायाश्च सूत्रस्वरूपविषये यद् डॉ० रमाशङ्करभट्टाचार्यमहोदयैः विलिखितं यत् यतः प्रत्येकस्मिन् सूत्रे महाभाष्यं न लभ्यते, काशिकावृत्तिः प्राचीना तथा च महाभाष्यादपि प्राचीनतरेभ्यः स्रोतेभ्यः अस्य सामग्री आहृतातिष्ठति अत एव च काशिकासम्मतः पाठः एव प्राथम्येन स्थानं प्राप्नोति तदा विषयोऽयं न दोषावहः[3]। किन्तु अस्माकं मते भट्टाचार्यमहाशयानां विचारोऽयं दोषावहः। भाष्यं सर्वत्र न वर्तते किन्तु यत्र भाष्यं वर्तते तत्र कथं काशिकायाः मन्तव्यः स्वीकरणीयः। मौलिकतादृष्ट्या काशिका भाष्यतः सर्वथा न्यूना इति तु स्थूलावलोकनेनैव ज्ञायते। यदि परिवर्तितत्वं तस्य विचारस्वीकारकारणं तिष्ठेत्-यत् परिवर्तितत्वात् तत्र समेषां पूर्वापरविचाराणामेकत्र सङ्कलनं तिष्ठति तदा कथनं श्रीदीक्षितस्य सिद्धान्तकौमुदी सर्वतोभावेन मौलिकरूपेण स्वीकरणीया, यत्र सर्वेषां प्राचीनार्वाचीन विचाराणां यथा सङ्कलनव्याख्यानं च तिष्ठति न तथान्यत्र दरीदृश्यते। अतः सर्वथेदं स्पष्टम् यत् सूत्रे क्वरप्विहीन एव पाठः न्याय्यः तथा कात्यायनस्य मूल वार्तिकं तिष्ठति—'ख्युन उपसंख्यानम्' सौनागैः पठितं वार्तिकं तिष्ठति—नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानमिति।

सौनागवार्तिकेनैव येषां शब्दानां सिद्धिः भवति त इमे वर्तन्ते स्त्रैणी, पौंस्नी, शाक्तीकी, याष्टीकी, तरुणी-तलुनीति। तत्र 'स्त्रीपुंसाभ्यांनञ्स्नञौभवनात्'[4] इत्यनेन स्त्रीशब्दात् स्नञ्, पुंसोऽपत्यन्स्त्रीकन्येत्यर्थे स्नञि, वृद्धौ प्रातिपदिकत्वान्ङसोर्लुकिनस्यणत्वे स्त्रैण इति, स्नञि परे पुंसः पदत्वात् 'संयोगान्तस्य' सलोपे पौंस्नइतिङीपि, अलोपे, स्त्रैणी, पौंस्नी इति रूपम्। प्रहरणवाचकात् प्रथमान्तात् 'यस्येति च'[5] इतीकारलोपे आदिवृद्धौ शाक्तीकशब्दात् ङीपिशाक्तीकी, एवमेव यष्टिः प्रहरणमस्याः सा याष्टीकी। तरुणतलुनयोर्युववाचिनोः ङीपि सिद्धे पुनरत्र वचनं गौरादिष्वपि

१. महा०, प्र० ४।१।१५ ख्युनः उपसंख्यानमिति वार्तिकव्याख्यानक्रमे।
२. का०, पद० ४।१।१५
३. पाणिनीयव्याकरण का अनुशीलन, पृ० ३७७
४. अष्टा०, ४।१।८७
५. ,, ६।४।१४८

पाठात्प्राप्तस्य ङीषो बाधनार्थम्। अन्यथा परत्वादपवादत्वाद्वा 'वयसि प्रथमे' इति बाधित्वा ङीषेव स्यात्। तथा च वार्तिके गौरादौ च पाठात् पर्यायेण ङीप्-ङीषौ भवतः। उद्योतकारमते तु तरुनतलुनशब्दौ प्रत्यग्रवाचकावपि। वयसः प्राणिधर्मत्वात्प्रत्यग्रे 'तरुलुनी', तरुणी, मदिरा-इत्यर्थे ङीप्सिद्ध्यर्थं तयोर्ग्रहणम्, अन्यथा तदर्थेऽपि गौरादावर्थानुपादानेन टापं बाधित्वा परत्वान्ङीषेव स्यात्। वार्तिकस्य पाठे तु उभौ भवतः इत्येव ज्यायान्।

एषां प्रयोगाणां सामाजिकार्थदृष्ट्यापि वैशिष्ट्यम् स्त्रीषु प्रसक्तः पुरुषः स्त्रैणः, तस्य स्त्री इति विवक्षायां 'पुंयोगादाख्यायाम्' इत्यनेन ङीषि स्त्रैणी तु सिद्धियास्यति (पाणिन्यनुसारम्) किन्तु वार्तिकव्युत्पन्ने सूत्रव्युत्पन्ने च स्त्रैणीशब्दे ध्वन्यर्थपरिवर्तनदृष्टया भेदः वर्तते। पाणिनेः स्त्रैणी, स्त्रीषु नितरामासक्तस्य स्त्रीसदृशव्यवहारकारिणो वा पुरुषस्य स्त्री, इत्यर्थं ज्ञापयति किन्तु वार्तिकस्य स्त्रैणीशब्दस्य अर्थविस्तारः—या स्त्री स्त्रियामेव अनुरक्ता सा स्त्रैणी। ङीष सति स्त्रैणी इत्यस्य ई ध्वनिः उदात्तः वार्तिकेन ङीपि ईध्वनिः अनुदात्त, इति स्वरे भेदः। पाणिनेः पौस्नी-पुंसि प्रसक्तः पुरुषः पौस्नः तस्यस्त्री इत्यर्थस्य बोधिका किन्तु वार्तिकस्य पौंस्नी पुरुषे अत्यन्तमासक्तायाः स्त्रियः बोधिका। तात्कालिकसमाजे प्रायः एवंभूताः स्त्रियः अपि आसन् यासां पुरुषेषु आसक्तिः चरमोत्कर्षं प्राप्तासीत् अथवा योनाविकारैः ग्रस्ताः पूर्णतः कामप्रपीडिताः स्त्रियः पौंस्नीशब्देन अभिधीयन्ते स्म। शाक्तीकीयाष्टीकीशब्दावपि एकं नवीनमर्थं सङ्केतयतः। पाणिनिना शाक्तीकयाष्टीकपुरुषाणामुल्लेखस्तु कृतः किन्तु स्वयं शक्त्यस्त्रं यष्टिञ्च प्रहर्तुं समर्थानां नारीणाम् अथवा स्त्रीसैनिकेत्यस्य नोल्लेखः तेन विहितः। वार्तिककारसमये एवंभूताः अपि स्त्रियः आसन् याः स्वयं शक्तिं यष्टिं च प्रहर्तुं समर्थाः आसन्। कौटिल्येन राजभवनस्य रक्षार्थं नियुक्तानां स्त्रीणामुल्लेखः कृतः[1]। तरुणीतलुनीशब्दयोरपि अर्थविशेषः। पुंयोगादाख्यायामिति व्युत्पन्ना तरुणीतलुनी, तरुणपुरुषस्य स्त्री इत्यर्थस्य बोधं कारयति किन्तु सा स्त्री बाला, युवती, वृद्धापि भवितुं शक्नोति किन्तु वार्तिकव्युत्पन्ना तरुणी-तलुनी वा स्वयं तारुण्यप्राप्ताया स्त्रियः बोधिका।

एवं वार्तिकमिदं विभिन्ननवीनेऽर्थेषु एषां प्रयोगाणां भाषायां प्रचलनं प्रदर्शयति।

भा०—शकन्ध्वादिषु च	(६।१।६४)
का०—शकन्ध्वादिषु पररूपं वक्तव्यम्	(")
प्र०—शकन्ध्वादिषु पररूप वाच्यम्	(")
सि०— " " "	(१।१।६४)

१· अर्थ० १।२०

शकन्धुः, कर्कन्धु, कुलटा, मनीषा, हलीषा, लाङ्गलीषा, पतञ्जलिः, मार्त्तण्डः, इत्येतेषां तथा एतादृशामेव समर्थकतन्त्वेत्यादिशब्दानां पररूपसिद्धिः "एङि पररूपम्"[१] "ओमाङोश्च"[२] इति पररूपसाधकाभ्यां सूत्राभ्यां न भवति अतः कात्यायनाचार्यः शकन्ध्वादिषु पररूपं वाच्यमिति'[३] वार्तिकं प्रस्तौति तन्मते शकन्ध्वादिगणे पठितानां शब्दानां विषये तत्सिद्ध्यनुगुणं पररूपं भवति। तच्च पररूपं टेः भवति—"तच्च टेः"[४]। एवं च शकन्ध्वादिशब्दानां टेरचि परे टेश्च परस्य अचश्च स्थाने पररूपमेकादेशः इत्यर्थः लभ्यते। शकन्ध्वादिगणः, आकृतिगणः अत्र श्रीमता भट्टोजिदीक्षितेन इमे शब्दाः पठिताः—शकन्धुः, कर्कन्धुः, कुलटा। सीमन्तः केशवेशे। हलीषा, मनीषा, लाङ्गलीषा, पतञ्जलिः। "सारङ्गः पशु-पक्षिणोः" इति शकन्ध्वादिः[५]। वार्तिककारमते यदि शकन्ध्वादिगणे एषां शब्दानां पाठः नाभविष्यत् तदा तेषु प्रयोगेषु पररूपविधानं नाभविष्यत् तद्यथाशकानां देशविशेषाणाम् अन्धुः कूपः—इति स्थिते सवर्णदीर्घे प्राप्ते अनेन पररूपम् एवमेव कर्क-अन्धुः इत्यत्रापि सवर्णदीर्घस्थाने पररूपं भवति। कुलेषु भिक्षार्थं व्यभिचारार्थं वा अटति इति विग्रहे कुल अटा इति स्थिते अनेन पररूपम्। मनषः ईषेति विग्रहे असिति टेरीकारस्य च स्थाने पररूपमीकारः। पतन् अञ्जलिर्यस्मिन् नमस्कार्य-त्वादिति विग्रहे, पतत् अञ्जलिः इति स्थिते अदिति टेरकारस्य च स्थाने पररूप-मकारः। एवमेव सीम्नः अतः इत्यत्र सीमन्शब्दस्य टेः, अनित्यस्य अन्तशब्दस्या-वर्णस्य च स्थाने पररुपम्। हलस्य ईषा, लाङ्गूलस्य ईषा इत्यत्र गुणे प्राप्ते पररूपम्। अण्डेः मृतः इति विग्रहे मृत अण्डः इति स्थिते सवर्णदीर्घं प्रबाध्य पररूपे कृते मृतण्डः, मृतण्डस्य अपत्यं पुमान् मार्तण्डः इति अथवा मार्तअण्ड इति स्थिते दीर्घं प्रबाध्य पररूपे मार्तण्ड इति सिद्ध्यति।

एवं 'शकन्ध्वादिषु पररूपंवाच्यम्' इति वार्तिकेन उपरिचर्चितानां प्रयोगाणां सिद्धिः भवति। अत्रेदं विचार्यते-एते सर्वे प्रयोगाः पाणिनीयसूत्रेणैव सिद्धि यान्ति न वा, यदि यान्ति तदा का आवश्यकता वार्तिकस्यास्य उपसंख्यानस्य? किन्तु सर्वप्रथमम् इदं विचिन्त्यते यद् वार्तिकस्यास्य किमभिधानं वर्तते? काशिकायां

---

१. अष्टाध्यायी, ६।१।९४
२. ,, ६।१।९५
३. सिद्धान्तकौमुदी, अचोऽन्त्यादिटि-सूत्रस्थं वार्तिकं, तत्त्वबोधिनीटीकायुक्तं पृ० २१, सप्तमं संस्करणम्।
४. सि० कौ०, पृ० २१
५. ,, ,, पृ० ७२५

शकन्ध्वादिषु पररूपं वक्तव्यमिति[1] प्रक्रियाकौमुद्यां शकन्ध्वादिषु पररूपं वाच्यमिति[2] तथैव सिद्धान्तकौमुद्यां शकन्ध्वादिषु पररूपं वाच्यमित्यस्य वार्तिकस्याभिधानं वर्त्तते किन्तु एभिः सर्वेभ्यः आचार्येभ्यः समयदृष्ट्या प्राचीनतरः, महत्त्वदृष्ट्यापि सर्वथा आदरणीयः भगवान् इति विशेषणेन बुधैः आख्यातव्यः आचार्यः पतञ्जलिः महाभाष्ये 'शकन्ध्वादिषु च'[3] इति पठति तथा च वार्तिकविश्लेषणक्रमे कथयति— 'शकन्ध्वादिषु पररूपं वक्तव्यम्,' यद्यपि क्वापि अभिधेये वैषम्यं न तिष्ठति किन्तु अस्य वास्तविकं कात्यायनप्रोक्तम् अभिधानन्तु 'शकन्ध्वादिषु च' इत्येव विद्यते।

एतदनन्तरं इदमपि स्पष्टीक्रियते यत् भट्टोजिदीक्षितेन—'अचोऽन्त्यादिटि'[4] इति सूत्रे अस्य वार्तिकस्य उल्लेखः विहितः किन्तु महाभाष्यकाशिकाप्रक्रियाकौमुदी-प्रभृतिषु 'एङि पररूपम्' इति सूत्रे वार्तिकमिदं निर्दिष्टम्। तथा च इदमेव समीचीनं प्रतिभाति यतः 'अचोऽन्त्यादिटि' इति सूत्रम् टिसंज्ञाविधायकम्। टिसंज्ञायाः अनेकानि फलानि वर्तन्ते तद् यथा 'टेः–'[5] टिति परे डिति परे अभस्यापि टेर्लोपः, वाक्यस्य टेः प्लुत उदात्तः,[6] दूराद्धूते च[7] इत्यादीनि, किन्तु 'एङि पररूपम्' इति सूत्रन्तु केवलं पररूपविधायकम्, इदं वार्तिकं च सूत्रेणानेन असाधितेषु पररूपविधानं विधत्ते। अतः 'एङि पररूपम्' इति सूत्रस्थमेव वार्तिकमिदं उपपन्नम्।

महर्षिपाणिनिसूत्रैः पूर्वोक्तानां प्रयोगाणां साधुत्वनिरूपणक्रमे प्रथमम् इदं विचार्यते यत् किमेते शब्दाः शकन्ध्वादिगणे एव पठिताः अथवा पाणिनीयगणेष्वपि एषां क्वापि पाठः वर्तते। तत्र कुलटाशब्दस्य पात्रे समितादिगणे[8] श्रमणादिगणे[9]

---

१. काशिकावृत्तिः—पृ० ५६२, चतुर्थोभागः, तारा पब्लिकेशन्स, वाराणसी १९६७
२. प्रक्रियाकौमुदी, पृ०—६४ प्रथमोभागः
३. महाभाष्यम्—पृ० ६।१।९४
४. अष्टाध्यायी—१।१।६४
५. ,, —६।४।१४३ तथा ६।४।१५५
६. ,, ८।२।८२
७. ,, ८।२।८४
८. गणरत्नमहोदधिः, पृ० १४९

मातरिपुरुषोदुम्बरमशकौ गेहेविचित्यपि प्रोक्तः।
श्रमणा प्रव्रजिताथो कुलटा पटुना च मृदुनापि॥

९. गणरत्नमहोदधिः, पृ० १५० 'कुमारकुलटा'।

पाठः विद्यते तथा कुलटासहितशकन्धुकर्कन्धुमनीषासीमन्तशब्दानां पृषोदरादिगणे[1] पाठः तिष्ठति। 'पृषोदरादीनियथोपदिष्टम्'[2]-पृषोदरगणपठिताः शब्दाः यथोपदिष्टम् साधवः भवन्ति, शकन्धुः, कर्कन्धुः, मनीषा, कुलटा, सीमन्तः इतिप्रयोगाः पृषोदरादिगणपठिताः यथोपदिष्टेन साधवः भवन्ति, एषु सर्वेषु स्थलेषु पृषोदरादित्वात् टिलोपेनैव कार्याणि सेत्स्यन्ति तथा च पृषोदरादयः अपि तेनैव सम्पन्नाः भविष्यन्ति, 'शकन्ध्वादिषु च' इति वार्तिकेनालम्। प्रक्रियाकौमुद्याः प्रसादटीकायामपि एवमेव समर्थितम्[3]। श्रीमद्वामनजयादित्यविरचिता काशिकावृत्तिस्तु समाधानान्तरं प्रस्तौति। कुलटाया वा[4] इति सूत्रस्य व्याख्यानक्रमे कुलटा-इत्यस्य साधुत्वविषये काशिकाया-मुल्लिखितम्-'पररूपं निपातनात्'।

अत्रापरं च समाधानं—काशिकायाः न्यासाख्यटीकाकारः जिनेन्द्रबुद्धिः आह "उत्तरसूत्रे चकारोऽधिकविधानार्थः, तेन शकन्ध्वादिषु पररूपं भविष्यति।"[5] एतस्य व्याख्यानस्य इदं तात्पर्यम् "ओमाङोश्च" इति सूत्रे चकारः अधिकविधानार्थः, तथा चायमर्थः सम्पत्स्यते-ओमिआङि च परे आत्—अवर्णात् पररूपं स्यात् तथा च क्वचित् इष्टस्थले अचोः-उभयोः अचोः—पररूपं भवेत्। तच्च पररूपं टेः भवति अतः सूत्रबलेनैव एषां शब्दानां साधुत्वं भविष्यति, तद्यथा पतञ्जलिः-पतत् अञ्जलिः इति दशायाम् "ओमाङोश्च" इति सूत्रस्थचकारबलेन अचोः—पत इत्यत्र तकारावयवाकारस्य अञ्जलेः अकारस्य च पररूपं भविष्यति तच्च पररूपं टेर्भवति, एवं च अचां मध्ये अन्त्यः अच् वर्त्तते पतोत्तराकारः, स अत् इत्यस्य आदिः विद्यते तस्यैव पररूपं भविष्यति। लघुशब्देन्दुशेखरे पतञ्जलिरित्यस्य समाधानान्तरं कथयति महामहोपाध्यायः नागोजीभट्टः-पतञ्जलिरिति तु अञ्जलेः पतित इति विग्रहे मयूरव्यंसकादित्वात्समासे तत्रैव निपातनादितशब्दस्य लोपे पृषोदरादित्वाद्वा तल्लोपे साधु।[6] मनस् ईषा इत्यत्र सीम इत्युत्तराकारस्य अन्

१. गण०, पृ० १८५ तथा १८४।
अवटकुलटे प्रायश्चितं परश्शतषूर्जटी ... ...
सीमन्ताश्चश्मशानमनीषिते ~ ... ... ॥
शकन्धुकर्कन्धुदधित्थवृष्णौ ... ... —

२. अष्टाध्यायी, ६।३।१०९

३. अष्टाध्यायी, ४।१।१२७

४. काशिका तृतीयोभागः पृ० ४६४

५. काशिका, चतुर्थोभागः पृ० ५६२

६. लघुशब्देन्दुशेखरः, चौखम्बा संस्कृत सीरीज प्रकाशनम् १९८३, पृ० १४४

भागस्य च पररूपे, हल ईषा इत्यत्र हलोत्तराकारस्य, लाङ्गल ईषा इत्यत्र लाङ्गलोत्तराकारस्य च पररूपे, शक अन्धुः, कर्क अन्धुः, मृत अण्डः इति सर्वेषु स्थलेषु "ओमाङोश्च" इत्यत्र चकारबलेन पररूपसिद्धिः एवमेव कुलेषु भिक्षार्थं व्यभिचारार्थं वा अटति इति कुलटा इत्यत्रापि अटतीति अटा कुलस्य अटा, पचाद्यच्[१], स्वकुलं परित्यज्य व्यभिचारार्थं भिक्षार्थं वा कुलान्तरम् अटति इति विग्रहे "कर्मण्यण्"[२] इति अणि कृते दीर्घे, अण्णन्तत्वात् "टिड्ढाणञ्"[३] इति ङीपि कुलाटी इति अनिष्टप्रयोगः स्यात्[४] किन्तु इदमत्र ध्येयम्—"नन्दिग्रहिपचादिभ्योल्युणिन्यचः" इत्यतः "कर्मण्यण्" इति परकार्यम् अतः तस्य परत्वात् प्रवृत्तिः भविता किन्तु जारं बिभर्तीति विग्रहे, श्वानं पचतीति विग्रहे च कर्मण्यण् इति सूत्रं प्रबाध्य पचाद्यच् एव प्रवर्त्तते अतः जारभरा, श्वपचा इति प्रयोगद्वयं सिद्ध्यति तथा इहापि अणम् अपवाद्य अच्प्रत्ययः भविष्यति अतः कुलस्य अटा, कुलेषु अटा, अथवा कुलानि अटा एषु सर्वेषु विग्रहेषु कुलटा इत्येव भविष्यति ।

काशिकायाः पदमञ्जर्यान्तु एकम्[५] अपरं समाधानम् तिष्ठति मूलविभुजादिः आकृतिगणः, अतः मूलविभुजादित्वात् कुलानाम् अटा इत्यत्रकप्रत्यये "कप्रकरणे मूलविभुजादिभ्यः उपसंख्यानम्"[६] इति वार्त्तिकेन—मूलानि विभुजति इति मूलविभुजोरथः यथा भवति तथैव कुलानि अटति इति विग्रहेऽपि कप्रत्ययेन कुलटेत्यस्य सिद्धिर्भविष्यति । इह कुलअटा इति स्थिते "अकः सवर्णे दीर्घः"[७] इति दीर्घं प्रबाध्य ओमाङोश्च इत्यनेन पररूपे कुलटा इति निष्पद्यते ।

समेषां शकन्धुकर्कन्धुप्रभृतिशब्दानां पाणिनिसूत्रैरेव समाधानं भवति इति तु निश्चितमेव । कुलटाया वा, सर्वत्र लोहितादिकतन्तेभ्यः[८], प्रोपाभ्यां समर्थाभ्याम्[९] एषु सूत्रेषु स्वयं महर्षिणा पररूपं कृतम् । लक्ष्यैकचक्षुष्काः मुनयः लक्ष्यानुसारं

---

१. नन्दिग्रहिपचादिभ्योल्युणिन्यचः, अष्टा०, ३।१।१३४
२. अष्टाध्यायी, ३।२।१
३. अष्टा०, ४।१।१५
४. तत्त्वबोधिनी, सि० कौ० पृ० २१
५. मूलविभुजादिषु दर्शनात्मकः प्रत्ययः काशिका, तृतीयोभागः, पृ० ४६४
६. सि० कौ०, पृ० ५९१
७. अष्टा०, ६।१।१०१
८. " ४।१।१८
९. " १।३।४२

सूत्राणि रचयन्ति। महर्षेः पूर्वं तात्कालिकसमाजे वा कुलटामनीषी-शब्दाः प्रचलिताः आसन्, स्वयं महर्षिणा 'कुलटायाः वा' इति निर्दिष्टम्। मनीषीशब्दस्तु वेदे प्रयुक्त एवासीत्। अतः सर्वथा महर्षिः पाणिनिः एषां साधुत्वं ज्ञातवान् आसीत् तथा च पृषोदरादिगणपठितत्वाद् निपातनाद्, 'ओमाङोश्च' इत्यत्र चकारबलेन च एषां सिद्धिः संजायते, "शकन्ध्वादिषु च" इति वार्तिककथनम् व्यर्थमेव। प्रक्रियाकौमुद्याः प्रसादाख्ये व्याख्याने इदमेवमतं समर्थितम्।[1] वैयाकरणाः एषां प्रयोगाणां साधुत्वनिष्पादनसन्दर्भेपरस्परं मतवैभिन्यं भजन्ते। श्रीमान् भट्टोजिदीक्षितः, आचार्यः रामचन्द्रः, लघुशब्देन्दुशेखरविरचयिता नागोजीभट्टः काशिकायाः पदमञ्जरीव्याख्यानकर्त्ता हरदत्तः तथा स्वयं भगवान् पतञ्जलिः, इमे सर्वे कात्यायनमतं समर्थयन्ति। तत्र भगवान् पतञ्जलिः वार्तिकमिदम् उपसंख्यान-वार्तिकाभिधानेन प्रस्तौति तथा शकन्ध्वादिनैवकुलटा, सीमन्तशकन्धुशब्दानां साधुत्वं प्रतिपादयति।[2] अत्र सर्वथा भगवतः मौनावलम्बनम् आलोचकैः विद्वद्भिः मृग्यम्।

सिद्धान्तकौमुद्यां भट्टोजिदीक्षितस्तु सप्रयासं वार्तिकस्यास्य प्रामाण्यं प्रमाणीकरोति। प्रोपाभ्यां समर्थाभ्यामिति सूत्रस्य व्याख्यानक्रमे अयं महाशयः कथयति शकन्ध्वादित्वात् पररूपम्[3] यदा स्वयमेव पाणिनिना निर्दिष्टम् कुलटायाः वा, प्रोपाभ्यां समर्थाभ्यामिति तदा का आवश्यकता वरीवर्ति शकन्ध्वादिना पररूप-सिद्धेः? अयमेव महाशयः निजप्रौढमनोरमायामिदं स्वीकरोति यत् केचन पृषोदरादित्वाद् वा एषां सिद्धिम् अनुमन्यन्ते।[4] अत्र व्याख्यानक्रमेण शब्दरत्नाकरः' आह यदत्र अरुचिबीजम् उद्भावयति वचनद्वयव्यापारः यदि पृषोदरादित्वादेव

---

१. अथवा 'ओमाङोश्च' इत्युत्तरसूत्रे चकारोऽधिकविधानार्थः। तेनैतेषां पररूपं स्यात्। तच्च मनः पतच्छब्दयोष्टेर्भवति। तस्य चकारस्याधिक-विधानार्थत्वं न्यासकारोऽचकथत्। उत्तरसूत्रे चकारोऽधिकविधानार्थस्तेन शकन्ध्वादिष्वपि पररूपं भविष्यति इति।

२. उपसंख्यानवार्तिकम्—'शकन्ध्वादिषु च'

भाष्यम्–शकन्ध्वादिषु पररूपं वक्तव्यम्। शक अन्धुः–शकन्धुः, कुल-अटा–कुलटा, सीम-अन्तः–सीमन्तः। केशेष्विति वक्तव्यम्। यो हि सीम्नोऽन्तः, सीमान्तः स भवति। महाभाष्यम् ६।१।९४।

३. सि० कौ०, पृ० ४५८

४. प्रौढमनोरमा—

केचित्तुमनःपतच्छब्दयोः पृषोदरादित्वादन्त्यलोपेऽकारस्यैव पररूपमाहुः।

सिद्धिः तदा तेनैव टिलोपेकृतेस्वयमेव सिद्धिः भवति पररूपस्य आवश्यकतैव न तिष्ठति ।[1] एतेन इदं स्पष्टं यत् भट्टोजिदीक्षितमहाशयः अनावश्यकमेव कात्यायनमतं समर्थयन् पाणिनीयसूत्राणामपि समाधानं वार्तिकतः एव करोति ।

एवमेव हरदत्तः 'शकन्ध्वादिषु च' इत्यस्य व्याख्यानक्रमेण कथयति 'शकन्ध्वादयः प्रयोगतोऽनुसर्तव्याः, तेषु पररूपं वक्तव्यम्', कुलटाया कतन्तेभ्यः—इत्यादिनिर्देशोऽस्मिन्नर्थे लिङ्गम् ।[2] अत्र तेनेदं विवेचितं यत् पाणिनीयसूत्रनिर्देशादेव एषु स्थलेषु कात्यायनेन, पररूपं कृतं, 'प्रोपाभ्यां समर्थाभ्याम्' इतिसूत्रस्य विश्लेषणक्रमे स कथयति—'एतेन समोऽर्थो यथोरिति समर्थौ शकन्ध्वादित्वात्पररूपम् ।'[3] एतेन तस्यापि वार्तिकपक्षपातित्वमेव प्रतीयते किन्तु स एव महाशयः 'सर्वत्रलोहितादिकतन्तेभ्यः' इति सूत्रविवेचनक्रमेण शकन्ध्वादित्वात् निपातनाद् वा पररूपसिद्धि मनुते—'कतन्त' इत्यत्र[4] । अनेन सिद्धं यद् सोऽपि परस्परविरोधिविचारमेवाश्रयन् तिष्ठति । एवमेव श्रीमान् नागोजीभट्टोऽपि 'कतन्त' इत्यस्य शकन्ध्वादित्वात् पररूपसिद्धि समर्थयति किन्तु पतञ्जलिशब्दस्य सिद्धि शकन्ध्वादित्वाद्, निपातनाद्, पृषोदरादित्वाद् वा स्वीकरोति[5] । वैयाकरणानाम् अपरोऽपि विशिष्टः पक्षः यः निपातनाद्, ओमाङोश्च इति चकारबलेन, पृषोदरादित्वाद्वा एषां प्रयोगाणां सिद्धि मनुते तथा कात्यायनस्य शकन्ध्वादिषु चेति वार्तिकं व्यर्थमेव प्रमाणयति ।

एषां सर्वेषां वैयाकरणानां मतं समवलोक्य वयम् अमुं निष्कर्षं प्राप्नुमः यत् पाणिनिमतेनैव एषां प्रयोगाणां साधुत्वं सञ्जायते अतः 'शकन्ध्वादिषु च' इति वार्तिकस्य कापि आवश्यकता न तिष्ठति । भट्टोजिदीक्षितादीनाम् एषु लक्ष्येषु शकन्ध्वादिना यत् पररूपम् उक्तं तद् वाग्विलासमात्रम्, कात्यायनपक्षसमर्थनमूलकं दुराग्रहरूपमेव ।

---

१. प्रौढमनोरमा, पृ० १२८
२. काशिका०, पदमञ्जरी, चतुर्थोभागः, पृ० ५६२
३. काशिका०, पद०, प्रथमोभागः, पृ० ४४३
४. कतस्यान्तः समीपभूतः कतन्त इति ... ...
... .. शकन्ध्वादित्वान्निपातनाद्वा पररूपम् ।
का०, पद०, तृतीयोभागः, पृ० ३०३ ।
५. क कतन्तशब्दे शकन्ध्वादित्वात्पररूपम्—लघुशब्दे०, पृ० ५६३ ।
ख. लघुशब्दे०, पृ० १४४ ।

कुलटाशब्दस्य विषये एकं भाषावैज्ञानिकं रोचकं तथ्यं वर्तते। पतिव्रतापि नारी कुलेषु कुलान्तरम् वा भिक्षार्थम् अटति सा कुलटा तथा व्यभिचारार्थं या कुलेषु अटति कुलानि अटन्ती शीलं भिनत्ति सापि कुलटा। एवमवगम्यते यत् महर्षिपाणिनेः समसामयिके समाजे कुलटाशब्दस्य अर्थद्वये व्यवहारः आसीत् पतिव्रतापि नारी उदरपोषणार्थं सन्ततिपालनार्थं वा कुलेषु भिक्षार्थम् अटति सा कुलटा एवञ्च एकत्र कुले प्रविष्टा स्वैरिणी या कुलान्तरमटति सा दुःशीलापि कुलटा। इहापि एकं रोचकं तथ्यम्–कुलटाद्वयोः अपत्यार्थे प्रयोगवैभिन्यं तिष्ठति। भिक्षुण्याः सत्याः कुलटायाः अपत्यं पुमान् इत्यस्मिन्नर्थे स्त्रीभ्योढक् (४।१।१२०) इति सूत्रेण अपत्यार्थे ढक् प्रत्यये, "कुलटाया वा" इत्यनेन इनङादेशे च कौलटिनेयः, इनङादेशस्य विकल्पपक्षे कौलटेयः इति भवति किन्तु व्यभिचारिण्याः दुःशीलायाः वा कुलटायाः अपत्यपुमान् इत्यस्मिन्नर्थे "क्षुद्राभ्यो वा" इति द्रकिकृते कौलटेरः इति भवति, विकल्पपक्षे कौलटेयः इत्यपि रूपम्। अमर-सिंहोऽपि इदं समर्थयति—

अथ बान्धकिनेयः स्याद्बन्धुलश्चासतीसुतः।
कौलटेरः कौलटेयो भिक्षुकी तु सती यदि।
तदा कौलटिनेयः स्यात् कौलटेयोऽपि चात्मजः॥

कालान्तरे समाजे कुलटाशब्दस्य भिक्षुकीत्यर्थः संकुचितः, केवलं दुःशीलायै अस्य सम्प्रति व्यवहारः। अर्थसंकोचस्य अयं शब्दः विलक्षणनिदर्शनत्वेन तिष्ठति।[1]

भा०	—	व्याधिमत्स्यबलेषु	(३।३।१७)
का०	—	व्याधिमत्स्यबलेष्विति वक्तव्यम्	(,,)
प्र०	—	व्याधिमत्स्यबलेषु च	(,,)
सि०	—	व्याधिमत्स्यबलेषु च	(,,)

सर्तेर्धातोः स्थिरेऽर्थे कर्तरि घञ्प्रत्ययः विधीयते, इत्यर्थके सृ स्थिरे[2] इति सूत्रे स्थिर इति कालान्तरस्थायी पदार्थ उच्यते, स चिरं तिष्ठन् कालान्तरं सरतीति धात्वर्थस्य कर्ता युज्यते यतः कालान्तरगमनं सम्भवति, ततश्च सर्तेर्धातो-रर्थस्य कर्ता युज्यत इत्यर्थः। प्रदीपमते स्थिरः कालान्तरस्य प्रापकोऽर्थः[3]।

---

१. 'शकन्ध्वादिषु पररूपं वाच्यमिति वार्तिकस्य विश्लेषणात्मकं विवेचनम्' इति निबन्धः अखिलभारतीयप्राच्य विद्यासम्मेलने, पूना इति नगरे पठितः।

२. अष्टा०, ३।३।१७

३. महा०; प्र०, ३।३।१७

किन्तु वार्तिकविधानम् अस्थिरार्थं कृतम् तथा च व्याधि, मत्स्य, बल-इत्येतेषु अर्थेषु सृधातोः घञ्प्रत्ययः भवति इति वार्तिकार्थः। यथा—अतीसारो व्याधिः-रूधिरादिकम् अतिशयेन सारयति—शरीरान्तरावस्थितं रूधिरादिद्रव्यमतिशयेन सारयतीति कृत्वा इत्यर्थे अतिपूर्वकात् सृधातोः घञ्प्रत्यये, अनुबन्धलोपे 'अचो-ञ्णिति' इति वृद्धौ, रपरत्वे, 'उपसर्गस्य घञ्मनुष्ये बहुलम्'[1] इति दीर्घे अतीसारः इति। एवं विविधं सरति गच्छति इति विसारो मत्स्यः—इत्यत्र एकदेशस्य कालान्तराप्राप्त्या अस्थिरत्वमिति सूत्रेण नाप्रवृत्तिः प्रत्युत वार्तिकेन सिद्धिः। सारयति चेष्टयतीति सारो बलम् इत्यपि शरीरे दृढत्वादेव तत्रापि सारशब्दः सिद्धः तथा च महाभाष्ये उदाहृतम्–शालसारः। काशिकायां खदिरसारः, इति सूत्रेणैव सिध्यति खदिरास्थि, तत् दृढत्वात् स्थिरम्; किन्तु भाष्ये वार्तिकोदाहरण-क्रमेण खदिरसारः इति पठितः। अत्र प्रदीपकारेण न किञ्चिदपि लिखितं किन्तु उद्योतकारेण एवं चिन्तितं यत् 'खदिरसारादौ कैयटोक्त—स्थिरत्वाभावश्चिन्त्यः तस्मात्सूत्रस्यै विषयपरिगणनमिदम्। त्रिष्वेकरूपास्थिरत्वस्य कैयटोक्तस्थिरत्व-प्रतिद्वन्द्विनो निरूपयितुमशक्यत्वाच्चेत्यन्ते'[2]। वार्तिकस्यास्य परिशीलनेनेदं ज्ञायते यत् चन्दनसारः, खदिरसारः; इत्यादिरूपाण्यवलोक्य तत्सादृश्यात् अतीसारः, विसारः, इत्यादिरूपाणि प्रचलितानि तथा च रूपपरिवर्तनं भाषायां समागतम् एवञ्च आर्थिकपरिवर्तनमपि द्योत्येतऽत्र यतः सूत्रेण स्थिरेऽर्थे घञ्प्रत्ययः भवति किन्तु वार्तिकेनानेन विहितः घञ्प्रत्ययः अस्थिरार्थकः एवञ्च स्थिरार्थतः भिन्ने अस्थिरे इति नवीनेऽर्थे वार्तिकप्रवृत्त्या अर्थपरिवर्तनं सूच्यते।

भा०, सि०—इषेरनिच्छार्थस्य (३।३।१०७)
का० —इषेरनिच्छार्थस्य युज् वक्तव्यः ,,
प्र० —इषेरनिच्छार्थात् ,,

अनिच्छार्थकात् 'इष आभीक्ष्ण्ये', 'इष गतौ वा' इति धातोः युच्प्रत्ययः भवति। युचश्चकारश्चिन्त्यप्रयोजनः, उदात्तः इति हि वर्तते तत्सामर्थ्यादन्तोदात्तत्वं भविष्यति प्रत्ययस्वरेणैवाद्युदात्तत्वसिद्धेः। अन्-पूर्वकात् इष् धातोः प्रकृतवार्तिकेन युच्प्रत्यये, अनादेशे, गुणे, अनु एषणा इत्यवस्थायाम् यणादेशे अन्वेषणा इति सिध्यति। इच्छार्थे इषधातोः इच्छा इत्येव रूपम् भवति।

अत्र इषधातोः मूलार्थतः इच्छाकरणम् इतितः विपरीतः गवेषणारूपः अर्थः व्यज्यते, एवं नवीनार्थस्य आदेशात्मकमर्थपरिवर्तनं वार्तिकेनानेन परिज्ञायते।

---

१. अष्टा०, ६।३।१२२
२. महा०; उद्यो०, ३।३।१७

अन्वेषणाशब्दः अनुसंधाने, गवेषणे, नष्टद्रव्यस्य दर्शनाय लाभाय वा व्यापारभेदे। "रन्ध्रान्वेषणदक्षाणां द्विषामामिषितां ययौ" इति रघुवंशे।

भा०— नञो नलोपे अवक्षेपे तिङ्युपसंख्यानम् (६।३।७३)

का०—(१) नञो नलोपोऽवक्षेपे तिङ्युपसंख्यानम् ,,

(२) नञो नलोपस्तिङि क्षेपे (२।२।६)

प्र०— नञो नलोपस्तिङि क्षेपे (६।३।७४)

सि०— ,,

अवक्षेपः—निन्दा, उत्तरपदे नलोपो विधीयमानस्तिङन्ते न प्राप्नोति, तस्मात् तस्योपसंख्यानं विधेयम्। ननु चास्त्येवाकारः प्रतिषेधवाची, अमानोनाः प्रतिषेधवचनाः इति वचनात्, ततश्च तस्यैवावक्षेपे तिङि प्रयोगो भविष्यतीति किं वार्तिकोपसंख्यानेन ? नञोऽपि तर्ह्यवक्षेपे तिङि परतः प्रयोगः प्राप्नोति। तस्मादवक्षेपे नञोऽकृतनलोपस्य प्रयोगनिवृत्त्यर्थमुपसंख्यानं करणीयमिति। एवं तिङन्ते परे सति नञः नस्य लोपः भवति तस्य समासत्वञ्च जायते। उदाहरणम् अपचसि वै त्वं जाल्म, अकरोषि वै त्वं जाल्म, अपठसि रे त्वं मूर्ख, कुत्सितं पचसि करोषि पठसि वा रे मूर्ख इति विग्रहे पच्, कृ, पठ्–तिङन्तेषु परेषु सत्सु 'नञ्'[1] इत्यनेन नञ् समासः। न पठसि, न करोषि, न पचसि, इत्यादीनी एव रूपाणि भवन्ति, किन्तु भाषायाम् अपचसीत्यादिप्रयोगाः व्यवहारे समायाताः येषां सिद्धयर्थं प्रकृतस्य विधानमाचार्येण कृतम्।

अत्र 'न पचसि' इत्यस्यार्थः पाकं न करोषि, इति भवति किन्तु प्रकृतेन नञ्समासविधाने सति अपचसीति कुत्सितपाकार्थे प्रयुज्यते। एवमत्र अर्थसङ्कोचदिशा अर्थपरिवर्तनम्। न पचसि, न करोषि, न पठसि इत्याद्यर्थस्थाने कुत्सितं पचसि, कुत्सितं करोषि, अश्लीलम्-अशुद्धं वा पठसि इत्यर्थः एव समागतः एवञ्च अर्थसङ्कोचदिशात्र अर्थपरिवर्तनं संजातम्।

भा० —प्रादयः क्तार्थे (२।२।१८)

का०, प्र०, सि०—प्रादयो गताद्यर्थे प्रथमया ,,

कुगतिप्रादयः[2] इति सूत्रस्थं वार्तिकमिदम्। कात्यायनकृतं वार्तिकं प्रादयः क्तार्थे इत्येव वर्तते। एतदेव वार्तिकं भाष्यकारमते सौनागैर्विस्तरतरकेण पठितम्—प्रादयो गताद्यर्थे प्रथमया इति[3]। प्रादयः उपसर्गाः क्तार्थे समस्यन्त इति वक्तव्य इति

१. अष्टा०, २।२।६
२. अष्टा०, २।२।१८
३. महा०, २।२।१८

कात्यायनकृतवार्तिकार्थः। उदाहरणम्—प्रगतः आचार्यः, प्राचार्यः, प्रान्तेवासी, प्रपितामहः। प्रादयो गताद्यर्थे प्रथमया इति कथनेन ज्ञायते यत् गतविगतादिषु अर्थेषु प्रादयः उपसर्गाः प्रथमान्तेन सह समस्यन्ते। प्रगतः आचार्यः इति विग्रहेण गत इत्यर्थे समासवृत्त्यस्वपदविग्रहत्वात् नित्यसमासतायाः द्योतनं वार्तिकमिदं करोति। तथैव प्रगतः अन्तेवासी प्रान्तेवासी, प्रगतः पितामहः—प्रपितामहः [प्रगतः थातामहः प्रमातामहः] एषु सर्वत्र 'कुगतिप्रादयः' इति सूत्रेण प्रगतः आचार्यम् इत्यस्मिन्नपि अर्थे समासः न भवेत् एतदर्थमेव वार्तिकस्यास्य विधानं कृतमस्ति। एवं वार्तिकमिदं प्राचार्यशब्दस्यार्थं सङ्कुचितं करोति।

प्रपितामहशब्दस्य व्यवहारः वैदिकभाषायामपि उपलभ्यते,[1] महाभारते च मिलति[2]। पाणिनि सूत्रेण एतस्य प्रयोगस्य सिद्धेरनिर्दिष्टत्वात् तथा प्राचार्य-प्रान्तेवासिप्रभृतिप्रयोगाणामपि बहुशः प्रचलनात् च वार्तिकस्यास्य विधानम् कृतम् कात्यायनेन।

भा०—पुरुषाद्वधे	(५।१।१०)
का०—पुरुषाद्वधविकारसमूहतेन कृतेष्विति वक्तव्यम्	(,,)
प्र०, प्र०—पुरुषात्तु हिते वधेवृन्दे विकारे तत्कृते च ढञ्	(,,)
सि०—पुरुषाद्वधविकारसमूह तेन कृतेषु	(,,)

कात्यायनप्रणीतं वार्तिकं 'पुरुषाद्वधे' इत्येव वर्तते। पुरुषशब्दात् 'सर्व-पुरुषाभ्यां णढञौ'[3] इति सूत्रेण तस्मै हितम् पुरुषायहितम् इत्यर्थेणाप्रत्ययस्य ठञ् प्रत्ययस्य च विधानेन पौरुषेयम् इति सिद्ध्यत्ति, किन्तु ततः भिन्नेऽर्थे—'पुरुषस्य वधः' इत्यर्थे भाषायाम् उक्तशब्दस्य प्रयोगमवलोक्य वार्तिककारेण अर्थविधायकस्यास्य वार्तिकस्य प्रणयनं कृतम्।

अत्र अर्थविस्तारदिशा अर्थपरिवर्तनं संजातमस्ति यतः पौरुषेयमित्यस्य 'पुरुषाय हितम्' इति पूर्वार्थस्य अपरस्मिन् पुरुषस्य वधः इति पौरुषेयः इत्यर्थेऽपि प्रयोगः अर्थविस्तारस्य सूचकः।

अत्र भाष्यकारेण अत्यल्पमिदमुच्यते पुरुषाद्वध इति। 'पुरुषाद्वधविकार-समूहतेनकृतेष्विति वक्तव्यम्'[4] इति उक्तम्। अनेन ज्ञायते यद् पतञ्जलिसमये

---

१. शत०, २।४।२।१६

२ त्रयाणामपि लोकानां भगवान् प्रपितामहः—महाभारतम्, ५,३०४२

३. अष्टा०, ५।१।१०

४. महा०, ५।१।१०

नैकान्तम् वधेऽर्थे पौरुषेयस्य प्रयोगः आसीत् प्रत्युत पुरुषस्य विकारः पुरुषस्य समूहः, पुरुषेण कृतः ग्रन्थः इत्यर्थेऽपि व्यवहारः आसीत्। तदर्थमेव भगवता एवमुक्तम्। तथा च पुरुषस्य वध इत्यत्र 'तस्येदम्'[1] इति अणोऽपवादः, विकारे—पुरुषस्य विकारे 'प्राणिरजतादिभ्योऽञ्'[2] इति अञः, पुरुषस्य समूहे—'तस्य समूहः'[3] इति अणः तथा तेन कृते ग्रन्थे[4] इति अणः अपवादरूपः अयं नियमः।

एवञ्च पुरुषशब्दात् वधः विकारः समूहः तथा तेन कृते ग्रन्थे इत्यर्थे ठञ् प्रत्ययः भवति। एषु अर्थेषु ठञि, ष्यादेशे पौरुषेयः इति सिद्धयति।

कविवरेण माघेनापि पुरुषसमूहेऽर्थे पौरुषेयस्य प्रयोगः विहितः—'एकाकिनोऽपि परितः पौरुषेयवृता इव'[5]। वार्तिके प्रयुक्तः पुरुषशब्दः लोकप्रसिद्धः पाण्यादियुक्तः गृह्यते न तु सांख्यादिशास्त्रप्रसिद्धः पुरुषः, तत्र प्रत्ययस्य अदर्शनात्।

उपरितनविवेचनेन स्पष्टतः ज्ञायते यत् पौरुषेयशब्दस्य विभिन्नेषु अर्थेषु व्यवहारात् अर्थविस्तारः संजातः।

भा०, का०—वातात्समूहे च (५।२।१२२)
प्र० —वाताच्च ,,

वातात्समूहे च 'तन्नसहते' इत्येतस्मिन्नर्थे चऊलोवक्तव्यः इति भाष्यव्याख्यानेन ज्ञायते यत् वातशब्दात् समूहेऽर्थे तथा न सहते इत्यर्थेऽपि ऊलच् प्रत्ययः भवति। काशिकायाम् एतदर्थं वार्तिकद्वयस्य विधानं कृतं वर्तते—'वातात्समूहे च', वातं न सहते इति च।

वातानां समूहः वातं न सहते वा वातूलः। अत्र वातूलः इत्यस्यार्थस्य विस्तारः दरीदृश्यते। पूर्वं केवलं "वातं न सहते" इत्यस्मिन्नेवार्थे वातूल—शब्दस्य प्रयोगः प्रायः आसीत् किन्तु कालान्तरे वातानां समूहः इत्यस्मिन्नपि अर्थे एतस्य प्रयोगः भाषायां समागतः। एवं च अर्थविस्तारमूलकमर्थपरिवर्तनं परिलक्ष्यते।

भा० —खविधाने पञ्चजनादुपसंख्यानम् (५।१।९)
का०; सि०—पञ्चजनादुपसंख्यानम् ,,

---

१. अष्टा०, ४।३।१२०
२. ,, ४।३।१५४
३. ,, ४।२।३७
४. ,, ४।३।११६
५. शिशुपालवधम्, द्वितीयसर्गः

कर्मधारये पञ्चजनशब्दात् खप्रत्ययस्य उपसंख्यानं विधीयते। मनुष्याः पञ्चजना उच्यन्ते………रथकारपंचमाश्चत्वारो वर्णाः पञ्चजनाः। पञ्चजनाय पञ्चजनेभ्यो हितम्वेति विग्रहे पञ्चजनशब्दात् प्रकृतेन खप्रत्यये, खेत्यस्य स्थाने ईनि कृते पञ्चजनीनम् इति। अत्र दिक्संख्ये संज्ञायामिति समासः, समुदाये वृत्तस्यावयवेऽपि वृत्त्या एकवचनम्। अत्र प्रदीपकारः—ननु सापेक्षत्वादत्र समासेन न भाव्यम्। संख्या हि संख्येयविशेषमपेक्षते। संख्येयस्यैव जनापेक्षया व्यतिरेकस्तद्वारेण तु संख्यायाः गुणस्येति साक्षात् सम्बन्धाभावात्समासप्रसङ्गः। नैष दोषः। प्रकरणा-दिवशाद्यदा विशिष्टसंख्येयवृत्तित्वावसायः संख्याशब्दानां तदा जनादिना साक्षात्सम्बन्धाद्भवति वृत्तिः।

कर्मधारयसमासतः भिन्ने अर्थे यो हि पञ्च जनानां हितः इत्यर्थं, छप्रत्यये पञ्चजनीयम् इति तु रथकारसहितचतुर्णां वर्णानां हिताय कृतं कर्म इत्यर्थं बोधयति किन्तु पञ्चजनीयम् इत्यस्यार्थः पञ्चव्यक्तीनां हिताय कृतं कर्म इति भवति अथवा पञ्च जनाः यस्य यस्मिन् वातेषां हिताय इत्यपि अर्थः भविष्यति। एवम् पञ्चजनीनम् इति रूपपरिवर्तनम् अर्थादेशदिशा अर्थपरिवर्तनमपि सूचयति।

भा०—	सप्तम्युपमानपूर्वं (पद) स्योत्तरपदलोपश्च	(२।२।२४)
का०—	सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च वक्तव्यः	,,
प्र०—	सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च	(२।२।३५)
सि०—	,,	

समासे सिद्धेऽपि वचनमिदमुत्तरपदलोपार्थम्। सप्तम्यन्तं पूर्वपदं यस्योत्तरपदस्य तद् सप्तमीपूर्वपदम्। तस्य परेण पदान्तरेण समासो भवति, तस्य च सप्तम्यन्त-पूर्वपदस्योत्तरपलोपो भवति। तथा वा सप्तम्यन्तमुपमानवाचि च पूर्वपदं यस्य तस्य शब्दान्तरेण समासस्तत्रस्थस्योत्तरपदस्य लोप इत्यर्थः। कण्ठेस्थः कालोऽस्य स कण्ठेकालः—अत्र 'सुपि स्थ'[1] इति कप्रत्ययः 'अमूर्द्धमस्तकात्०'[2] इत्यलुक्। कण्ठे स्थितः कालः इति पाठे तु सप्तमीति योगविभागात्समासः। समानाधिकरण त्वात्समासे सिद्धे वचनमिदम् उत्तरपदलोपार्थम् तेन वैयधिकरण्येऽप्यत्र गमकत्व-मस्तीति प्रदर्श्यते।

उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः—अत्र अवयवधर्मेण समुदायस्य व्यपदेशात् उष्ट्रस्योपमानतेति उपमानपूर्वः उष्ट्रमुखशब्दः उपमानोपमेयवृत्तित्वात् पदयोर्वैय-धिकरण्यमत्रेति (वाक्ये समासे च सादृश्यसम्बधेनान्वयः वैयधिकरण्यम्) वचनमिद-

१. अष्टा०; ३।२।४
२. ,, ६।३।१२

मुत्तरपदलोपार्थं च। पदमञ्जरीकारेण तु अत्रोक्तम् उष्ट्रो मुखमस्येति विग्रहः, न च प्राणी प्राण्यन्तरस्य मुखमुपपद्यत इति सामर्थ्यात् सादृश्यावगतिः, मुखेन च मुखस्य सादृश्यं प्रसिद्धमित्युष्ट्रमुखमिव मुखमस्येत्ययमर्थो भवति। तस्मादुत्तरपदलोपो न वक्तव्यः[1]।

कण्ठे स्थः कालः कण्ठकालः इति वार्तिकाभावे रूपापत्तिः, भाषायां कण्ठेकालः इत्यवलोक्य वार्तिकमिदमुपन्यस्तम्। कण्ठेकालः इति शिवार्थे रूढोऽयं प्रयोगः।

भा० — पुण्यसुदिनाभ्यामह्नः (२।४।३०)

का० — अह्नोह्न एतेभ्यः (५।५।८८) इत्युपरि वृत्तिः वर्तते—
पुण्यशब्दात् प्रतिषेधं वक्ष्यति तथा च
पुण्यसुदिनाभ्यामह्नः क्लीवतेष्यते (२।४।१८)

प्र०, सि०—पुण्यसुदिनाभ्याम् अह्नः क्लीवता इष्टा (२।४।१७)

कर्मधारये 'राजाहः सखिभ्यष्टच्'[1] 'रात्राह्नाहाः पुंसि'[2] इत्यस्यापवादरूपमिदं वार्तिकम्। पुण्यशब्दात् सुदिनशब्दाच्च परः यः अहन्शब्दः तदन्ते क्लीवता वक्तव्येति वार्तिकार्थः। पुण्यश्च तत् अहः सुदिनश्च तत् अहः पुण्याहम्, सुदिनाहम्, अत्र 'रात्राह्नाहाः पुंसि' इति अह्न इत्यस्य पुंस्त्वे कृते पुण्याहः, सुदिनाहः इति रूपापत्तिः किन्तु भाषायां नपुंसकघटितरूपमवलोक्य तत्समाधानार्थं कात्यायनेन वार्तिकस्यास्य प्रणयनं कृतम्।

एवं प्रतीयते यत् अहोरात्रः, पूर्वरात्रः, द्व्यहः, इतिवत् पुण्याहः, सुदिनाहः इत्यपि रूपमासीत् पाणिनिकालीनभाषायां, किन्तु तदनन्तरं पञ्चगवम्, पञ्चखट्वम्-इत्यादिशब्दानां सादृश्यात् पुण्याहं, सुदिनाहम्, इत्यादिरूपपरिवर्तनं भाषायां संजातम् यदभिलक्ष्य वार्तिकमिदमुपन्यस्तम्।

सुदिनाहम् इत्यत्र सुदिनशब्दः प्रशंसामात्रवाची, तेन दिनाहः शब्दयोर्युगपद् अविरुद्धः प्रयोगः। दृश्यते च प्रशंसार्थस्य प्रयोगः "सुदिनासु च समासु कार्यमेतत् प्रविचिन्वीत विशेषतः स्वयं च"[3] इति प्रदीपकारव्याख्यानेन एवं सङ्केत उपलभ्यते यत् वार्तिकमिदं सुदिनाहम् इत्यस्य अभिधेयं भाषायां केवलं प्रशंसायां सङ्कुचितं निरीक्ष्य तन्निरासार्थमपि प्रकृतविधानं करोति।

भा०— सूर्यमत्स्ययोङ्यम् (६।४।१४९)

का०— मत्स्यस्य ङ्यामिति वक्तव्यम् („)

१. अष्टा०, ५।४।६१
२. „ २।४।२९
३. महा०, प्र०; २।४।३०

प्र०, सि०— मत्स्यस्य ङ्याम् (६।४।१४६)

सूर्यसम्बन्धिनः मत्स्यसम्बन्धिनश्च उपधाभूतयकारस्य लोपः भवति ङिपरे इति वार्तिकार्थः। अत्र प्रदीपकारमते "मत्स्यस्य ङ्याम्" इत्येव भवेत् यत् 'सूर्यागस्त्ययोश्छेच' इत्यत्र सूर्यशब्दस्य पाठः तथा तत्प्रयोजकं सौरीशब्दनिष्पादनञ्च प्रदर्शितमेव 'मत्स्यस्य ङ्याम्' 'सूर्यागस्त्ययोश्छेच' इत्येव सिद्धेऽर्थप्रदर्शनपरत्वाल्लाघवेऽनादरः कृतः[1]। अत्र आस्माकीनमयमभिनिवेशः, यतः बहुशः सूत्राक्षरं सूत्रशब्दमादाय एव बहुशः वार्तिकप्रणयनं कृतमस्ति, एतदर्थमेव वार्तिके सूर्यशब्दस्य पाठः।

मत्सी—मत्स्यशब्दात् स्त्रीत्वविवक्षायां 'षिद्गौरादिभ्यश्च'[2] इति ङीषि प्रकृतवार्तिकेन उपधाभूतस्य यकारस्य लोपे मत्सीति, टाबन्ते मत्स्या इति। मत्स्याशब्दे उपधाभूतस्य यकारस्य लोपः सम्भवति, अतः स्पष्टतया केवलं ङिपरे तिष्ठति यलोपः भविष्यति इति वार्तिककारस्य स्वरसः।

अत्र 'मत्स्यी' इत्यस्यथवर्णस्य लोपे मत्सी इति अथापि द्विवर्णलोपो भवतीति निरुक्तम्। मत्सी–मत्स्यानां देवतास्त्री इत्यर्थे मत्स्यस्य स्त्री इत्यर्थे च।

भा०— भक्षेरहिंसार्थस्य (१।४।५२)
का०— भक्षेरहिंसार्थस्य प्रतिषेधो वक्तव्यः (,,)
प्र०, सि०—भक्षेरहिंसार्थस्य न

कर्मसंज्ञानिषेधकमिदं वार्तिकम्।

अहिंसार्थकस्य भक्षेः कर्मत्वनिषेधो न, अभावाभावस्य प्रतियोगिरूपत्वात् तेन कर्मत्वं भवत्येव। वटुः अन्नं भक्षयति तं बटुं कश्चित् प्रेरयति इति विवक्षायां कर्मसंज्ञायाः निषेधे भक्षयति अन्नं बटुना इति रूपं भवति। अहिंसार्थस्य इति यदि न कथ्यते तदा भक्षयन्ति यवान्बलीवर्दाः 'भक्षयति बलीवर्दान् यवान्' बलीवर्दाः यवान्भक्षयन्ति तान् यज्ञदत्तः प्रेरयति, इत्यर्थे व्यापारद्वयार्थकण्यन्तभक्षधातुवाच्यचरमव्यापारप्रयोज्यगलबिलाधः संयोगानुकूलव्यापाररूपफलाश्रयस्य प्रयोज्यस्य कर्तुर्बलीवर्दस्य कर्मत्वेन द्वितीया। हिंसाफलके भक्षणे भक्षेर्वृत्तिः। क्षेत्रस्थानां यवादीनां भक्ष्यमाणानां हिंसा ज्ञेया, तस्यामवस्थायां तेषां चेतनत्वात्। परस्य सस्यभक्षणे परो हिंसितो भवतीति तत्स्वामिनः इह हिंसा द्रष्टव्या।

वार्तिककारस्य समये तृतीयाघटितप्रयोगाः भाषायां समागताः आसन् अतः एषाम् औचित्याय प्रकृतस्य निबन्धनमाचार्येण विहितम्।

---

१. महा० प्र० ६।४।१४९
२. अष्टा०, ४।१।४१

भा० सि०—गिलगिले च (६।३।७०)
का०— गिलगिले चेति वक्तव्यम्

गिलगिलशब्दे उत्तरपदे सति अगिलस्य मुमागमः भवति। शतयोजन विस्तारो मीनविशेषस्तिमिः—"अस्ति मत्स्यो तिमिनामशतयोजनविस्तारः"। तिमिङ्गिल-गिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघवः। यदा गिलं गिलतीति गिलगिलः,—तिमेर्गिलगिल इति व्युत्पत्तिस्तदा वार्तिकस्यास्योपसंख्यानम् किन्तु तिमिङ्गिलं गिलति इति व्युत्पत्तौ तु नार्थः उपसंख्यानेन पूर्वेणैव सिद्धेः इहापि तिमि-गिलगिलयोर्मध्ये मध्वनिना रूपपरिवर्तनम् एवञ्च तिमिङ्गिलंगिलति इत्यर्थतः भिन्नेऽर्थे तिमेर्गिलगिलः इत्यर्थे तिमिङ्गिलगिलः इत्यस्य अर्थे सङ्कोचः अर्थपरिवर्तन-मपि लक्षयति।

भा० सि०—दिक्शब्देभ्यस्तीरस्य तारभावोवा (६।३।१०६)
का०— दिक्शब्दस्य उत्तरस्य तीरस्य तारभावो वा भवति (,,)

दिक्वाचकशब्देभ्यः परस्य तीरस्य स्थाने तार इत्यादेशः विकल्पेन भवति। उदाहरणम्—दक्षिणतारम्, दक्षिणतीरम् उत्तरतीरमित्येव रूपं स्यात्। स्वकालिक-भाषायां तीरस्यार्थे तार-इत्यस्य नवीनस्यार्थस्य आदेशेन अर्थादेशाख्यार्थपरिवर्तन-स्याप्युदाहरणमेतत्।

भा०— देवानां प्रिय इति च (६।३।२१)
का०— देवानां प्रिय इति च षष्ठ्या अलुग् वक्तव्यः ,,
प्र०, सि०— देवानां प्रिय इति च मूर्खे ,,

षष्ठ्या आक्रोशे इति सूत्रस्थं वार्तिकमिदं, तेन ज्ञायते यत् मूर्खे अर्थे देवानां प्रियः इति षष्ठीसमासे षष्ठ्याः लुक् न भवति। मूर्खतः भिन्ने अर्थे 'षष्ठी' इत्यनेन समासे देवप्रियः इति रूपं भवेत्। पाणिनेरनुसारं देवप्रियः इत्यस्यार्थः देवतानां प्रियः जनः भवेत् किन्तु कालान्तरे भाषायां मूर्खाय देवानां प्रियः इत्यव-लोक्य कात्यायनेन मूर्खेऽर्थे प्रयोगममुमादिश्य षष्ठ्याः अलुकः निषेधः कृतः। एवं यथा प्रयोगोऽयं भाषायां नवीनरूपस्य द्योतकः तत्रैव व्यंग्यकारणात् संजात-मिदमर्थपरिवर्तनम् अर्थादेशानुरूपम्। पशवो हि देवानां प्रीतिं जनयन्ति इति तेषां प्रियास्तथा च तत्प्रियत्वेन पशुतुल्यता प्रतीयते इत्यतः पशुवन्मूर्ख इति तदर्थः इति वाचस्पत्यम्।

अत्रैकमैतिहासिकं तथ्यं ध्येयम्—सम्राजा अशोकेन स्वकीयशिलालेखेषु 'देवानां प्रिय' इति समाख्या स्वविषये उट्टङ्किता किन्तु कात्यायनेन एतस्य मूर्खेऽर्थे व्यवहारः कृतः। एवं प्रतिभाति यद् अशोकानन्तरं संजातः कात्यायनाचार्यः बौद्धव्यतिरिक्तानां

जनानां बौद्धानां कृते आक्रोशं निरीक्ष्य, व्यङ्ग्येन 'देवानां प्रिय' इति तेषां कृते लोकेषु भाषाप्रचलनमवलोक्य एतदर्थं नवीनार्थपरिवर्तनार्थम्बेति प्रकृतेन एतस्य समाधानं कृतवान् ।

भा०, प्र०—देवस्य यञञौ (४।१।८१)

का०, सि०—देवाद्यञञौ (,,)

देवशब्दात् अपत्येऽर्थे अञ् तथा यञ्प्रत्ययौ भवतः । उदाहरणम् देवस्य अपत्यम् इत्यर्थे यञि कृते दैव्यम् अञि कृते दैवम् इति ।

सूत्रेण निष्पन्नः दैवम् इति प्रयोगः अपत्यार्थतः भिन्ने देवसम्बन्धी-इत्यर्थे तिष्ठति, अपत्यार्थे तु 'तस्यापत्यम्' इत्यस्यापवादभूतेन 'अत इञ्'[1] इति सूत्रेण इञि कृते दैवम् इति प्रयोगः न सेत्स्यति । ऋग्वेदेऽपि दैवम् दैव्यम् इति उभयविधरूपमवलोक्यते[2] किन्तु तत्र देवतासम्बन्धिबलिकर्माद्यर्थस्य बोधः आभ्यां भवति, किन्तु प्रकृतवार्तिकेन निष्पन्नावुक्तौ शब्दौ देवतायाः सन्ततिः इत्यर्थस्य बोधकौ तिष्ठतः अतः अत्र अर्थविस्तारदिशा अर्थपरिवर्तनं सञ्जातम् ।

देवादागतः दैवम् अपि भवति तत्र अण्प्रत्यये इदं रूपं भाग्यार्थस्य बोधकं भवति— 'दैवाधीनं जगत्सर्वं जन्मकर्मशुभाशुभम् । संयोगाच्चवियोगाच्च न च दैवात् परं बलम्'[3] । इदमपि दैवम् वार्तिकेन निष्पन्नदैवम्इति शब्दतः भिन्नम् ।

भा० का० सि० — पृथिव्या ञाञौ (४।१।८५)

प्र०, प्र० — पृथिव्या ञाञौ वाच्यौ (,,)

पृथिवीशब्दात् अपत्येऽर्थे ञप्रत्ययः अञ्प्रत्ययश्च भवतः इति विधिवार्तिकस्यास्य तात्पर्यम् । उदाहरणम्—पार्थिवा, पार्थिवी पृथिव्याः अपत्यम् इत्यर्थे प्रकृतेन ञप्रत्यये अञ्प्रत्यये वा, आद्यचः वृद्धौ, रपरत्वे, भसंज्ञायाम्, ईलोपे, टापि पार्थिवा, अञन्तत्वात् ङीपि पार्थिवी ।

'दित्यदित्यादित्युत्तरपदाण्ण्यः'[4] इत्यनेन पृथिव्याः अपत्यमित्यर्थे एवंविधाः प्रयोगाः न भवन्ति, सूत्रेण यदि पार्थिवीशब्दनिष्पत्तिः विधीयेत तदा तस्यार्थः पृथ्वीसम्बन्धिनी इति भविष्यति । किन्तु वार्तिकेनानेन निष्पन्नौ पार्थिवापार्थिवीशब्दौ पृथिव्याः सन्तत्याः सीतायाः इत्यर्थस्य बोधं कारयतः । एवं पार्थिवापार्थिवीशब्दयोः अर्थे विस्तारः समायातः ।

---

१. अष्टा०, ४।१।९५

२. ऋग्वेदः, १।३१।१७ (दैव्यम्) अथर्ववेदः, २०।१३५।१ (दैवम्)

३. ब्रह्मवैवर्तपुराणे ।

४. अष्टा०, ४।१।८५

पार्थिवशब्दस्य प्रयोगः ऋग्वेदेऽप्युपलभ्यते[1] किन्तु पार्थिवीशब्दः नूनमेव कात्यायनकालिकः। अतएव परवर्तिभिः कोशकारैः पार्थिवीत्यस्य सीतेत्यर्थः स्वीकृतः।

'तस्यापत्यम्' इत्यर्थे अपत्यार्थकाण्प्रत्ययकरणेन अण्णन्तत्वान्ङीपि पार्थिवी इति रूपं सेत्स्यति, एवं च अत्रप्रत्ययं निष्प्रयोजनमिति शङ्का प्रकृते न कार्या यतः 'तस्यापत्यम्'[2] इत्यस्यापवादेन 'स्त्रीभ्योढक्' इत्यनेन ढकि पार्थिवीति न सिध्यति।

काशिकायां 'यमाच्चेति वक्तव्यम्'[3] इत्यपि वार्तिकं प्रोक्तं किन्तु भाष्ये अनिर्दिष्टत्वात् नेदं कात्यायनीयं वार्तिकम् याम्यम् इति प्रयोगस्य सिद्धिः तस्यापत्यमित्यर्थे अण्प्रत्यये यमित्यनेन स्वार्थिके ष्यञि भवति, अतः याम्यम् इति प्रयोगाय कस्यापि नवीनस्य वार्तिकस्यापेक्षा न वर्तते।

भा०, का०, प्र०, सि० — इकश्तिपौ धातुनिर्देशे (३।३।१०८)
धातुनिर्देशे धातोः इकश्तिप्प्रत्ययौ भवतः।

धातुनिर्देश इत्यस्य धात्वनुकरण इत्यर्थः। उदाहरणम् पच् धातोः प्रकृतवार्तिकेन इक्प्रत्यये पचिः, श्तिप्प्रत्यये कृते सकारपकारयोः इत्संज्ञायाञ्च, मध्ये शपि पचतिः इति रूपम्। वार्तिकाभावे पचतिः इति रूपसिद्धिः न भवितुमर्हति। पच् इत्यस्य योऽर्थः स एव पचिः-पचतिः इत्यस्याप्यर्थः। एकस्मिन्नेव पच् इत्यस्यार्थे पचिः-पचतिः इत्यस्य प्रयोगः अर्थादेशमूलकमर्थपरिवर्तनं सूचयति।

वार्तिकस्य प्रवृत्तिः 'रोगाख्यायांण्वुल् बहुलम्'[4] इत्यत्र बहुलवचनाच्च क्वचिन्न भवति यथा गुप्तिज्किद्भ्यः सन्[5] मान्बधदान्शांभ्यः[6] इति श्तिप्प्रत्ययस्य शित्करणसामर्थ्यहेतोः अकर्तृवाचिनि अपि एतस्मिन् शबादयो प्रत्ययाः भवन्ति, एवम् अभावकर्मवाचिन्यपि। क्वचित् यक्प्रत्ययोऽपि भवति, यथा विभाषालीयतेः[7] इति, इह हि लीलीङोर्यका श्तिपि निर्देशः विहितः, श्यनि कृते तु लीङः एव ग्रहणं भवेत् न तु लीनातेः। कथं पुनः शित्करणस्य सामर्थ्यम्, यावता पिबतिजिघ्रतिरित्यादौ श्तिपि पिबाद्यादेशार्थं ग्लायत्यादावात्वप्रतिषेधाय च शित्करणं

१. ऋग्वेदः, १।६४।३, ४।५३।३
२. अष्टा०, ४।१।६२
३. का० ४।१।८५
४. अष्टा०, ३।३।१०८
५. „ ३।१।५
६. „ ३।१।६
७. „ ६।१।५१

भवेत् ? एवं तर्हि 'उपसर्गात्सुनोतिसुवतिस्यति'[1], विभाषा लीयतेः'; 'भवतेर्ण उपसंख्यानम्'[2] 'ध्यायतेः सम्प्रसारणं च'[3] इत्यवेवमादिनिर्देशाच्छबादयो भविष्यन्ति ।

भा॰, का॰, सि॰ — वर्णात्कारः (३।३।१०८)

प्र॰ — वर्णनिर्देशे वर्णात्कारः

वर्णवाचकशब्देभ्यः कारप्रत्ययः भवति । वर्णादित्युच्यते तत्र एवकार इति न सिध्यति ? बहुलग्रहणसन्निधौ वचनात् क्वचिद्वर्णादपि भविष्यतीत्यदोषः । अथवा करणं कारः, एवस्य कार इति षष्ठीसमासोऽयम् । वर्णवाचिनो वर्णानुकरणादित्यर्थः, न तु वर्णादुच्चार्यमाणादिति । उदाहरणम्—अकारः, ककारः—'अ' इत्यस्य यः अर्थः स एव अकारस्यापि, एवम् 'अः' इत्यस्यार्थे अकार-इत्यस्य प्रयोगः अर्थादेशस्योदाहरणभूतः ।

भा॰, का॰, सि॰—इणजादिभ्यः (३।३।१०८)

प्र॰ —इञजादिभ्यः ,,

अधातुनिर्देशार्थं वार्तिकमिदम् । ण्वुलः अपवादोऽयम् । तथा च अण्-इत्यादिभ्यः धातुभ्यः इण्प्रत्ययः भवतीति वार्तिकार्थः । यथा—आजिः, आतिः, आदिः—अज्धातोः इण्प्रत्यये, 'अत उपधायाः'[4] इति वृद्धौ बहुलवचनात् अज इत्यस्य स्थाने 'अजेर्व्यघञपोः' इत्यनेन 'वि' इत्यादेशस्य न प्राप्तिः, आजिः इति, एवमेव अत्धातोः आतिः, अद्धातोः आदिः ।

यः अज् इत्यस्यार्थः स एव आजिः इत्यस्य, एवमेव यः अत् इत्यस्य स आतिरित्यस्य तथा च यः अद् इत्यस्य स एव आदिरित्यस्यार्थः अयमादिः प्रारम्भार्थकात् आदिशब्दात् भिन्नार्थकः एवञ्च भाषायां नवीनप्रयोगस्य बोधकः । आतिः एकप्रकारकस्य खगस्य बोधकः ।

भा॰— रञ्जेर्णौ मृगरमणे (६।४।२४)

का॰— रञ्जेर्णौ मृगरमण उपसंख्यानं कर्तव्यम् ,,

प्र॰— रञ्जेर्णौ मृगरमणे (र्थे) (६।४।६२)

सि॰— रञ्जेर्णौ मृगरमणे नलोपो वक्तव्यः (६।४।२४)

अविकृदर्थं वचनम्, मृगरमणं मृगक्रीडा । आखेट इत्येके, परे तु 'रजयांचकार विरजाः स मृगान्' इति भारविप्रयोगात् मृगरमणं यथाश्रुतमेव स्वीकुर्वन्ति,

---

१. ,, ८।३।६५

२. ,,

३. ,, वा॰, ३।२।१७८

४. अष्टा॰, ७।२।११६

अतएव भगवता पतञ्जलिना च 'मृगरमण इति किमर्थम् ?' 'रञ्जयति वस्त्राणि' इति प्रत्युदाहृतम् । एवञ्च मृगरमणेऽर्थे रञ्जेः नकारस्य णिच्प्रत्यये परे सति लोपः भवेदिति वार्तिकार्थः । यथा—रजयति मृगान्—अत्र रञ्जधातोः णिचि 'अनिदितामि'त्यादिनलोपविधायकसूत्राणामत्र[1] नासीत्प्राप्तिरतः प्रकृतेननलोपे, वृद्धौ च 'जनीजृष्क्नसुरञ्जोऽमन्ताश्च'[2] इति मित्त्वादुपधाह्रस्वत्वम् । मृगरमण इत्यतो भिन्ने अर्थे रञ्जयति रागमुत्पादयति वस्त्राणि ।

कात्यायनेन मृगरमणेऽर्थे रजयति इति नत्वरहितप्रयोगमवलोक्य तत्सिद्धये वार्तिकस्यास्य उपसंख्यानं कृतम् । रञ्जयति इत्यत्र मध्यव्यंजनध्वनेः 'न' इत्यस्य लोपे रजयतिरागमुत्पादयति इति प्राचीनार्थतः रजयति—आखेटं करोति इति नवीने अर्थे प्रकृतस्य परिवर्तनम् अर्थादेशमूलकमर्थपरिवर्तनं सङ्केतयति ।

भा०—	वृद्धाच्च	(४।२।३६)
का०, सि०—	वृद्धाच्चेति वक्तव्यम्	,,
प्र०, प्र०—	वृद्धाच्चेष्टः	,,

वृद्धानां समूहेऽर्थे वृद्धशब्दात् वुञ्प्रत्ययः भवति—वृद्धानाम् समूहः वार्द्धकम्—वृद्धशब्दात् प्रकृतेन वुञ्, 'युवोरनाकौ'[3] इति अकादेशे आद्यचः वृद्धौ, रपरत्वे भसंज्ञायाम् यस्येतिचेति अलोपेवार्द्धकम् ।

पाणिनिनियमानुसारेण वृद्धस्य भावः इत्यर्थे 'मनोज्ञादिभ्यो वुञ्'[4] इति सूत्रेण वुञ्प्रत्यये कृते वार्द्धकमिति तु सिद्ध्यति किन्तु तस्यार्थः भवति वार्द्धक्यम् वृद्धत्वम् वा । किन्तु कालान्तरे भाषायां काकानां समूहः काकम्, वकानां समूहः वाकम्, भिक्षाणां समूहः भैक्ष्यम्, इति सादृश्यात् वृद्धानां समूहः वार्द्धकम् इति रूपम् प्रयुक्तमभवत् । अतः अस्मिन्नवीनेऽर्थे अस्य प्रयोगमवलोक्य कात्यायनेन वार्तिकस्यास्य विधानं कृतम् ।

वार्द्धकम् इत्यत्र अर्थविस्तारमूलकम् अर्थपरिवर्तनम् संजातम् यतः वार्द्धक्यार्थेन सह वृद्धानां समूहः इत्यर्थोऽपि वार्द्धकमित्यनेनावगम्यते । अर्थपरिवर्तनमिदम् सादृश्यकारणात् संजातम् ।

भा०—	वृद्धेर्वृधुषिभावः	(४।४।३०)
का०, सि०—	वृद्धेर्वृधुषिभावो वक्तव्यः	,,

१. अष्टा०, ६।४।२४
२. ,, ७।४।६८ गणसूत्रम्
३. ,, ७।१।१
४. ,,

वृद्धयर्थां वृद्धिः ताम् प्रयच्छति अथवा यः अल्पवृद्धिदानमङ्गीकृत्य परकीयं धनमादाय बहुवृद्धयै अपरस्मै प्रयच्छति इत्यर्थे च वृद्धिशब्दात् ठक्प्रत्ययः भवति एवं वृद्धेः स्थाने वृधुषि इदयादेशः भवति—वार्द्धुषिकः वृद्धयर्था वृद्धिः तां प्रयच्छति इति विग्रहे वृद्धिशब्दात् ठक्प्रत्यये ठस्येकः इति इगादेशे वृद्धेः स्थाने वृधुषि आदेशे च आद्यचः वृद्धौ, रपरत्वे वार्धुषिकः इति सिद्ध्यति।

वार्तिकाभावे वार्द्धिकः इति प्रयोगः अमरकोशे—"वृद्धयाजीवस्य वार्द्धुषि, अपरत्र" वार्द्धुदासमकम्पत ··· ··· — वार्द्धुषेः, इति वार्द्धुषिः इति प्रयोगः चिन्त्यः। एतस्य व्याकरणसम्मतं नौचित्यम्। निरङ्कुशाः कवयः स्वच्छन्दवाचः ऋषयः इति निर्देशद्वारैव समाधानम्।

कात्यायनकाले कुसीदाय केचनजनाः धनानि ददति स्म। इमे जनाः वार्द्धुषिकसंज्ञया अभिधीयन्ते स्म। वार्द्धुषिकाः कदाचित् प्रदत्तस्य ऋणस्य द्विगुणं त्रिगुणं वा धनं गृह्णन्ति स्म एवंभूताः जनाः गर्ह्या आसन्[1]।

वृद्ध्यर्थं धनं दत्वा ये जीविकोपार्जनं कुर्वन्ति स्म अथवा भूयसे धनलाभाय ये अपरस्मै धनं प्रयच्छन्तिस्म ते वार्द्धुषिकाः कथ्यन्तेस्म। भाषायां समागतं नवीनं रूपमिदंनिरीक्ष्य कात्यायनेन प्रकृतेन एतस्य व्युत्पादनम् विहितम् वार्द्धुषिकशब्दस्य मूलार्थः आसीत् वृद्धयर्था वृद्धिः तां यः प्रयच्छति, किन्तु शनैः शनैः शब्दोऽयं कुसीदोपजीवने उत्तमर्णाय रूढः संजातः एवं च अत्र अर्थसंकोचमूलकमर्थपरिवर्तनम्।

भा०, का०—राज्ञोऽपत्ये जातिग्रहणम् (४।१।१३७)
सि०, कौ०—राज्ञो जातावेवेति वाच्यम् (,,)
प्र०— वार्तिकचिह्नविरहितं-राज्ञो जातौ यत् (६।४।१६८)

राजन्शब्दात् अपत्यार्थे यप्रत्ययः भवति। उदाहरणम्—राजन्यः। वार्तिके जातिग्रहणमिति पदम् इदं विश्लेषयति यत् यदा प्रकृतिप्रत्ययसमुदायेन जातिर्बोध्यते अपत्ये यत् प्रत्ययः नान्यदा तेन क्षत्रियजातौ प्रतिपादयिषितानां राजन्यशब्दस्य प्रयोगः वैश्येशूद्रे वा राजापत्ये राजनशब्दप्रयोगः।

वार्तिकस्यास्य व्याख्यानक्रमेण काशिकाकारेण उक्तम् राजन्यो भवति क्षत्रियजातिश्चेत्। केवलं क्षत्रियस्य संततेरेव राजन्यशब्देन ग्रहणं भवतीत्यर्थः। पाणिनिना राजसामान्यस्यापत्येऽर्थे 'राजश्वसुराद्यत्'[2] इति सूत्रेण यत् प्रत्ययं विधाय राजन्यशब्दस्य व्युत्पत्तिः प्रदर्शिता। अनेन ज्ञायते यत् कस्याः अपि जात्याः राज्ञः सन्ततिः

१. द्विगुणं मे स्यादिति प्रयच्छति द्वैगुणिकः, यद् दत्वा बहु गृह्णाति तद् गर्ह्यम्।
अष्टा०, प्रयच्छति गर्ह्यम्—४।४।३०
२. अष्टा०, ४।१।१३७

तन्मते राजन्यशब्देन व्यवह्रियतेस्म, किन्तु कात्यायनकाले एतस्यार्थे परिवर्तनं संजातम्। राजन्यशब्दस्य केवलं क्षत्रियस्यसन्ततिरित्यर्थं एव प्रयोगमवलोक्य प्रकृतवार्तिकस्य प्रणयनं कृतमस्ति। एवं च पूर्वस्य विस्तृतार्थयुक्तस्य राजन्यशब्दस्य क्षत्रियापत्येऽर्थे एव प्रयोगः अर्थसंकोचमूलकः अर्थपरिवर्तनसंकेतकः। क्षत्रियापत्यतः भिन्नेऽर्थे तु राजन् इत्यस्य व्यवहारः।

भा० + सि०—आगमेः क्षमायाम् (१।३।२१)

का०— आगमेः क्षमायामात्मनेपद इति वक्तव्यम् (,,)

आङ्पूर्वस्य गमेर्ण्यन्तस्य ग्रहणम्। आङ्पूर्वकात् ण्यन्ताद् गम्धातोः परं केवलं क्षमेत्यर्थे आत्मनेपदं भवति, यथा—आगमयस्व तावत्-माणवक! अध्ययनार्थं सहस्व कंचित्कालं, मा त्वरां कुरु इत्यर्थः। अत्र क्रीडोऽनुसम्परिभ्यश्च'[1] इति सूत्रेण आत्मनेपदस्य विधानं न प्राप्तमतो परस्मैपदस्याकांक्षासीत् किन्तु वार्तिकेनानेन क्षमेत्यर्थे अत्र आत्मनेपदस्य विधानं कृतम्। अत्र आङ्पूर्वकस्य गम्धातोः आसमन्तात् सर्वतोऽभिव्याप्य वा गमनं चलनम् इति अर्थस्य स्थाने 'सहस्व' क्षमो भव 'इति नवीनार्थोपस्थापनमर्थादिशमूलकमर्थं परिवर्तनं सङ्केतयति।

भा०, का०, सि०—आशिषि नाथः (१।३।२१)

नाथृ नाधृ याच्ञोपतापैश्वर्याशीःषु' इत्यनुदात्तेत् पठ्यते, अनुदात्तेत्त्वादात्मनेपदे सिद्धे 'आशिष्येव नाथतेरात्मनेपदं भवति, याच्ञादिषु मा भूत्' इति नियमार्थमेतत् तथा च नाथधातोः केवलम् आशीर्वादार्थे आत्मनेपदं भवति। उदाहरणं—सर्पिषो नाथते, मधुनो नाथते, सर्पिर्मे भूयात्, मधुर्मे भूयात् इति आशास्ते इत्यर्थे अत्र आत्मनेपदस्य विधानम् अन्येषु अर्थेषु परस्मैपदं स्यात् तद्यथा—माणवकमनुनाथति। अत्र नाथते इत्यात्मनेपदरूपस्य प्रयोगः केवलम् आशीर्वादेऽर्थे तिष्ठति इति अर्थसंकोचमूलकमर्थपरिवर्तनम्।

भा०, सि०—अश्ववृषयोर्मैथुनेच्छायाम् (७।१।५१)

का०— अश्ववृषयोर्मैथुनेच्छायामिति वक्तव्यम् (,,)

प्र०— अश्ववृषयोर्मैथुनेच्छायामिष्यते (,,)

अश्वविषयेच्छा यदा मैथुनार्था, तदैवासुग्भवति, मैथुनेच्छापरत्वाच्च प्रयोगस्याश्ववृषोपादानमतन्त्रमिति मनुष्यादिविषयेऽपि प्रयुज्यते इति रामो वृषस्यन्तीमिति। वार्तिकस्यार्थस्तु अश्वस्य वृषस्य च क्यचि परे सति मैथुनेच्छार्थे असुगागमः भवति।

---

१. अष्टा० १।३।२१

अश्व, क्षीर, वृष, लवण—इत्येतेषामङ्गानामात्मप्रीतिविषये क्यचि परतोऽसुगागमो भवति इत्यर्थकेन 'अश्वक्षीरवृषलवणानात्मप्रीतौ क्यचि'[1] इति सूत्रेण अश्वस्यति वृषस्यति इति रूपसिद्धिस्तु भवति किन्तु वार्तिककारेण स्पष्टतः केवलं मैथुनेच्छायर्थे असुगागमः भवति। एवम् बडवा (अश्वा) अश्वम् मैथुनाय इच्छति इत्यर्थे 'सुप' प्रकृतेन आत्मनः क्यच् इति क्यचि असुगागम' कृते, अश्वस्यति इति रूपम्। एवम् अश्वस्यति इत्यत्र अर्थसङ्कोचमूलकमर्थपरिवर्तनं संजातं यतः केवलं मैथुनाभिलाषे अश्वस्यति इत्यस्यार्थः सङ्कुचितः। आत्मनः अश्वादिकमिच्छतीत्यर्थे तु अश्वीयति इति भवति।

---

१. अष्टा०, ७।१।५१

तास्तु वाचः सभायोग्याः या चित्ताकर्षणक्षमाः ।
स्वेषां परेषां सर्वेषां विदुषामविदुषामपि ॥

षष्ठोन्मेषः

वाक्यविचाराधिया प्रकृतस्य परिशीलनम्

सार्थकशब्दानां पदानां वा समूहः वाक्यमुच्यते, वाक्ये यावन्ति पदानि समायान्ति तानि सर्वाणि परस्परं स्वकीयं सम्बन्धं विस्पष्टीकृत्य एव चलन्ति तथा सहैव कमपि अर्थमभिव्यंजन्ति । सम्पूर्णः वाग्व्यापारः वाक्ये एव भवति । अयं तु सामान्यतया मानवस्वभावः यत् प्रत्येकं जनः यत्किञ्चिदपि वक्तुमभिलषति तत् स्वल्पतरैः एव शब्दैः कथयति किन्तु तस्य तात्पर्यं पूर्णतः वाक्यात्मकं तिष्ठति । यदा-कदा समयस्य अभावे यथोचितशब्दभाण्डारस्याभावेऽपि मनुष्यः स्वल्पातिस्वल्पशब्दानां प्रयोगाय विवशः संजायते किन्तु शब्दानामभावेऽपि तस्य समग्रस्य कथनस्य तात्पर्यं वाक्यमूलकमेव भवति ।

प्रत्येकं वाक्यस्य द्वौ भागौ भवतः—उद्देश्यं विधेयश्च, तथा च वाक्ये त्रीणि तत्त्वानि भवन्ति—वक्ता, सम्बोध्यः, भावश्च । सर्वासां भाषाणां परीक्षणेन ज्ञायते यत् यानि कान्यपि वाक्यानि अभिधीयन्ते तेषां कोऽपि वक्ता भवति, वक्तृतत्त्वमेव इदं विशिनष्टि यत् कः जनः कं प्रति किं कथयति तथा श्रोत्रा सह तस्य कः सम्बन्धः भवति । सम्बोध्यतत्त्वेन श्रोतृतत्त्वेन च इदं निश्चीयते यत् श्रोतुः योग्यता, अवस्था तथा प्रकृतिः किम्विधा तिष्ठति एवं च तं प्रति कैः शब्दैः कया शैल्या च अभिधानं समुचितं भविष्यति येन तदुपरि तस्य समुचितः प्रभावः समुपद्येत । भावतत्त्वान्तर्भूतं तस्य सम्पूर्णविषयस्य, भावस्य, परिस्थित्याश्च समावेशः भवति यद्स वक्ता तं सम्बोध्य कथयितुमिच्छति । एषां त्रयाणां तत्त्वानामेव संयोगात् वाग्व्यापारस्य प्रयोगपद्धतिः वाक्यरचना वा सुनिश्चिता भवति ।

भाषाणां, जातीनां च पारस्परिकसम्पर्ककारणात्, विभक्तिलोपतः, इच्छितार्थस्य संक्रमणप्रवृत्तितः; नवीनायाः शैल्याः अभिधानस्य सरणिविशेषतः, श्रोतुः बुद्धितः, वक्तुः पाण्डित्यानुसारं च वाक्यानां रूपेषु परिवर्तनं संजायते । संस्कृतभाषाशास्त्र-विचक्षणैः वाक्यस्य स्वरूपविवेचनं बहुशः कृतम् । वस्तुतः वाक्येषु भावानामभि-व्यक्तिरेव भाषा । संस्कृतवैयाकरणानामभिमतं वर्तते यत् पदेभ्यः शब्देभ्यः वा अर्थः न निस्सरति प्रत्युत वाक्यतः अर्थस्य निर्गमनं जायते । अत एव वाक्यमेव कूटस्थं

सत्यं च तिष्ठति। वाक्यस्फोट एव अर्थाभिधाने अर्थसमाप्तौ च समर्थः भवति। स्फुटति प्रकाशते अर्थः अस्मात् इति स्फोटः, स्फोटत्वं च अर्थप्रकाशकत्वम्, तत्र अष्टौ स्फोटाः भवन्ति—वर्णस्फोटः, सखण्डपदस्फोटः, सखण्डवाक्यस्फोटः, अखण्डपदस्फोटः, अखण्डवाक्यस्फोटश्च, पञ्च व्यक्तयः स्फोटः। वर्णत्वं, सखण्डपदत्वं, सखण्डवाक्यत्वं च, इति तिस्रः जातयः स्फोटाः इति अष्टौ स्फोटाः भवन्ति। अखण्डपदवाक्ययोस्तु न जातिः तयोः एकत्वात्, जातेश्च अनेकसमवेतत्त्वात्। अतः वाक्यस्फोटे लोकव्यवहारस्य प्रामाण्यम् इति दर्शितं भवति। वृद्धव्यवहारेण वाक्ये एव प्रथमं शक्तिग्रहात्, वर्णपदयोः स्फोटत्वे व्याकरणशास्त्रमेव प्रमाणम्, व्याकरणेन प्रकृतिप्रत्ययभावव्युत्पादनेन वर्णस्य स्फोटत्वसिद्धिः, प्रकृतिप्रत्ययौ तत्तदर्थवाचकौ इति वर्णस्फोट इत्यस्य हि तात्पर्यम्। वर्णशब्दस्य पदावयवप्रकृतिप्रत्ययभागपरत्त्वात्। प्रकृतिप्रत्ययभागव्युत्पादनद्वारा पदव्युत्पादनमिति पदस्फोटस्यापि सिद्धिः। विश्लेषणेनानेनेदं स्पष्टं यत् वाक्यादेवार्थबोधो भवतीति नैकान्तं वैयाकरणाः मन्यन्ते अनुभवन्ति सर्वे बोद्धारोऽपि, केवलात् क्रियापदादपि यत्र बोधो भवितुमर्हति तत्रापि कर्तृकर्मणोरध्याहारः संभाव्यत एव। एषां कर्तृकर्मक्रियापदानां संस्कृतभाषायाः वाक्येषु क्रमानुरूपम् संयोजनमिति नैष नियमः। आनय जलम्—जलमानय, इत्युभयं हि तत्र दृश्यते। विभिन्नासु भाषासु कर्तृकर्मक्रियापदानां क्रमशः सन्निवेशस्य नियमः परमावश्यकत्वेन तिष्ठति। तासां भाषाणां वाक्यरचनासु यदि आनुपूर्व्याः भङ्गः संजायते तदा अर्थबोधे काठिन्यमथवा अर्थाविबोधे अशक्यत्वं तूपपद्यत एव सम्पूर्णं वाक्यमेव अशुद्धं भवति। आंग्लभाषायां वाक्यस्य प्रारम्भे कर्तृपदं, तदनन्तरं क्रियापदम्, अन्ते च कर्मपदं तिष्ठति। हिन्दीभाषायां कर्तृपदं प्रारम्भे, कर्मपदं मध्ये, अन्ते च क्रियापदं तिष्ठति। सर्वत्र क्रमभङ्गतायाः परिहारः आवश्यक एव। संस्कृतवाक्यरचनायामेतस्मिन् विषये स्वातन्त्र्यं तिष्ठति, क्वापि कर्तृपदकर्मपदक्रियापदस्य व्यवस्था भवितुमर्हति। किन्तु तत्रापि अर्थस्यावबोधाय आनुपूर्व्याः आवश्यकता तिष्ठत्येव। विषयस्यास्य सुष्ठूपस्थापनं महाभाष्ये दृश्यते—

'आनुपूर्व्येण सन्निविष्टानां यथेष्टमभिसम्बन्धः शक्यते कर्तुम्। न चैतान्यानुपूर्व्येण सन्निविष्टानि। अनानुपूर्व्येणापि सन्निविष्टानां यथेष्टमभिसम्बन्धो भवति' तद्यथा 'अनड्वाहमुदहारि या त्वं हरसि शिरसा कुम्भं भगिनि साचीनमभिधावन्तमद्राक्षीः' इति। तस्य यथेष्टमभिसम्बन्धो भवति उदहारि भगिनि या त्वं कुम्भं हरसि शिरसा अनड्वाहं साचीनमभिधावन्तमद्राक्षीः इति।[1]

यत्तु भगवता पूर्वमुक्तं यत् कयापि आनुपूर्व्या विविवेशितानामेव शब्दानां परस्परं यथेष्टसम्बन्धोपपत्तिः कर्तुं शक्यते, तत्तु स्पष्टतः संस्कृतवाक्येष्वपि क्रम-

१. महा०, १।१।५८

सन्निवेशस्य आवश्यकतां विशिनष्टि, यत्तु तेनोक्तं यत् आनुपूर्व्या क्रमेण वा विरहितानामपि शब्दानां वक्तुः इच्छया यथेष्टः सम्बन्धः उपपद्यते। यद्यथा अनडवाहमुदहारीत्यादिवाक्ये पदानां कापि आनुपूर्वी न तिष्ठति, इमानि पदानि यथोचितक्रमेण न विनियोजितानि तिष्ठन्ति, वक्ता स्वयमेव स्वकीयबुद्ध्यनुरूपमेतेषां यथोचितां समन्विर्ति विधाय एवं संयोजयति–उदहारि भगिनि या त्वमित्यादि-वाक्यम्। अत्रापि सूक्ष्मविश्लेषणेन इदमेव विज्ञायते यत् आनुपूर्वीरहितेषु वाक्येषु क्लिष्टत्वदोषयुक्तः अर्थावबोधस्तु भवति किन्तु तदपि तदैव भवति यदा वक्ता श्रोता वा तद्वाक्यं स्वीयबुद्ध्या क्रमपूर्वकं सन्नियोज्यैव अर्थपरिज्ञानं कुरुते। एवं च संस्कृतवाक्येष्वपि आनुपूर्व्याः आग्रहः तिष्ठत्येव। एकेन सरलवाक्योपस्थापनेन तथ्यस्यास्य सम्पुष्टिः भवितुमर्हति—ओदनं विशदं मृदु पचति।

विशदम् ओदनं मृदु पचति।
मृदु ओदनं विशदं पचति।
ओदनं मृदु विशदं पचति।

ओदनं पचति मृदु विशदम्। एषु सर्वेषु उदाहरणेषु आनुपूर्व्याः परिवर्तनेन अर्थे तात्त्विकमन्तरं समायाति।

संस्कृतवाक्यस्य स्वरूपज्ञानाय शब्दतः पदतः वा एतस्य सम्बन्धः प्रथमं ज्ञेयः। भाषायाः आधारभूतः शब्दः तिष्ठति, परस्परंभावसम्प्रेषणस्य भाषारूपस्यास्य माध्यमस्य आधारः साधनं वा शब्द एव वर्तते। यथा चोक्तं—

चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति।[1]

शब्दधातोः घञ् प्रत्यये कृते शब्दः इति शब्दस्तोममहानिधौ व्युत्पादितः शब्दशब्दः। मैत्रेयस्तु शब्दं शब्दक्रियायामिति पठित्वा शब्दयतीत्याह।[2] शब्दस्य प्रारम्भिकः अर्थः ध्वनिः स्वनः वा वर्तते। ध्वनिरयं द्विविधः—प्रथमस्तु सम्य-क्करणैरुपहितो हृदि वायुर्वेणुशब्दादिभिः शब्दीभवति तथा चापरः ध्वनिः—स्थान-करणाभ्यां पुरुषप्रयत्नेन उच्चारितः व्यक्तध्वनिः शब्दः। अयं ध्वनिः वर्णः कथ्यते—संघातः पुरुषप्रयत्नः स आदौ येषां स्थानादीनां ते संघातादयः तान् प्राप्य वाग्भवति वर्णो भवतीत्यर्थः।[3] शब्दः प्रकृतिः सर्ववर्णानाम्। तस्य रूपान्यत्वे वर्णान्यत्वम्,[4]

---

१. ऋक्संहिता, ३१।१६४।४५
२. माधवीयधातुवृत्तिः पृ०–३६०
३. शुक्लयजुःप्रातिशाख्यम्, १।८
४. तैत्तिरीयप्रातिशाख्यम्, २१।१।२

एकस्य वर्णस्य वर्णानां वा समुदायः अक्षरं कथ्यते—वर्णसमुदायोऽक्षरं, वर्णो वा[1]। एकस्य वर्णस्य, एकस्य अक्षरस्य, अनेकेषां वर्णानामक्षराणां वा संघातः समुदायो वा पदं कथ्यते।[2] वर्णपृक्तः शब्दो वाच उत्पत्तिः[3] तथा च कौटिलीये अथशास्त्रे 'वर्णसंघातजंपदम्।'[4] शुक्लयजुःप्रातिशाख्ये अक्षरसमुदायः पदम् अक्षरं वा।[5] आचार्यः इन्द्रः पदस्योपर्युक्तां व्युत्पत्तिं संरचनामूलकामेव मनुते तथा पदत्वस्य तन्मत आधारः वर्तते अर्थः 'अर्थः पदमैन्द्राणाम्।'[6] यस्यैकस्य वणस्य अक्षरस्य अनेकेषां वर्णानामक्षराणां वा समुदायः पदं कथ्यते। लोके पदाथबोधकः एव शब्दशब्दः 'प्रतीतपदार्थको लोके ध्वनिः शब्दः' इति पातञ्जल-महाभाष्ये।[7] शृंगारप्रकाशे च—'येनोच्चारितेनार्थः प्रतीयते स शब्दः।' वस्तुतः शब्दस्य पदस्य चार्थे वैषम्यं तिष्ठति। सामान्यतः शब्दः प्रातिपदिकस्य पर्यायरूपः तथा च कात्यायनेन स्वीकृतं—न वा पदस्यार्थे प्रयोगात्। यस्य विश्लेषणक्रमेण भाष्यकार आह—न वा एष पक्ष एवास्ति प्रातिपदिकानामेकशेष इति। किं कारणम्? पदस्यार्थे प्रयोगात्। पदमर्थे प्रयुज्यते विभक्त्यन्ते च पदम्। रूपं चेहाश्रीयत। रूपनिर्ग्रहश्च शब्दस्य नान्तरेण लौकिकं प्रयोगम्।[8] स शब्दः पदं कथ्यते यत्र विभक्तिः समन्विता तिष्ठति—सुप्तिङन्तं पदम्[9], विभक्त्यन्तं च पदम्। एवमपि कथयितुं शक्यते यत् यस्य वाक्ये प्रयोगः कर्तुं शक्यः स शब्दः पदं कथ्यते—वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः'। शब्दपदयोरयं भेदः अतीव सूक्ष्मः प्रायिकश्च। बहुशः लक्षणया पदशब्दावुभावपि परस्परं पर्यायत्वेन प्रयुज्येते-'तेन अनेकार्थाभिधाने यत्नं कुर्वतावश्यं लोकः पृष्ठतोऽनुगन्तव्यः, केष्वर्थेषु लौकिकाः कान्शब्दान् प्रयुंजते इति।'[10] अत्र पदार्थमेव शब्देत्यस्य प्रयोगः। अयं पदशब्दः गत्यर्थकात् पद्धातोः करणे घप्रत्यये कृते निष्पद्यतेपद्यते गम्यतेऽर्थोऽनेनेति पदमिति बालमनोरमायाम्[11]

---

१. तैत्तिरीयप्रातिशाख्यम्, ८।३९।४०
२. वर्णसंघातजं पदमिति बृहद्देवतायाम्, २।११७
३. तं० प्रा०, २३।२
४. अर्थ०, २।१०।२८
५. शुक्लय० प्रा०, ८।४६-४७
६. नि०, दुर्गाचार्यटीका, १।१
७. महा०, प्र० आ०
८ महा०, १।२।६४
९ अष्टा०, १।४।१७
१० महा०, १।२।६४
११. बाल०, सि०, ३।३।१२५

यस्या धारः न्यासकारस्येदं विश्लेषणं—पद्यते गम्यतेऽर्थो येन तत् पदम्।[1] पदमैतत् द्विविधम् एकाक्षरानेकाक्षरभेदात्। तत्र 'अ इ उ' इत्यादयः एकाकिनः वर्णाः एकाक्षरपदत्वेनाभिधीयन्ते एवंभूतानां पदानां समूहः वाक्यं कथ्यते—'पदसंघातजं वाक्यम्।'[2] कौटिल्यमते येन पदसंघातेन प्रतिपाद्यस्य सामग्रयेण प्रतीतिः भवेत् स पदसमूहः वाक्यं कथ्यते—'पदसमूहो वाक्यमर्थपरिसमाप्तौ'। काशिकाकृता एकार्थः पदसमूहो वाक्यमि'ति[3] उक्तं तच्च पदमञ्जरीकृन्मते भगवतः जैमिनेः वाक्यलक्षणमाधृत्य तिष्ठति—'अर्थैकत्वादेकं वाक्यं साकांक्षं चेद्विभागे स्यात्[4]।' इदमेव वाक्यलक्षणं परिचस्कार विश्वनाथाचार्यः—'वाक्यं स्याद्योग्यताकांक्षासत्तियुक्तः पदोच्चयः[5]। तथा च पर्यवसितान्वयत्वे सति योग्यताकांक्षासत्तिमदनेकपदत्वं वाक्यमिति वाक्यलक्षणम्। पदोच्चयः पदसमूहः वाक्यम्, स च योग्यताआकांक्षा—आसत्तियुक्तः चेत्—तथा च द्वयोः पदार्थयोः बहूनां वा पदार्थानां परस्परंसम्बन्धविषये प्रतिबन्धकाभावः योग्यता, तथा च जलेन सिंचतीत्यादौ सेचनक्रियायां जलकरणत्वरूपसम्बन्धविषये जले सेचनकार्यकत्वसम्बन्धविषये च प्रतिबन्धकाभावात् वाक्यत्वसिद्धिः। इवं वह्निना सिंचतीत्यादौ योग्यतायाः अभावेन न वाक्यत्वम्। एवं श्रोतुः यत् किंचित् पदश्रवणसमनन्तरमेव तदन्वयिपदान्तरश्रवणेच्छा आकांक्षा इति कथ्यते। एवं च जलेन सिंचतीत्यादौ श्रोतुः जलेन इति पदश्रवणसमनन्तरमेव सिंचतीति पदश्रवणेच्छा जायते। निराकांक्षस्य वाक्यत्वे गौरश्वः पुरूषो हस्तीत्यादीनामपि वाक्यत्वं स्यात्। तथा कालव्यवधानेन अनन्वयिपदान्तरेण वा अविच्छिन्नः पदप्रतीतिप्रवाहः आसत्तिः कथ्यते एवं च जलेन सिंचतीत्यादौ तादृशप्रतीतिप्रवाहसत्त्वात् आसत्तेरपि सत्वेन वाक्यत्वम्। आसत्तेः अभावेऽपि वाक्यत्वे इदानीम् उच्चरितस्य देवदत्तशब्दस्य दिनान्तरोच्चारितेन खादतीति पदेन संगतिः स्यात्। आकांक्षा इच्छारूपा सा च समवायसम्बधेन आत्मनि तिष्ठेत। योग्यता च अर्थे तिष्ठेत् तर्हि पदोच्चयधर्मत्वम् कथं तथा च उत्थापकत्व—निवर्तकत्वान्यतरसम्बन्धेन आकांक्षायुक्तत्वं पदोच्चयस्य अङ्गीकृतत्वात्।

संस्कृतवैयाकरणेषु भाषाशास्त्रमर्मज्ञेषु च वाक्यस्वरूपविषये कात्यायनात् पूर्वं न केनापि आचार्येण चिन्तितं वाक्यस्य स्वरूपं च विश्लेषितम्। महर्षिपाणिनिना न

१. न्या०, का०—३।१।६२
२. बृहद्देवता, २।११७
३. का०. ८।१।८
४. मीमांसासूत्रम्—२।१।४६
५. साहित्यदर्पणः, २।१

कस्मिन्नपि सूत्रे वाक्यस्वरूपं लक्षितम्। अष्टाध्याय्यां केवलं सूत्रद्वये वाक्यशब्दस्य प्रयोगः परिलक्ष्यते—१ वाक्यादेशमन्त्रितस्यासूयासम्मतिकोपकुत्सनभर्त्सनेषु[1], वाक्यस्य टेः प्लुत उदात्तः[2], इति। उभयत्रापि वाक्यस्वरूपविषये न कोऽपि प्रकाशः तिष्ठति। अतः वाक्यरचनाविषये पाणिनेरनन्तरं कात्यायनकालं यावत् किंविधं परिवर्तन जातमिति विवेचन कठिनम्। आचार्यः कात्यायन एव प्रथमः वैयाकरणः यः सर्वप्रथमं वाक्यं लक्षितवान्, तत्स्वरूपं च विश्लेषितवान्। महाभाष्ये एतद्-सम्बन्धे चत्वारि वार्तिकानि दरीदृश्यन्ते यानि कात्यायनकालिकसंस्कृतभाषायां वाक्यस्वरूपस्य विश्लेषणं प्रस्तुवन्ति—(१) आख्यातं साव्ययकारकविशेषणं वाक्यम्, महा० २।१।१।

वाक्ये द्रव्यवाचकपदानां क्रियावाचकपदानां च साक्षात् रूपेण अर्थतः वा समुपस्थापनमावश्यकम्। आवश्यकतायाः समुपस्थितावेव उपसर्गनिपातयोः प्रयोगः वाक्ये कार्यः। सर्वाणि द्रव्यपदानि प्रत्यक्षाप्रत्यक्षरूपेण क्रियापदैः समन्वितानि तिष्ठन्ति। द्रव्यपदानि कारकरूपेण क्रियया अन्वितानि भवन्ति अथवा कस्यापि कारकद्रव्यस्य विशेषणरूपेण तन्माध्यमेन किम्वा साक्षात् क्रियायाः विशेषणत्वेन क्रियया अन्वितानि भवन्ति तथा च कात्यायनाचार्यः वाक्यस्य लक्षणं प्रस्तौति 'आख्यातं साव्ययकारकविशेषणं वाक्यम्'। कारकनामपदैः तथा चावश्यकतानुरूपम् उपसर्गनिपातैः युक्त तिङन्त क्रियापदं वाक्यं कथ्यते।[3] यथा उच्चैः पठति, नीचैः पठति। अत्र एका क्रिया, एकमव्ययं च तिष्ठति। ओदनं पचति, अत्र एका क्रिया, एकं कर्मकारक विद्यते। ओदनं मृदु विशदं पचति—अस्मिन् वाक्ये क्रियाकारकम् अव्ययं विशेषणञ्च विद्यते।

(२) सक्रियाविशेषण च—महा—२।१।१

वाक्यस्योपर्युक्ते लक्षणे क्रियाविशेषणस्यापि सन्निवेशः विधातव्यः। यथा—सुष्ठु पचति, दुःपचति, अत्र सुष्ठु, दुः—दुःखेन—इति क्रियाविशेषणं तिष्ठति। सविशेषणमित्येव क्रियाविशेषणेऽपि सिध्यति, अत आह कैयटाचार्यः[4] प्रत्यासत्त्या

---

१. अष्टा०, ८।१।८

२. ,, ८।२।८२

३. अव्ययकारकविशेषणानि प्रत्येकं समुदितानि चाश्रीयन्ते यथा वृषलैर्न प्रवेष्टव्यम्। ... ...आख्यातमिति चैकत्वं विवक्ष्यते। लक्षणविधान-सामर्थ्यात् ... ... यद्यप्यव्ययं कारकं विशेषणं च तथापि प्रपंचार्थमस्यो-पादानम्। महा०, प्र०, २।१।१

४. प्र०, महा०, २।१।१

कारकस्यैव यद् विशेषणं तद् गृह्यते, न तु क्रियायाः । आख्यातेन च क्रियाप्रधानत्वं लक्ष्यते इति अतिङन्तेष्वपि देवदत्तेन शयितव्यमित्यादिषु वाक्यत्वं सिद्धति । यदि संक्षिप्तरूपेण वाक्यं परिभाष्येत तदा इदमपि कथयितुं शक्यते यत् सविशेषणं तिङन्तं क्रियापदमेव वाक्यं कथ्यते । तथा च कस्याप्यन्यस्याचार्यस्य मतं प्रस्तुवन् आह भाष्यकारः अपर आह—'आख्यातं सविशेषणम्' इत्येव, सर्वाणि ह्येतानि विशेषणानि । अत्र आख्यातं सविशेषणं वाक्यमिति लक्षणं 'तिङ्ङतिङः'[1] इति पाणिनिसूत्रे अतिङ् ग्रहणं कुर्वतः सूत्रकारस्याभिमतं लौकिकमेव पचति भवतीत्येतत् । साधारणम् । तत्र सविशेषणत्वेन विभागे साकांक्षत्वं लब्धम् । तत्र आख्यातपदेन क्रियाप्रधानं लक्ष्यते । तेन त्वया शयितव्यमित्यादेः संग्रहः । सविशेषणमित्यस्य साक्षात्परम्परया वा यद् विशेषणं तत् सहितमिति तात्पर्यम् । तेन नद्यास्तिष्ठति कूले इत्यादौ नद्या इत्यादेः समानवाक्यस्थत्वसिद्धिः[2] । पूर्वमीमांसादर्शनेऽप्येवमेव विचारः—अर्थैक्यादेकं वाक्यं साकांक्षे चेद् विभागे स्यात् । अमरसिंहेनापि एतदेवाभिप्रेत्य कारकान्वितक्रियावाचकं सुबन्ततिङन्तचयान्यतमं वाक्यमिति विश्लेषितम् तथा चोक्तं तेन—

सुप्तिङन्तचयो वाक्यं क्रिया वा कारकान्विता[3] । अत्र वाशब्दः चेदर्थे, कारकं च तिङन्तवाच्यं तदतिरिक्तपदवाच्यं वेत्यन्यत् । एकस्य तत्त्ववारणाय सुबन्तचयेत्यादि । एतत् समानार्थकमेवाख्यातमित्यादीति स्पष्टमेव । एतदेवैकोद्देश्यकैकविधेयकत्वगर्भमेकवाक्यलक्षणं बोध्यम् । तदुक्तं भर्तृहरिणा—

"साकांक्षावयवं भेदे परानाकांक्षशब्दकम् ।
क्रियाप्रधानं गुणवदेकार्थं वाक्यमुच्यते ॥"[4]

अत्र वाक्यमित्यस्यैकं वाक्यमित्यर्थः । हेमचन्द्रेण चोक्तं—'सविशेषणमाख्यातं वाक्यम्'। सर्वे शब्दाः साक्षात्रूपेण परम्परया वा क्रियाशब्दस्य एव विशेषतां प्रस्तुवन्ति । कारकं, कारकविशेषणं, क्रियाविशेषणमित्यादयो भेदास्तु अस्यैव व्याख्यानरूपाः । यदि संभ्रमादिकवशात् क्रियापदस्य एकाधिकरूपेण प्रयोगः भवति तदापि एकस्याः एव क्रियायाः अभिधानकारणात् एकाधिकबारं प्रयोगः एक एव अनुमंस्यते तथा च एकतिङ् वाक्यम् इति वाक्यलक्षणविश्लेषणेन स्पष्टीभवति ।

---

१. अष्टा०, ८।१।२८
२. उ०, महा० २।१।१
३. अमरकोशः ।
४. वाक्य०, २।४
५. हेम०, १।२।२१

(३) एकतिङ्— महा०, २।१।१

एकतिङ् वाक्यसंज्ञं भवतीति वक्तव्यम् इति महाभाष्ये एतस्य विश्लेषणम् तथा च एकं तिङन्तं वाक्यं कथ्यते इति तात्पर्यम्। अत्र एकशब्दः समानवचनः, न तु संख्यार्थकः, इति कैयटाभिमतम्। एवं च स पदसमुदायः पदसमूहो वा वाक्यमभिधीयते यस्मिन् एका क्रिया साक्षात्रूपेण अध्याहाररूपेण वा प्रकटिता भवेत् तथा अवशिष्टानि पदानि तस्याः क्रियायाः एव वैशिष्ट्यं प्रदर्शयन्ति। वाक्ये प्रयुक्तानां शब्दानां कृते त्रीणि तत्त्वानि सर्वथोपादेयानि भवन्ति—

१—वाक्यगतपदानामर्थानां सम्बन्धेषु कोऽपि बाधः न समागच्छेत्, तथा जलेन क्षेत्रंसिचति इत्यस्मिन्नुदाहरणे सम्बन्धोऽयमबाधितः तिष्ठति एवं चायं पदसमुदायः वाक्यम्। किन्तु वह्निनासिंचति इत्यत्र सम्बन्धोऽयं बाधितः तिष्ठति। अतः एकव्यापारबोधकेसविशेषणक्रियापदे तिष्ठति सत्यपि पदसमुच्चयोऽयं वाक्यं न कथ्यते।

२—वाक्यगतानि पदानि परस्परं निरपेक्षानि न भवेयुः प्रत्युत अन्यदन्यत् प्रति आकांक्षायुक्तानि भवेयुः, यथा च बाणेन रामः बालिनं हन्ति, इत्यस्मिन् पदसमुच्चये प्रत्येक शब्दः साकांक्षः तिष्ठति अतः पदसमूहोऽयं वाक्यत्वं लभते, किन्तु रामः बाली हन्ति बाण. इति पदसमूहस्य पदानि केवलं निदर्शकविभक्तिभिः समन्वितत्वेन निराकांक्षानि भवन्ति। अतः पदसमूहोऽयं वाक्यत्वेन न वरीवर्ति।

